छन्दां॑सि जज्ञिरे॒ तस्मा॒द् यजु॒स्तस्मा॑दजायत॥

पद-पाठः तस्मा॑त्। य॒ज्ञात्। स॒र्व॒ऽहु॑तः। ऋच॑ः। सामा॑नि ज॒ज्ञि॒रे।

छन्दां॑सि। ज॒ज्ञि॒रे। तस्मा॑त्। यजुः॑। तस्मा॑त्। अ॒जा॒य॒त।

अन्वय–सर्वहुतः तस्मात् यज्ञात् ऋचः सामानि जज्ञिरे। तस्मात् छन्दांसि तस्मात् यजुः अजायत।

सायण–सर्वहुतस्तस्मात्पूर्वोक्ताद्यज्ञादृचः सामानि च जज्ञिरे उत्पन्नाः। तस्माद् यज्ञाच्छन्दांसि गायत्र्यादीनि जज्ञिरे। तस्माद्यज्ञाद्यजुरप्यजायत।

शब्दार्थ–ऋचः=ऋग्वेद। **सामानि**=सामवेद। **जज्ञिरे**=उत्पन्न हुये। **छन्दांसि**=गायत्री आदि छन्द। **यजुः**=यजुर्वेद।

हिन्दी अनुवाद–जिस यज्ञ में सभी कुछ अर्थात् सबका आत्मरूप पुरुष आहूत कर दिया जाता है, ऐसे यज्ञ से ऋग्वेद और सामवेद उत्पन्न हुये। उससे गायत्री आदि छन्द उत्पन्न हुये, उससे यजुर्वेद उत्पन्न हुआ।

व्याकरण–

ऋचः–ऋच्+क्विप्। प्रथमा विभक्ति का बहुवचन।

सामानि–षो (सो)+मनिन्=सामन्। प्रथमा विभक्ति का बहुवचन। नपुंसकलिङ्ग।

जज्ञिरे–'जनी प्रादुर्भावे' धातु, लिट् लकार, प्रथम पुरुष, बहुवचन।

यजुः–यज्+उस्।

अजायत–'जनी प्रादुर्भावे' धातु, लङ् लकार, प्रथम पुरुष, एकवचन।

विशेष–इस मन्त्र से विदित होता है कि इस सूक्त की रचना के समय तक ऋक्, साम, और यजुः इन तीनों वेदों का संकलन हो चुका था। इसमें अर्थवेद का उल्लेख नहीं है। कुछ विद्वानों का विचार है कि 'छन्दांसि' पद अथर्ववेद का सूचक है। इस प्रकार इस मन्त्र में चारों वेदों की उत्पत्ति का वर्णन आ जाता है। कुछ विद्वानों का विचार है कि ऋक्, साम और यजुः पद संज्ञा वाचक न होकर प्रकार वाचक है। इनसे ऋग्वेद, सामवेद और यजुर्वेद, इन तीन वेदों का कथन न करके तीन प्रकार के मन्त्रों का कथन किया गया है। ऋचायें और साम गायत्री आदि छन्दों में निबद्ध हैं तथा यजुष् गद्यात्मक है।

१०. तस्मादश्वा अजायन्त ये केचोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः।

पद-पाठः तस्मात्। अश्वाः। अजायन्त। ये के। च। उभयादतः।
गावः। ह। जज्ञिरे। तस्मात्। तस्मात्। जाताः। अजावयः॥

अन्वय–तस्मात् अश्वाः अजायन्त। ये के च उभयादतः। तस्मात् ह गावः जज्ञिरे। तस्मात् अजावायः जाताः।

सायण–तस्मात्पूर्वोक्तद्यज्ञादश्वा अजायन्त उत्पन्नाः। तथा ये के चाश्वव्यतिरिक्ता गर्दभा अश्वतराश्चोभयादत ऊर्ध्वाधोभागयोरुभयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तथा तस्माद्यज्ञाद् गावश्च जज्ञिरे। किंच तस्माद्यज्ञादजावयश्च जाताः।

शब्दार्थ–अजायन्त=उत्पन्न हुये। **उभयादतः**=ऊपर नीचे दोनों ओर दान्तों वाले। **अजावयः**=भेड़ें और बकरियां।

हिन्दी अनुवाद–उस यज्ञ से घोड़े उत्पन्न हुये और जो घोड़ों के अतिरिक्त ऊपर नीचे दोनों ओर दान्तों वाले गधे, खच्चर आदि पशु हैं, वे उत्पन्न हुये। उस यज्ञ से गौवें उत्पन्न हुईं और उस यज्ञ से बकरियां और भेडें उत्पन्न हुईं।

व्याकरण–

उभयादतः–उभयतः दन्ताः येषां ते अर्थ में, उभय+दन्त। 'उभय' के अन्तिम 'अ' को दीप और 'दन्त' को 'दत्' आदेश। प्रथमा विभक्ति का बहुवचन।

अजावयः–अजाश्च अवयश्च अजावयः। द्वन्दसमास।

विशेष–छन्द के आग्रह से 'चोभयादतः' को 'च उभयादतः' पढ़ना चाहिये।

११. यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्पयन्।

मुखं॒ किम॑स्य॒ कौ बा॒हू का ऊ॒रू पादा॑ उच्येते।

पद-पाठः यत्। पुरु॑षम्। वि। अद॑धुः। क॒ति॒धा। वि अ॒क॒ल्प॒य॒न्।

मुख॑म्। किम्। अ॒स्य॒। कौ। बा॒हू इति॑। कौ।

ऊ॒रू इति॑। पादौ॑। उ॒च्ये॒ते॒। इति॑।११।।

अन्वय–यत् पुरुषम् व्यदधुः, कतिधा व्यकपयन्? अस्य मुखम् किम् कौ बाहू, कौ ऊरू पादौ उच्येते?

सायण–प्रश्नेनात्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापतेः प्राणरूपा देवा यद्यदा पुरुषं विराड्रूपं व्यदधुः संकल्पेनोत्पादितवन्तस्तदानीं कतिधा कतिभिः प्रकारैर्व्यकल्पयन् विविधं कल्पितवन्तः। अस्य पुरुषस्य मुखं किमासीत्। कौ बाहू अभूताम्। का ऊरू। कौ च पादावुच्येते। प्रथमः सामान्यरूपः प्रश्नः पश्चान्मुखं किमित्यादिना विशेषविषयाः प्रश्नाः।

शब्दार्थ–व्दयधुः=विभाजित किया। **कतिधा**=कितने रूपों में। **व्यकल्पयन्**=

विविध प्रकार से कल्पित किया। **ऊरू**=जांघें। **उच्येते**=कहे जाते हैं।

हिन्दी अनुवाद–प्रजापति के प्राण रूप देवताओं ने जब उस विराट् रूप पुरुष को विभाजित किया तो उसको कितने रूपों में विविध रूप से कल्पित किया? इस पुरुष का मुख कौन सा था, कौन सी भुजायें थीं, कौन सी जंघायें थीं और कौन से पैर कहे जाते हैं?

व्याकरण–

व्यदधुः–वि+धा, लङ् लकार, प्रथम पुरुष, बहुवचन।

कतिधा–कति+धा।

विशेष–छन्द के आग्रह से 'व्यदधुः' को 'वि अदधुः' और 'व्यकल्पयन्' को 'वि अकल्पयन्' पढ़ना चाहिये।

१२. ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः। कृतः।

ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतः।

पद-पाठः ब्राह्मणः। अस्य। मुखम्। आसीत्। बाहू इति। राजन्यः। कृतः।

ऊरू इति। तत्। अस्य। यत्। वैश्यः। पत्ऽभ्याम्। शूद्रः। अजायत।।१२।।

अन्वय–अस्य मुखम् ब्राह्मणः आसीत्। बाहू राजन्यः कृतः। अस्य यद् ऊरू तद् वैश्यः। पद्भ्याम् शूद्रः अजायत।

सायण–इदानीं पूर्वोक्तप्रश्नानामुत्तराणि दर्शयति। अस्य प्रजापतेः ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषो मुखमासीत् मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रियत्वजातिमान्पुरुषः स बाहूकृतः। बाहूत्वेन निष्पादितः। बाहूभ्यामुत्पादित इत्यर्थः। तत्तदानीमस्य प्रजापतेर्यदुरू तद्रूपो वैश्यः सम्पन्नः। ऊरूभ्यामुत्पन्न इत्यर्थः। तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान्पुरुषोऽजायत। इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तियुर्जः संहितायां सप्तमकाण्डे स मुखतस्त्रिवृतं निरमिमीतेत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये।

शब्दार्थ–**अस्य**=इस पुरुश का। **राजन्यः**=क्षत्रिय। **ऊरू**=जांघें। **पदभ्याम्**=पैरों से।

हिन्दी अनुवाद–इस पुरुष का मुख ब्राह्मण हुआ अर्थात् ब्राह्मण इसके मुख से उत्पन्न हुए। भुजाओं को क्षत्रिय बनाया गया, अर्थात् क्षत्रिय इसकी भुजाओं से उत्पन्न हुये। जो इसकी जांघे थीं वे वैश्य इस पुरुश की जांघों से उत्पन्न हुये और इसके पैरों से शूद्र उत्पन्न हुये।

व्याकरण–

ब्राह्मण–ब्रह्मन्+अण्।

राजन्यः–राजन् शब्द से 'राजश्वसुराद्यत्' से यत् प्रत्यय।

विशेष–आर्यों के समाज की रचना का, चार वर्णों के विकास का स्पष्ट संकेत ऋग्वेद के इसी मन्त्र में मिलता है। यजुर्वेद में इसका और भी विस्तृत वर्णन है। अवेस्ता में भी इसी प्रकार से वर्णों का विभाजन दिखाया गया है।

छन्द के आग्रह से 'राजन्यः' को 'राजनियः' पढ़ना चाहिये।

१३. चन्द्रमा मनसो जातश् चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत।

पद-पाठः चन्द्रमाः। मनसः। जातः। चक्षोः। सूर्यः। अजायत।
मुखात्। इन्द्रः। च। अग्निः। च। प्राणात्। वायुः। अजायत।१३।।

अन्वय–मनसः चन्द्रमाः जातः, चक्षोः सूर्यः अजायत, मुखात् इन्द्रः च अग्नि चः, प्राणात् वायु अजायत।

सायण–यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह। प्रजापतेर्मनसः सकाशाच्चन्द्रमा जातः। चक्षोश्च चक्षुषः सूर्योऽप्यजायत। अस्य मुखादिन्द्रश्चाग्निश्च देवावुत्पुन्नौ। अस्य प्राणाद्वायुरजायत।

शब्दार्थ–मनसः=मन से। **जातः**=उत्पन्न हुआ। **चक्षोः**=आंख से। **अजायत**=उत्पन्न हुआ।

हिन्दी अनुवाद–इस प्रजापति रूप पुरुष के मन से चन्द्रमा उत्पन्न हुआ, आंख से सूर्य उत्पन्न हुआ, मुख से इन्द्र और अग्नि उत्पन्न हुये और प्राण से वायु उत्पन्न हुआ।

व्याकरण–

चक्षोः–'चक्षु' शब्द, पञ्चमी विभक्ति, एकवचन। वैदिक रूप है। लोक में 'चक्षुषः' रूप होगा।

विशेष–मन में शान्ति, आंखों में प्रकाश, मुख अर्थात् वाणी में शक्ति और पवित्रता तथा प्राणों में वायु का आना परम पुरुष द्वारा ही उत्पन्न किये गये हैं।

छन्द के आग्रह से 'चाग्निश्च' को 'च अग्निश्च' पढ़ना चाहिये।

१४. नाभ्या आसीदुन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पुद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्॥

पद-पाठः नाभ्याः। आसीत्। अन्तरिक्षम्। शीर्ष्णः। द्यौः। सम्। अवर्तत।

पुत्भ्याम्। भूमिः। दिशः। श्रोत्रात्। तथा। लोकान्। अकुल्पयन्॥१४॥

अन्वय–नाभ्याः अन्तरिक्षम् शीर्ष्णः द्यौः समवर्तत। पद्भ्याम् भूमिः, श्रोत्रात् दिशः, तथा लोकान् अकल्पयन्।

सायण–यथा चन्द्रादीन्प्रजापतेर्मनः प्रभृतिभ्योऽकल्पयंस्तथान्तरिक्षादींल्लोका-न्प्रजापतेर्नाभ्यादिभ्यो देवा अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्याः प्रजापतेर्नाभेरन्तरिक्षमासीत्। शीर्ष्णः शिरसो द्यौः समवर्तत उत्पन्ना। अस्य पद्भ्यां पादाभ्यां भूमिरुत्पना। अस्य श्रोत्राद्दिश उत्पन्नाः।

शब्दार्थ–नाभ्या=नाभि से। **शीर्ष्णोः**=सिर से। **सतवर्तत**=उत्पन्न हुआ। **अकल्पयन्**=रचना की।

हिन्दी अनुवाद–उस प्रजापति रूप परम पुरुष की नाभि से अन्तरिक्ष लोक बना, सिर से द्युलोक उत्पन्न हुआ, दोनों पैरों से भूमि उत्पन्न हुई और कानों से दिशायें उत्पन्न हुई। इस प्रकार उस पुरुष से देवताओं ने लोकों की रचना की।

व्याकरण–

नाभ्याः–नाभि शब्द, पञ्चमी विभक्ति, एकवचन।

शीर्ष्णः–शिरस् शब्द को वैदिक 'शीर्षन्' आदेश। पञ्चमी विभक्ति का एकवचन।

समवर्तत–सम्+वृत् धातु, लङ् लकार, प्रथम पुरुष, एकवचन।

लोकाँ अकल्पयन्–'लोक' शब्द का अर्थ 'खुला स्थान' (open space) है। ऋग्वेद में 'लोक' शब्द से पहले 'उ' पद का प्रायः प्रयोग हुआ है। इससे पहले केवल एक स्थान ऐसा है जहां 'उ' नहीं लगाया गया और इस मन्त्र में इसको नहीं लगाया गया। इस प्रकार 'उलोक' का अर्थ है–'विस्तृत लोक'। प्रतीत होता है कि 'उ' पद 'उरु' पद का संक्षिप्त रूप है छन्द की दृष्टि से 'द्यौः' के स्थान पर दियौ पढ़ना चाहिये।

१५. सुप्तास्यासन् परिधयुस् त्रिः सुप्त सुमिधः। कृताः।

देवा यद्युज्ञं तन्वाना अबध्नन् पुरुषं पुशुम्।

पद-पाठः सप्त। अस्य। आसन्। परिऽधयः। सप्त। सम्ऽइधः। कृताः।

देवाः। यत्। यज्ञम्। तन्वानाः। अबध्नन्। पुरुषम्। पशुम्।।१५।।

अन्वय–यज्ञं तन्वाना यत् देवाः पुरुषम् पशुम् अबध्नन्, अस्य परिधयः, सप्त आसन् त्रिः सप्त समिधः कृताः।

सायण–अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि सप्तछंदांसि परिधय आसन्। ऐष्टिकस्याहवनीयस्य त्रयः परिधयः उत्तरवेदिकास्त्रयः आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः अत एवाम्नायतेन पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्तीति। तत एत आदित्यसहिताः सप्तपरिधयोऽत्र सप्तछन्दोरूपः। तथा समिधस्त्रिः सप्त त्रिगुणिताः सप्तसंख्याका एकविंशतिः कृताः। द्वादशमासाः पंचर्तवः त्रय इमे लोका असावादित्य एकविंशः (तै० सं० ५.१.१०३) इति श्रुताः पदार्थाः एकविंशतिदारुयुक्तेन्धनत्वेन भाविताः। यद्यः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं कुर्वाणाः पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः। एतदेवाभिप्रेत्य पूर्वत्र यत्पुरुषेण हविषेत्युक्तम्।

शब्दार्थ–तन्वानाः=सम्पादन करते हुये। **अबध्नन्**=बांधा।

हिन्दी अनुवाद–सृष्टि उत्पत्ति रूप मानस यज्ञ का सम्पादन करते हुये देवताओं ने विराट् पुरुष रूपी पशु को बांधा, अर्थात् स्वीकार किया तो इस यज्ञ की सात परिधियां और इक्कीस समिधायें बनाई गईं।

व्याकरण–

परिधयः–परि+धा+कि=परिधि। प्रथमा विभक्ति का बहुवचन।

समिधः–सम्+इन्ध्+क्विप्=समिध्। प्रथमा विभक्ति का बहुवचन।

कृताः–कृ+क्त।

तन्वानाः–तनु+उ+शानच्=तन्वान्। प्रथमा विभक्ति का बहुवचन।

अबध्नन्–बन्ध् धातु, लङ् लकार, प्रथम पुरुष, बहुवचन।

विशेष–यज्ञ वेदी के चारों ओर जो चढ़ने-उतरने के लिये सीढ़ियां बनाई जाती हैं उनको परिधि कहते हैं। सामान्यतः वे परिधियां तीन होती है, परन्तु इस मन्त्र में सात परिधि कही गई हैं। सायण ने गायत्री आदि सात छन्दों को सात परिधि माना है। अथवा आहवनीय यज्ञ की तीन, उत्तर वेदिका की तीन और आदित्य की प्रतिनिधि रूप एक, इस प्रकार सात परिधियां है। ये दोनों अर्थ महीधर ने भी स्वीकार किये हैं। २१ समिधायें कही गई हैं–१२ महीने, ५ ऋतुयें, ३ लोक और आदित्य।

कुछ समालोचकों का विचार है कि भारतवर्ष में प्राचीनकाल में पुशओं की बलि देने का सूत्रपात इसी मन्त्र से हुआ था। यज्ञों के विधान में पशुओं का और मनुष्य का भी वध करने का विधान पाया जाता है। उसका संकेत इस मन्त्र में है। वस्तुतः इस मन्त्र में 'पशु' शब्द का अर्थ जानवर (animal) नहीं है। 'पश्यतीति पशुः' इस व्युत्पति के अनुसार सर्वद्रष्टा परमेश्वर पुरुष को पशु कहा गया है। इस मन्त्र का अर्थ है कि सर्वद्रष्टा परम पुरुष को देवताओं ने अपने विचारों में बांधा है।

१६. य॒ज्ञेन॑। य॒ज्ञम॑यजन्त दे॒वास् तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।
ते ह॒ नाकं॑ महि॒मान॑ः सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः॥

पद-पाठः य॒ज्ञेन॑। य॒ज्ञम् अ॒ज॒य॒न्त॒। दे॒वाः। तानि॑। धर्मा॑णि। प्र॒थमानि॑। आ॒स॒न्।
ते। ह॒। नाक॑म्। म॒हि॒मान॑ः। स॒च॒न्त॒। यत्र॑। पूर्वे॑। सा॒ध्याः। सन्ति॑। दे॒वाः॥१६॥

अन्वय–देवाः यज्ञेन यज्ञम् अजयन्त। तानि धर्माणि प्रथमानि आसन्। महिमानः ते ह नाकं सचन्त, यत्र पूर्वे साध्याः देवाः सन्ति।

सायण–पूर्वं प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति। देवाः प्रजापतिप्राणरूपाः यज्ञेन तथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिमयजन्त पूजितवन्तः। तस्मात्पूजनात्यानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यान्यासन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः। अथोपासनतत्फलानुवादकभागार्थः संगृह्यते। यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाः विराडुपास्तिसाधका देवा सन्ति तिष्ठन्ति तन्नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति।

शब्दार्थ–यज्ञेन=संकल्प रूप मानस यज्ञ के द्वारा। **यज्ञम्**=परम पुरुष रूप प्रजापति का। **अयजन्त**=यजन किया था। **धर्माणि**=नियम, सृष्टि उत्पत्ति के वधान। **प्रथमानि**=सबसे मुख्य। **नाकम्**=दिव्य स्वर्ग को। **महिमान**=महिमा को प्राप्त करने वाले। **पूर्वे**=प्राचीन काल के। **साध्याः**=सिद्धि को प्रात करने वाले। **सचन्त**=प्राप्त करते हैं।

हिन्दी अनुवाद–देवताओं ने उस संकल्प रूप मानस यज्ञ के द्वारा उस यज्ञ रूप परम पुरुष प्रजापति का यजन (पूजन) किया था। उससे उत्पन्न हुये उनके धर्म (नियम, या सृष्टि उत्पत्ति के विधान) सबसे मुख्य हुये। महिमा को प्राप्त करने वाले वे देवता उस दिव्य स्वर्ग को प्राप्त करते हैं, जहाँ प्राचीन काल में सिद्धि को प्राप्त करने वाले देवता रहते हैं।

व्याकरण– अयजन्त–यज् धातु, लङ् लकार, प्रथम पुरुष, बहुवचन।

धर्माणि–धृ+मनिन् (मन)=धर्म। प्रथमा विभक्ति का बहुवचन।

नाकम्–कमिति सुखम्। न+क:=अक:=दु:खम्। अक:=नाक:=सुखम्।

महिमान:–महत्+इमनिच्=महिमन्। प्रथमा विभक्ति का बहुवचन।

सचन्त–षच् (सच्) लङ् लकार, प्रथम पुरुष का बहुवचन। वैदिक रूप है। धातु के पूर्व का 'अ' लुप्त है। वर्तमान के अर्थ में लङ् लकार।

साध्या:–साध्+ण्यत्=साध्य।

विशेष–मैक्डानल के अनुसार यहां पुरुष की यज्ञ के रूप में उसी प्रकार कल्पना की गई है, जैसे पुराणों में विष्णु की है। सायण और महीधर ने 'महिमान:' का अर्थ किया है–विराट् के उपासक महात्मा। मैक्डानल के अनुसार इसका अर्थ है–यज्ञ में निहित शक्तियां।

छन्द की पूर्ति के लिये इस मन्त्र में 'प्रथमान्यास्न' को 'प्रथमानि आसन्' तथा 'साध्या:' को साधिया: पढ़ना चाहिये।

हिरण्यगर्भ सूक्त

(मण्डल–१०, सूक्त–१२१)

ऋषि–हिरण्यगर्भ **देवता**–क संज्ञक प्रजापति **छन्द:**–त्रिष्टुप्।

१. हि॒र॒ण्य॒ग॒र्भः सम॑वर्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्।
स दा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठ: हि॒र॒ण्य॒ग॒र्भ:। सम्। अ॒व॒र्त॒त। अग्रे॑। भू॒तस्य॑। जा॒त:। पति॑:। एक॑:। आ॒सी॒त्। स:। दा॒धा॒र। पृ॒थि॒वीम्। द्याम्। उ॒त। इ॒माम। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॒॥१॥

अन्वय–हिरण्यगर्भ: अग्रे समवर्तत। जात: भूतस्य एक: पति: आसीत्। पृथिवीम् उत इमाम् द्याम् दाधार। कस्मै देवाय हविषा विधेम।

सायण–हिरण्यगर्भ: हिरण्मयाण्डभूतस्य गर्भभूत: प्रजापतिर्हिरण्यगर्भ:। यद्वा हिरण्मयोऽण्डो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते। अग्रे प्रपञ्चोत्पत्ते: प्राक् समवर्तत। मायाध्यक्षात्सिसृजो: परमात्मन: समजायत। यद्यपि परमात्मैव हिरण्यगर्भस्तथापि तदुपाधिभूतानां वियदादीनां ब्रह्मणं उत्पत्ते: तदुपहितोऽप्युत्पन्न इत्युच्यते। स च जातो जातमात्र एव एकोऽद्वितीय: सन् भूतस्य विकारजास्य ब्रह्माण्डादे: सर्वस्य जगत: पतिरीश्वर आसीत्। न केवलं पतिरासीदेव अपि तर्हि स हिरण्यगर्भ:

पृथिवीं विस्तीर्णां द्यां दिवमुत अपि च इमामस्माभिर्दृश्यमानां पुरोवर्तिनीं इमां भूमिम्। यद्वा। पृथिवीत्यन्तरिक्षनाम अन्तरिक्षं दिवं भूमिं च दाधार धारयति। कस्मै। अत्र किं शब्दो–निर्ज्ञातस्वरूपत्वात्प्रजापतौ वर्तते। यद्वा सृष्ट्यर्थं कामयते इति कः। 'कमेर्डः' इति 'ड' प्रत्ययः। यद्वा कं सुखम् तद्रूपत्वात् क इत्युच्यते। अथवा इन्द्रेण पृष्टः प्रजापतिर्मदीयं महत्त्वं तुभ्यं प्रदाय अहं कः कीदृशः स्यामित्युक्तवान्। स इन्द्रः प्रत्युचे यदीदं ब्रहीष्यहं कः स्यामिति तदेव त्वं भवेति। अतः कारणात् क इति प्रजापतिराख्यायते। इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत् इत्यादिकं ब्राह्मणमत्रानुसंधेयम्। यदासौ किं शब्दस्तदा सर्वनामत्वात्स्मैभावः सिद्धः। यदा तु यौगिकस्तदा व्यत्ययेनेति द्रष्टव्यम्। 'सावेकाच' (पाणिनि ३.१.१६५) इति प्राप्तस्य 'न गोश्वन्सावर्वर्णेति' प्रतिशेधः (पाणिनि ६.१. १८२)। क्रियाग्रहणं कर्त्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थी। कं प्रजापतिं देवाय देवं दानादिगुणयुक्तं हविषा प्राजापत्यस्य पशोर्वपा- रूपेणैककपालात्मकेन पुरोडाशेन वा विधेम वयमृत्विजः परिचरेम। विधतिः परिचरणकर्मा।

शब्दार्थ–हिरण्यगर्भः=परमात्मा का हिरण्यगर्भ रूप। **समवर्तत**=उत्पन्न हुआ। **जातः**=उत्पन्न होते ही। **भूतस्य**=सभी प्राणियों को। **दाधारः**=धारण किये हुये हैं। **कस्मै**=सुख स्वरूप, 'क' इस नाम वाले। **हविषा**=हवि के द्वारा। **विधेम**=पूजन करते हैं।

हिन्दी अनुवाद–परमात्मा का वह हिरण्यगर्भ रूप सबसे पहले, अर्थात् सृष्टि की उत्पत्ति से भी पूर्व उत्पन्न हुआ था। उत्पन्न होते ही वह सभी प्राणियों का एकमात्र स्वामी हुआ। वह पृथिवी और द्युलोक को धारण किये हुये है। सुख स्वरूप अथवा 'क' इस नाम वाले दिव्य गुणों से युक्त उस हिरण्यगर्भ का हम हवि के द्वारा पूजन करते हैं।

व्याकरण–

हिरण्यगर्भः–हिरण्यस्य हिरणमस्य गर्भः। षष्ठी तत्पुरुष समास।

हिरण्य–हिरण्य+मयट्। 'हिरण्य' के 'य' और 'मयट्' के 'म' का छान्दस लोप।

समवर्तत–सम्+वृ धातु, लङ् लकार, प्रथम पुरुष एकवचन।

दाधार–धृ धातु, लङ् लकार, प्रथम पुरुष, एकवचन।

कस्मै–'क्रियाग्रहणं कर्तव्यम्' से द्वितीया के अर्थ में चतुर्थी। किम्+उ=क। चतुर्थी का एकवचन।

विशेष–हिरण्यगर्भ की व्याख्या अनेक विद्वानों ने विभिन्न प्रकार से की है।

सायण के अनुसार सुवर्णमय अण्डे के गर्भ से बना प्रजापति अथवा सुवर्णमय अण्डे को गर्भ में धारण करने वाला प्रजापति हिरण्यगर्भ है। पीटर्सन ने हिरण्यगर्भ का अर्थ सुवर्णबीज किया है। 'समवर्तत' का सायण ने 'उत्पन्न हुआ' महीधर ने 'स्वयं' शरीरधारी हुआ और उव्वट ने 'सर्वप्रथम शरीर धारण किया' अर्थ किये हैं।

'कस्मै' शब्द की व्याख्या अनेक प्रकार की गई है। १. हिरण्यगर्भ प्रजापति को छोड़कर हम किस देव का पूजन करें? अर्थात् उस हिरण्यगर्भ का ही पूजन करते हैं। २. 'क' अर्थात् अनिर्ज्ञात रूप प्रजापति का पूजन करते हैं। ३. सुखस्वरूप प्रजापति का पूजन करते हैं। ४. 'क' संज्ञक प्रजापति का पूजन करते हैं।

इस हिरण्यगर्भ सूक्त द्वारा और पुरुष सूक्त द्वारा ऋग्वेद में एकदेववाद की स्थापना की गई है। इस सूक्त का ऋषि हिरण्यगर्भ कहा गया है, जबकि इसमें हिरण्यगर्भ प्रजापति की स्तुति है। हिरण्यगर्भ को देवता मानना अधिक उपयुक्त प्रतीत होता है।

२. य आ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः।
यस्य॑ च्छा॒याऽमृतं॒ यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठः यः। आ॒त्म॒ऽदाः। ब॒ल॒ऽदाः। यस्य॑। विश्वे॑। उ॒प॒ऽआस॑ते। प्र॒ऽशिष॑म्। यस्य॑। दे॒वाः। यस्य॑। छा॒या। अ॒मृत॑म्। यस्य॑। मृ॒त्युः। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॥२॥

अन्वय—यः आत्मदाः, बलदा, यस्य प्रशिषम् विश्वे उपासते, यस्य देवाः। अमृतम् यस्य छाया, मृत्युः यस्य। कस्मै देवाय हविषा विधेम।

सायण—यः प्रजापतिः आत्मदाः आत्मनां दाता। आत्मानो हि सर्वे तस्मात् परमात्मन उत्पद्यन्ते। यथाग्नेः सकाशद्विस्फुलिङ्गा जायन्ते तद्वत। यद्वा आत्मनां शोधयिता। दैप् शोधने। आतो मनिन्निति विच् (पाणिनि ३.२.७४) बलदाः। बलस्य च दाता शोधयिता वा। यस्य च प्रशिषं प्रकृष्टं शासनमाज्ञां विश्वे सर्वे प्राणिनः उपासते प्रार्थयन्ते सेवन्ते वा। यथा देवा अपि यस्य प्रशानसनमुपासते। अपि च अमृतममृतत्वम्। भावप्रधानो निर्देशः। यद्वा मृतं मरणं नास्त्यस्मिन्नित्यमृतं सुधा। तदपि यस्य प्रजापतेः छाया छायेव वशवर्ति भवति। मृत्युर्यमश्च प्राणापहारी छायेव भवति। तस्मै कस्मै देवायेत्यादि समानं पूर्वेण। हविषा पुरोडाशात्मनेति तु विशेषः।

शब्दार्थ—आत्मदा=आत्माओं का देने वाला। **उपासते**=मानते हैं। **प्रशिषम्**=शासन को। **अमृतम्**=अमृतत्व, दिव्य लोक। छाया के समान वशवर्त्ती।

हिन्दी अनुवाद—जो हिरण्यगर्भ प्रजापति आत्माओं का अर्थात् जीवन का देने वाला है और बल का देने वाला है, जिसके शासन को सभी प्राणी मानते हैं जिसके शासन को देवता भी मानते हैं, अमृतत्व या दिव्यलोक जिसके छाया के समान वशवर्ती

हैं और मृत्यु भी छाया के समान जिसकी वशवर्ती है। सुख-स्वरूप या 'क' संज्ञक गुण सम्पन्न उस हिरण्यगर्भ का हम हवि द्वारा पूजन करते हैं।

व्याकरण-

आत्मदाः-आत्मनं ददाति अर्थ में आत्मन्+दा+क्विप्। अथवा आत्मन्+दैप् शोधने+क्विप्।

बलदाः-बलं ददाति अर्थ में-बल+दा+क्विप्=बलदा।

उपासते-उप+आस् धातु, लट् लकार, प्रथम पुरुष, बहुवचन।

प्रशिषम्-प्र+श्+क्विप् ''शास इदङ्हलोः'' सूत्र से 'इत्व' और ''शासिवसिघसीनां च'' सूत्र से 'स' को 'ष्' आदेश। प्रशिष्। द्वितीया विभक्ति का एकवचन।

अमृतम्-न मृतं मरणम् अस्मिन् पद् अमृतम् मोक्षः।

विशेष-सायण ने 'आत्मदाः' का अर्थ 'आत्माओं को देने वाला का शोधन करने वाला', महीधर और उव्वट ने 'स्वयं को देने वाला या उपासकों को आयु प्रदान करके वाला', एवं पीटर्सन ने 'प्राण या श्वास को देने वाला' किया है। उव्वट और महीधर के अनुसार 'बलदाः' का अर्थ 'मुक्ति-भुक्ति-प्रदात्ता' है। 'यस्य छाया अमृतं यस्य मृत्युंः' का अर्थ उव्वट और महीधर ने किया है-'जिसकी कृपा अमृत रूप मोक्ष का हेतु है और अकृपा मृत्यु रूप आवागमन का हेतु है।

छन्द के अनुरोध से 'छायामृतम्' को सन्धिच्छेद करके 'छाया अमृतम्' पढ़ना चाहिये।

३. यः प्रा॒ण॒तो नि॑मिष॒तो म॑हि॒त्वैक॒ इद्राजा॒ जग॑तो ब॒भूव॑।
य ईशे॑ अ॒स्य द्वि॒पद॒श्चतु॑ष्पदः॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठः यः प्रा॒ण॒तः। निऽमि॒ष॒तः। म॒हि॒ऽत्वा। एकः॑। इत्। राजा॑। जग॑तः। ब॒भूव॑।
यः। ईशे॑। अ॒स्य। द्वि॒ऽपदः॑। चतुः॑ऽपदः। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॥३॥

अन्वय-यः एकः इत् महित्वा प्राणतः निमिषतः जगतः राजा बभूव। यः अस्य द्विपदः चतुष्पदः ईशे। कस्मै देवाय हविषा विधेम।

सायण-यो हिरण्यगर्भः प्राणतः प्रश्वसतः निमिषतः अक्षिपक्ष्मचलनं कुर्वतः। अत्रापि पूर्ववद्विभक्तिरुदाता। जगतः जङ्गमस्य प्राणिजातस्त महित्वा महत्त्वेन। माहात्म्येन एक इत् अद्वितीय एव सन् राजा बभूव ईश्वरो भवति। अस्य परिदृश्यमानस्य द्विपपदः पादद्वययुक्तस्य मनुष्यादेः चतुष्पदः गवाश्वादेश्च यः प्रजापतिरीशे ईष्टे। द्वौ पादौ यस्य स द्विपात्। संख्या सु पूर्वस्येति पादशब्दस्यन्त्यलोपः समासान्तः। भ संज्ञायां पादः पदिति पद्भावः स्वरवर्जमेषैव चतुष्पद इत्यत्रापि प्रक्रिया। ईदृशो यः प्रजापतिः तस्मै। कस्मा इत्यादि सुबोधम्। हविषा हृदयाद्यद्यात्मनेत्ययमत्र विशेषः।

शब्दार्थ–प्राणतः=श्वास-प्रश्वास लेने वाले। **निमिषतः**=पलकों का संचाजन करने वाले। **महित्वा**=महिमा से। **जगतः**=गतिशील जगत् का। **ईशे**=स्वामी है। **द्विपदः**=दोपायों का। **चतुष्पदः**=चौपायों का।

हिन्दी अनुवाद–जो हिरण्यगर्भ प्रजापति अकेला ही अपनी महिमा से श्वास-प्रश्वास लेने वाले और पलकों का संचालन करने वाले सम्पूर्ण गतिशील जगत् का राजा हुआ है, जो दृश्यमान जगत् के दो पैरों वाले मनुष्य आदि प्राणियों तथा चार पैरों वाले गाय घोड़ा आदि पशुओं का स्वामी है, सुखस्वरूप अथवा 'क' संज्ञक उस हिरण्यगर्भ प्रजापति का हम हवि के द्वारा पूजन करते हैं।

व्याकरण–

प्राणतः–प्र+अन प्राणने+शतृ=प्राणत्। षष्ठी विभक्ति का एकवचन।

निमिषतः–नि+मिष्+शतृ=निमिषत्। षष्ठी विभक्ति का एकवचन।

महित्वा–महत्+त्व=महित्त्व। तृतीया का एकवचन। वैदिक रूप।

ईशे–ईश् धातु, लट् लकार, प्रथम पुरुष एक वचन। वैदिक रूप।

द्विपदः–द्वौ पादौ यस्य अर्थ में द्विपाद्। षष्ठी का एकवचन। पाद को पद आदेश।

चतुष्पदः–चत्वारः पादाः यस्य=चतुष्पाद्। षष्ठी विभक्ति का एकवचन।

विशेष–'प्राणतः' और 'निमिषतः' का अर्थ 'सोने वाले और जागने वाले' भी लिया जा सकता है।

छन्द के आग्रह से 'महित्वैकः' को 'महित्वा एकः' तथा 'ईशे अस्य' को ईशेऽस्य पढ़ना चाहिये।

४. यस्ये॒मे हि॒मव॑न्तो महि॒त्वा यस्य॑ समु॒द्रं र॒सया॑ स॒हाहुः।
यस्ये॒माः प्र॒दिशो॒ यस्य॒ बा॒हू कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठः यस्य॑। इ॒मे। हि॒मऽव॑न्तः। म॒हि॒ऽत्वा। यस्य॑। स॒मु॒द्रम्। र॒सया॑। स॒ह। आ॒हुः। यस्य॑। इ॒माः। प्र॒ऽदिशः॑। यस्य॑। बा॒हू इति॑। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॥४॥

अन्वय–इमे हिमवन्तः यस्य महित्वा आहुः, रसया सह समुद्रम् यस्य, इमाः प्रदिशः यस्य, बाहू यस्य, कस्मै देवाय हविषा विधेम।

सायण–हिमा अस्मिन्सन्तीति हिमवान्। तेन बहुवचनान्तेन सर्वे पर्वता लक्ष्यन्ते। यथा छत्रिणो गच्छन्तीति। हिमवन्तो हिमवदुपलक्षिता इमे दृश्यमानाः सर्वे पर्वता प्रजापतेर्महित्वा महत्त्वं माहात्म्यमैश्वर्यमित्याहुः। तेन सृष्टवात् तद्रूपेणावस्थानाद्वा। तथा

रसया। रसो जलम्। तद्वती रसा नदी। अर्शआदित्वादच्। जातावेकवचनम्। सर्वान् समुद्रान् यस्य महाभाग्यमित्याहुः कथयन्ति सृष्ट्यभिज्ञाः। यस्य चेमाः प्रदिशः प्राच्यारम्भाः आग्नेय्याद्याः कोणदिश ईशितव्याः। तथा बाहू। वचनव्यत्ययः बाहवो भुजाः। भुजवत्प्राधान्युक्ताः प्रदिशश्च यस्य स्वभूताः। तस्मै कस्मै इत्यादि समानं पूर्वेण।

शब्दार्थ–हिमवन्त=बर्फीले पर्वत। **महित्वा**=महिमा को। **रसया सह**=नदियों के साथ। **प्रदिशः**=प्रधान दिशायें (पूर्व आदि चार)। **बाहू**=बाहू के समान कोण दिशायें (आग्नेय आदि चार)।

हिन्दी अनुवाद–ये बर्फीले पर्वत उस हिरण्यगर्भ प्रजापति की महिमा को कहते हैं, नदियों सहित समुद्र जिसकी महिमा को कहते हैं, ये प्रधान दिशायें (पूर्व आदि चार दिशायें) और बाहू के समान कोण दिशायें (आग्नेय आदि चार कोण दिशायें) जिसकी महिमा को कहती हैं, सुख स्वरूप या 'क' संज्ञक दिव्य गुण सम्पन्न उस हिरण्यगर्भ का हम हवि के द्वारा पूजन करते हैं।

व्याकरण–

हिमवन्तः–हिम+मतुप्=हिमवत्। प्रथमा विभक्ति का एकवचन।

रसया–रसः जलम् अस्य अस्ति=रस+अच् (मतुप् अर्थ में)+ टाप्=रसा। तृतीया विभक्ति का।

विशेष–इस मन्त्र में उव्वट और महिधर ने अर्थ किया है–ये हिमालय आदि पर्वत जिसकी महिमा से हैं ऐसा विद्वान कहते हैं। पीटर्सन के अनुसार–ये हिमयुक्त पर्वत उसके हैं (His are these snowy hills) पीटर्सन ने रसा का अर्थ 'रसा नाम की नदी' किया है तथा 'इमाः' का अर्थ ये दिशायें एवं 'प्रदिशः' का अर्थ 'दिशाओं के कोण' किया है। उसने सायण कृत 'प्रदिशः- की व्याख्या को स्वीकार नही किया।

छन्द की पूर्ति के लिये 'यस्येमे' को 'यस्य इमे' और 'यस्येमाः' को 'यस्य इमाः' पढ़ना चाहिये।

५. येन॒ द्यौरु॒ग्रा पृ॑थि॒वी च॑ दृ॒ळ्हा येन॒ स्वः॑ स्तभि॒तं येन॒ नाकः॑।
यो अ॒न्तरि॑क्षे॒ रज॑सो वि॒मानः॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठः येन॑। द्यौः। उ॒ग्रा। पृ॒थि॒वी। च॒। दृ॒ळ्हा। येन॑। स्व॒रिति स्वः॑। स्त॒भि॒तम्। येन॑। नाकः॑। यः। अ॒न्तरि॑क्षे। रज॑सः। वि॒ऽमानः॑। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॒॥५॥

अन्वय–येन द्यौः उग्रा पृथिवी च दृढा, येन स्वः स्तभितम्, येन नाकः, य अन्तरिक्षे रजसः विमानः, कस्मै देवाय हविषा विधेम।

सायण–येन प्रजापतिना द्यौः अन्तरिक्षम् उग्रा उद्गूर्णं विशेषागहनरूपं वा।

पृथिवी भूमिश्च दृढ़ा येन स्थिरीकृता। स्वः स्वर्गश्च येन, स्तभितं स्तब्धं कृतम्। यथा अधो न पतति तथोपर्यवस्थापितभित्यर्थः। ग्रसितस्कभितस्तभितेति निपात्यते। तथा नाक आदित्यश्च येनान्तरक्षि स्तभितः। यश्चान्तरिक्षे रजसः उदकस्य विमानो निर्माता। तस्मै कस्मा इत्यादि गतम्।

शब्दार्थ–उग्रा=ऊपर उठाया हुआ है। **दृढ़ा**=स्थिर कर दिया है। **स्वः**=स्वर्गलोक को। **स्तभितम्**=ऊपर थामा हुआ है। **नाकः**=सूर्य को। **रजसः**=जलों को। **विमानः**=बनाने वाला है।

हिन्दी अनुवाद–जिस हिरण्यगर्भ प्रजापति ने द्युलोक को ऊपर उठाया हुआ है और पृथिवी को स्थिर कर दिया है,, जिसने स्वर्ग लोक को ऊपर थामा हुआ है और सूर्य को ऊपर अन्तरिक्ष में थामा है, जो आकाश में जलों को बनाने वाला है, सुख स्वरूप अथवा 'क' संज्ञक दिव्य गुण सम्पन्न उस हिरण्यगर्भ प्रजापति का हम हवि के द्वारा पूजन करते हैं।

व्याकरण–

दृळ्हा–दृह्+क्त+टाप्=दृळ्हा।

उग्रा-उद्+गुरी उद्यमने+क(अ)+टाप्=उग्रा।

स्तभितम्-स्तम्भ् धातु से 'क्त' होकर निपातनात् निष्पन्न किया है।

विमानः-विविधं मानं निर्माण यस्य सः विमानः। विमानः। वि+मा+ल्युट् (अन)।

विशेष-सायण ने 'उग्रा' को पृथिवी का विशेषण मानकर अर्थ किया है- उठी हुई या गहन। उव्वट और महीधर ने इस शब्द का अर्थ किया है-वृष्टि देने वाली। पीटर्सन ने 'उग्रा' को 'द्यौः' का विशेषण मानकर 'महान्' अर्थ किया है। 'स्वः' का अर्थ सायण ने 'स्वर्ग', महीधर ने 'आदित्य मण्डल' और पीटर्सन ने 'विस्तृत आकाश' किया है। 'नाकः' का अर्थ सायण ने 'आदित्य' और महीधर ने 'स्वर्गलोक' किया है।

छन्द के अनुरोध से 'स्वः' को 'सुवः' पढ़ना चाहिये।

६. यं क्रन्द॑सी॒ अव॑सा तस्तभा॒ने अ॒भ्यैक्षे॑तां॒ मन॑सा॒ रेज॑माने।

यत्राधि॒ सूर॒ उदि॑तो वि॒भाति॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठः यम्। क्रन्द॑सी इति॑। अव॑सा। त॒स्त॒भा॒ने इति॑। अ॒भि। ऐक्षे॑ताम्। मन॑सा। रेज॑मा॒ने इति॑। यत्र॑। अधि॑। सूरः॑। उत्ऽइ॑तः। वि॒ऽभाति॑। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॒॥६॥

अन्वय–अवसा तस्तभाने रेजमाने क्रन्दसी यम् मनसा अभ्यैक्षेताम्, यत्र अधि सूरः उदितः विभाति, कस्मै देवाय हविषा विधेम।

सायण–क्रन्दितवान् रोदितवाननयोः प्रजापतिरिति क्रन्दसी द्यावापृथिव्यौ। श्रूयते हि। यदरोरीत्तदनयो रोदस्त्वम् (तै० ब्रा० २.२.९.४) इति ते अवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं प्रजापतिना सृष्टे लब्धस्थैर्ये सत्यौ यं प्रजापतिं मनसा बुद्ध्याभ्यैक्षेताम् आवयोर्महत्त्वमनेन इत्यभ्यपश्येताम्। ईक्ष दर्शने। लङ्यडादित्वादाद्युदात्तत्वम्। कीदृश्यौ द्यावापृथिव्यौ रेजमाने राजमाने दीप्यमाने। यत्राधि यस्मिन्नाधारभूते प्रजापतौ सूरः सूर्यः उदितः उदयं प्राप्तः सन् विभाति प्रकाशते। तस्मै कस्मा इत्यादि सुज्ञानम्।

शब्दार्थ–**क्रन्दसी**=द्युलोक। **अवसा**=रक्षा करने के हेतु से। **तस्तभाने**=स्थिर किये गये हैं। **ऐक्षेताम्**=देखते हैं। **रेजमाने**=प्रकाशमान होते हुये। **सूरः**=सूर्य। **विभाति**=शोभायमान होता है।

हिन्दी अनुवाद–संसार की रक्षा करने के हेतु से निर्माण करने के लिये स्थिर किये गये और प्रकाशमान होते हुये द्युलोक और पृथिवी लोक जिस हिरण्यगर्भ प्रजापति को अपने मन से देखते हैं, अर्थात् हमारी महिमा उसी से है इस प्रकार देखते हैं, जिस प्रजापति को आधार बना कर सूर्य उदय होकर प्रकाशित होता है, सुखस्वरूप या 'क' संज्ञक दिव्य गुण सम्पन्न उस प्रजापति का हम हवि के द्वारा पूजन करते हैं।

व्याकरण–

अवसा–अव्+असुन=अवस्। तृतीया का एकवचन।

क्रन्दसी–क्रन्द्+असुन=क्रन्दस्। स्त्रीलिंग में प्रथमा का एकवचन।

अवसा–अव्+असुन=अवस। तृतीया का एकवचन।

तस्तभने–स्तम्भ्+कानच्+टाप्=तस्तभाना। प्रथमा का द्विवचन।

रेजमाने–राज्+कानच्+टाप्=रेजमाना। 'फणाञ्च सप्तानाम्' नियम से एत्व और अभ्यास का लोप।

अभ्यैक्षेताम्–अभि+ईस् धातु, लङ् लकार, प्रथम पुरुष, द्विवचन।

उदितः–उत्+इ+क्त=उदितः।

विशेष–द्युलोक और पृथिवी लोक के द्वारा प्रजापति ने क्रन्दन किया था, अतः इसको 'क्रन्दसी' कहा जाता है। मैक्समूलर का मत है कि यदि 'क्रन्दसी' को हटा कर 'रोदसी' पाठ कर दिया जावे तो अर्थ अधिक स्पष्ट होगा, जैसा कि अथर्ववेद के ४.२.३ मन्त्र में है।

सायण से 'अयसा' का अर्थ 'रक्षा के लिए' किया है, परन्तु उव्वट और

महिधर ने इसका अर्थ 'हविष् रूप अन्न से' किया है। 'रेजमाने' का अर्थ सायण ने 'दीप्यमान', महीधर ने 'शोभित होते हुये और उव्वट ने 'कांपती हुई' किया है।

७. आपो॑ ह॒ यद्बृ॑ह॒तीर्विश्व॒माय॒न्गर्भं॒ दधा॑ना ज॒नय॑न्तीर॒ग्निम्।
ततो॑ दे॒वाना॒ं सम॑वर्त॒तासु॒रेकः॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

पद-पाठः आपः॑। ह॒। यत्। बृ॒ह॒तीः। विश्व॑म्। आय॑न्। गर्भ॑म्। दधा॑नाः। ज॒नय॑न्तीः। अ॒ग्निम्। ततः॑। देवाना॑म्। सम्। अ॒वर्त॒त। असुः॑। एकः॑। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॥७॥

अन्वय–यत् गर्भम् दधानाः अग्निम् जनयन्तीः बृहतीः आपः ह विश्वम् आयन्, ततः देवानाम् एकः असुः समवर्तत। कस्मै देवाय हविषा विधेम।

सायण–बृहतीः बृहत्यो महत्यः। अग्निम्। उपलक्षणमेतत्। अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयन्तीः जनयन्त्यः तदर्थं गर्भं हिरण्मयाण्डस्य गर्भभूतं प्रजापतिं दधानाः धारयन्त्य आपो ह आप एव विश्वमायन् सर्वं जगद् व्याप्नुवन्। यत् यं गर्भं दधाना आपो विश्वात्मनावस्थिताः ततो गर्भभूतात्प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत। अथवा। लिङ्गवचनयोः व्यत्ययः। उक्तलक्षणा या आपः विश्वमावृत्य स्थिताः ततस्ताभ्योऽद्भ्यः सकाशादेकोऽद्वितीयो असुः प्राणात्मकः प्रजापतिः समवर्तत निश्चक्राम। कस्मै कस्मा इत्यादि गतम्।

शब्दार्थ–आपः=जलों ने। **बृहतीः**=महान्। **आयन्**=व्याप्त किया हुआ था। **गर्भम्**=हिरण्यगर्भ रूप प्रजापति को। **जनयन्तीः**= उत्पन्न करते हुये। **देवानाम्**=देवाताओं का, इन्द्रियों का। **समवर्तत**=उत्पन्न हुआ। **असुः**=प्राणभूत वायु।

हिन्दी अनुवाद–जिस हिरण्यगर्भ रूप प्रजापति को गर्भ के रूप में धारण करते हुये, अग्नि को (अग्नि के उपलक्षण से आकाश, वायु, अग्नि, जल, पृथिवी इन पञ्च महाभूतों को ग्रहण किया जाता है) उत्पन्न करते हुये महान् जलों ने निश्चय ही सृष्टि के प्रारम्भ में सम्पूर्ण विश्व को व्याप्त किया हुआ था, इसके बाद देवताओं (इन्द्रियों) का एक प्राणभूत वायु उत्पन्न हुआ। सुख स्वरूप अथवा 'क' संज्ञक उस हिरण्यगर्भ प्रजापति का हम हवि द्वारा पूजन करते हैं।

व्याकरण–

बृहतीः–'बृहती' शब्द प्रथमा विभक्ति का बहुवचन। वैदिक रूप है। लोक में 'बृहत्यः' रूप होगा।

दधानाः–धा+शानच्+टाप्=दधाना।

जनयन्ती–णिजन्त जन् धातु+शतृ+ङीप्=जनयन्ती।

आयन्–'इण् गतौ' धातु, लङ् लकार, प्रथम पुरुष बहुवचन।

विशेष–पीटर्सन ने 'गर्भ'का अर्थ 'बीज' किया है। इस मन्त्र के तीसरे पाद में दो वर्ण अधिक हैं, जिससे छन्द की शिथिलता प्रकट होती है।

८. यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम॥

पद-पाठः यः। चित्। आपः। महिना। परिऽअपश्यत्।
दक्षम्। दधानाः। जनयन्तीः। यज्ञम्।
यः। देवेषु। अधि। देवः। एकः। आसीत्।
कस्मै। देवाय। हविषा। विधेम॥८॥

अन्वय–यः चित् यज्ञम् जनयन्तीः दक्षम्ः आपः महिना पर्यपश्यत् यः देवेष्वधि एकः देवः आसीत् कस्मै देवाय हविषा विधेम।

सायण–यज्ञं यज्ञोपलक्षितं विकारजातं जनयन्तीः उत्पादयन्ती तदर्थं दक्षं प्रपञ्चात्मना बर्धिष्णुं प्रजापतिमात्मनि दधाना धारयित्रीः। ईदृशीरापः व्यत्ययेन प्रथमा। आपः प्रलयकालीना महिना महिम्ना। छान्दसो मलोपः। स्वमाहात्म्येन यश्च प्रजापतिः पर्यपश्यत् परितो दृष्टवान्। यश्च देवेष्वधि देवेषु मध्ये देवः तेषामपीश्वरः सन् एकः अद्वितीयः आसीत् भवति। तस्मै कस्मा इत्यादि गतम्।

शब्दार्थ–**महिना**=महिमा से। **पर्यपश्यत्**=देखता है। **दक्षम्**=दक्ष प्रजापति को। **दधानाः**=धारण करते हुये। **जनयन्तीः**=उत्पन्न करते हुये। **देवेषु अधि**=देवताओं के बीच में।

हिन्दी अनुवाद–जो हिरण्यगर्भ प्रजापति सृष्टि उत्पत्ति रूप यज्ञ को उत्पन्न करने वाले और सृष्टि उत्पत्ति में दक्ष प्रजापति को धारण करने वाले जलों को अपनी महिमा से देखता है, और जो सभी देवताओं के मध्य में उनका स्वामी अद्वितीय देव है, सुख स्वरूप अथवा 'क' संज्ञक उस प्रजापति का हम हवि के द्वारा पूजन करते हैं।

व्याकरण–

आपः–यहां द्वितीया के अर्थ में प्रथमा हुई है। 'अपः' अर्थ होता है।

आसीत्–वर्तमानकाल में लङ्लकार है।

विशेष–सृष्टि के आदि में जल रूप ही था, ऐसा अनेक स्थानों पर लिखा मिलता है। ऋग्वेद के १०।१२९।३ में लिखा है कि सृष्टि के प्रारम्भ में सब समुद्र

सदृश था, जिसमें प्रकाश नहीं था।

'दक्ष' का अर्थ सायण ने 'प्रपञ्च रूप से वृद्धि करने वाले प्रजापति', महीधर ने 'कुशल प्रजापति' और पीटर्सन ने 'शक्ति या बल' किया हैं। 'यज्ञ' का अर्थ सायण 'यज्ञ से उपलक्षितं विकार समूह', महीधर ने 'सृष्टि यज्ञ' और पीटर्सन ने 'यज्ञ' किया है।

ग्रासमान के अनुसार तीसरे पाद में से 'एक' पद को हटा देना चाहिये, क्योंकि 'मैत्रायणी संहिता' में ऐसा ही पाठ है।

९. **मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।**

यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम।।

पद-पाठः मा। नः। हिंसीत। जनिता। यः पृथिव्याः।

यः। वा। दिवम्। सत्यऽधर्मा। जजान।

यः। च। अपः। चन्द्राः। बृहतीः। जजान।

कस्मै। देवाय। हविषा। विधेम।।९।।

अन्वय—नः मा हिंसीत् यः पृथिव्याः जनिता, यः वा सत्यधर्मा दिवम् जजान यः च चन्द्राः बृहतीः अपः जजान कस्मै देवाय हविषा विधेम।

सायण—स प्रजापतिः नोऽस्मान् मा हिंसीत् मा बाधताम्। यः पृथिव्याः भूमेः जनिता जनयिता स्रष्टा। यो वा यश्च सत्यधर्मा सत्यमवितथं धर्मः जगतो धारणं यस्य तादृशः प्रजापतिर्दिवमन्तरिक्षोपलक्षितान्सर्वांल्लोकान् जजान जनयामास। यश्च बृहतीः महती चन्द्राः आह्लादिनीः अपः उदकानि जजान जनयामास। तस्मै कस्मा इत्यादि गतम्।

शब्दार्थ—भा हिंसीत्=हिंसा न करे। **जनिता**=उत्पन्न करने वाला। **दिवम्**=द्युलोक को। **सत्यधर्मा**=सत्य नियमों को धारण करते हुये, वास्तविक धारण क्षमता से युक्त। **चन्द्राः**=आनन्द प्रदान करने वाले। **बृहती**=महान्।

हिन्दी अनुवाद—यह हिरण्यगर्भ प्रजापति हमारी हिंसा न करे, पृथिवी लोक का उत्पन्न करने वाला है और जिसने सत्य नियमों का धारण करते हुये वास्तविक धारण क्षमता से युक्त होकर द्युलोक को उत्पन्न किया था और जिसने आनन्द प्रदान करने वाले महान् जलों को उत्पन्न किया। सुख स्वरूप अथवा 'क' संज्ञक उस प्रजापति का हम हवि द्वारा पूजन करते हैं।

व्याकरण—

हिंसीत्—'हिंस्' धातु, लुङ् लकार प्रथम पुरुष, एकवचन। ''न माङ्योगे'' सूत्र

से 'म' के योग में 'अट' का अभाव।

जनिता–जन्+णिच्+तृच्। 'इट्' का आगम 'जनिता मन्त्रे' नियम से 'णिच्' का लोप=जनितृ। प्रथमा विभक्ति का एकवचन। लोक में 'जनयिता' रूप होगा।

सत्यधर्मा–सत्यः धर्मः यस्य सः। बहुब्रीहि समास। सत्य+धर्म+अनिच्= सत्यधर्मन्। प्रथमा का एकवचन।

चन्द्राः–'चदि आह्लादे' धातु से 'अच्' और 'नुम्' का आगम स्त्रीलिंग में चन्द्रा। द्वितीया का बहुवचन।

जजान–णिजन्त जन् धातु लिट् लकार, प्रथम पुरुष, एकवचन।

विशेष–'सत्यधर्मा' का अर्थ सायण ने 'जगत्' को धारण करने वाले रूप सत्य धर्म वाला, उव्वट ने 'सत्य का धारक', महीधर ने 'सत्य को धारण करने या कराने वाला', और पीटर्सन ने 'सच्चा और विश्वस्त' किया है। आपश्चन्द्राः का अर्थ सायण के अनुसार 'आह्लादक जल', उव्वट के अनुसार 'मनुष्य और काम्य जल', महीधर के अनुसार 'जगत् के कारण आह्लादक जल' और पीटर्सन के अनुसार दैदीप्यमान जल' है।

१०. प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।।

पद-पाठः प्रजापते। न। त्वदेतान्यन्यो। विश्वा। जातानि। परि। ता। बभूव।
यत्कामास्ते। जुहुमस्तन्नो। अस्तु। वयं। स्याम। पतयो। रयीणाम्।१०।।

अन्वय–प्रजापते! त्वत् अन्यः एतानि विश्वा जातानि ता न परिबभूव। यत् कामाः ते जुहुमः तत् नः अस्तु। वयम् रयीणाम् पतयः स्याम।

सायण–हे प्रजापते। त्वत् त्वत्तोऽन्यः कश्चित् एतानि इदानीं वर्तमानानि विश्वा विश्वानि। सर्वाणि जातानि प्रथमविकारभाञ्जि ता तानि सर्वाणि भूतजातानि न परिबभूव न परिगृह्णाति। न व्याप्नोति। त्वमेवैतानि परिगृह्य स्त्रष्टुं शक्नोषीति भावः। परिपूर्वो भवति परिग्रहार्थः। वयं च यत्कामाः यत्फलं कामयमानाः ते तुभ्यं जुहुमः हवींषि प्रचच्छामः। तत्फलं नोऽस्माकमस्तु भवतु। तथा वयं च रयीणां धनानां पतयः ईश्वराः स्याम भवेम।

शब्दार्थ–प्रजापते=हिरण्यगर्भ रूप प्रजापते। **विश्वा जातानि**=सम्पूर्ण उत्पन्न हुये पदार्थों को। **परिबभूव**=व्याप्त किये हुये है। **यत्कामाः**=जिस फल की कामना करते हुये। **जुहुमः**=आहुति देते हैं। **पतयः**=स्वामी। **रयीणाम्**=ऐश्वर्यों के।

हिन्दी अनुवाद–हे हिरण्यगर्भ प्रजापति! तुम्हारे अतिरिक्त दूसरा कोई भी इन

विद्यमान सम्पूर्ण उत्पन्न हुए पदार्थों को और उन सारे भूतकालीन पदार्थों को व्याप्त किये हुये नहीं है। अर्थात् तुम ही इन सबको व्याप्त करते हो। जिस फल की कामना करते हुये हम तुम्हारे लिये आहुतियां देते हैं, वह फल हमें प्राप्त हो। हम ऐश्वर्यों के स्वामी होवें।

व्याकरण–

विश्वा, ता–वैदिक रूप हैं। विभक्ति का लोप हुआ है। लोक में विश्वानि और तानि रूप बनते हैं।

जातानि–जन्+क्त=जात। नपुंसकलिङ्ग में द्वितीया का बहुवचन।

जुहुमः–हु धातु, लट् लकार, उत्तम पुरुष, बहुवचन।

विशेष–'परिबभूव' का अर्थ सायण ने 'परिग्रहण करके सृष्टि की रचना करने में समर्थ है या व्याप्त किये हुये है, उव्वट ने 'होता है' और पीटर्सन ने 'शासन करता है' किया है। 'जुहुमः' का अर्थ सायण के अनुसार 'हवि प्रदान करते हैं' तथा पीटर्सन के अनुसार 'पुकारते हैं'।

ऋग्वेद में छः मन्त्र ऐसे हैं जिनके पद-पाठ और संहिता-पाठ एक से हैं। इनमें से एक मन्त्र यह है। संहिता-पाठ और पद पाठ एक होने से कुछ समालोचकों का यह विचार है कि इस मन्त्र को पद-पाठ का प्रचलन होने के बाद जोड़ा गया है।

छन्द को पूरा करने के लिये 'त्वदेतान्यन्यो' को 'त्वदेतानि अन्यो' और 'स्याम' को 'सियाम' के रूप में पढ़ना चाहिये।

वाक् सूक्त

(मण्डल-१०, सूक्त-१२५)

ऋषि-वाक् **देवता**-परमात्मा छन्दः-दूसरे मन्त्र में जगती और सबमें त्रिष्टुप्।

१. अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहविश्वनोभा॥

पद-पाठः अहम्। रुद्रेभिः। वसुऽभिः। चरामि। अहम्। आदित्यैः। उत। विश्वऽदेवैः। अहम्। मित्रावरुणा। उभा। बिभर्मि। अहम्। इन्द्राग्नी इति अहम्। अश्विना। उभा॥१॥

अन्वय–अहम् रुद्रेभिः चरामि वसुभिः। अहम् आदित्यैः उत विश्वदेवैः। अहम्

मित्रावरुणा उभा बिभर्मि। अहम् इन्द्राग्नी अहम् उभा अश्विना।

सायण–अहं सूक्तस्य द्रष्ट्री वागाम्भृणी यद् ब्रह्म जगत्कारणं तद्रूपा भवन्ती **रुद्रेभी** रुद्रैरेकादशभिः। इत्थं भावे तृतीया। तदात्मना चरामि। एवं वसुभिरित्यादौ तत्तदात्मना चरामीति योज्यम्। तथा मित्रावरुणा मित्रं च वरुणं च उभा-उभौ अहमेव ब्रह्मीभूता बिभर्मि धारयामि। इन्द्राग्नी अप्यहमेव धारयामि। उभा उभौ अश्विना अश्विनौ अप्यहमेव धारयामि। मयि हि सर्वं जगच्छुक्तौ रजतमिवाध्यस्तं संदृश्यते। माया च जगदाकारेण विवर्तते। तददृश्यमायाया आधारत्वेन असङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योत्पत्तिः।

शब्दार्थ–**रुद्रेभिः**=ग्यारह रुद्रों के रूप में। **वसुभिः**=आठ वसुओं के रूप में। **चरामि**=विचरण करती हूँ। **आदित्यैः**=बारह आदित्यों के रूप में। **विभर्मि**=धारण करती हूँ।

हिन्दी अनुवाद--जगत् के कारण रूप ब्रह्म के साथ तादात्म्य का अनुभव करती हुई अम्भृण ऋषि की पुत्री मैं वाक् ग्यारह रुद्रों के रूप में विचरण करती हूँ, मैं आठ वसुओं के रूप में विचरण करती हूँ। मैं बारह आदित्यों के रूप में और विश्वदेवों के रूप में विचरण करती हूँ। मैं इन्द्र और अग्नि को धारण काती हूँ और दोनों अश्विनी देवताओं को धारण करती हूँ।

व्याकरण–

रुद्रेभिः–तृतीया का बहुवचन वैदिक रूप है। लोक में 'रुद्रैः' रूप होगा।

मित्रावरुणा, उभा, अश्विना–द्वितीया विभक्ति के द्विवचन में वैदिक रूप हैं। विभक्ति के स्थान पर 'आ' हुआ है। लोक में मित्रावरुणौ, उभौ और अश्विनौ रूप बनेंगे।

बिभर्मि–भृ धातु, लट् लकार, उत्तम पुरुष, एकवचन।

विशेष–इस सूक्त में वाक् या वाणी की महत्ता का वर्णन किया गया है। अभिव्यक्ति का प्रमुख साधन वाणी है। इस सूक्त को इस प्रकार कहा गया है कि वाक् स्वयं को ब्रह्म रूप में प्रतिपादित करके अपनी महत्ता का वर्णन कर रही है। यह हो सकता है कि इस सूक्त का ऋषि कोई और हो और उसने वाणी पर ऋषित्व का आरोप किया हो।

प्राचीन भाष्यकारों के अनुसार, जैसा कि सायण ने लिखा है, महर्षि अम्भृण की पुत्री वाक् ब्रह्मविद्या में निष्णात थी। सच्चिदानन्द स्वरूप ब्रह्म या परमात्मा से तादात्म्य का अनुभव करती हुई उसने अपनी इस प्रकार स्तुति की है कि वह ही सम्पूर्ण जगत् की अधिष्ठान रूप से स्वामिनी है।

छन्द के अनुरोध से 'चराम्यहम्' को 'चरामि अहम्' और 'बिभर्म्यहम्' को 'बिभर्मि अहम्' पढ़ना चाहिए।

२. अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते॥

पद-पाठः अहम्। सोमम्। आहनसम् बिभर्मि। अहम्। त्वष्टारम्। उत। पूषणम्। भगम्। अहम्। दधामि। द्रविणम्। हविष्मते। सुप्रऽअव्यै। यजमानाय। सुन्वते॥२॥

अन्वय–आहनसम् सोमम् अहम् बिभर्मि। अहम् त्वष्टारम्, पूषणम् उत भगम्। अहम् हविष्मते सुप्राव्ये सुन्वते यजमानाय द्रविणम् दधामि।

सायण–आहनसमाहन्तव्यमभिषोत्वयं सोमं यद्वा शत्रूणामाहन्तारं दिवि वर्तमानं देवतात्मानं सोममहमेव बिभर्मि। तथा त्वष्टारमुत अपि च पूषणं भगं च अहमेव बिभर्मि। तथा हविष्यते हविर्भियुक्ताय सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे तर्पयित्रे सुन्वते सोमाभिषवं कुर्वते। ईदृशाय यजमानाय द्रविणं धनं यागफलरूपमहमेव दधामि। एतच्च ब्रह्मणः फलदातृत्वं फलमत उपपत्तेरित्यधिकरणे भगवता भाष्यकारणे समर्थितम्।

शब्दार्थ–सोमम्=सोम रस को, सोम देवता को। **आहनसम्**=कूट पीस कर अभिषवन करने योग्य, शत्रुओं का वध करने वाले। **त्वष्टारम्**=निर्माण करने वाले देवता को। **पूषणम्**=पोषण करने वाले सूर्य देवता को। **भगम्**=ऐश्वर्य के देवता भग को। **द्रविणम्**=यज्ञ के फल रूप धन को। **हविष्मते**=हवि से युक्त, हवि प्रदान करने वाले। **सुप्राव्ये**=देवताओं के लिये सुन्दर हवि पहुंचाने वाले। **सुन्वते**=सोम का अभिषव करने वाले।

हिन्दी अनुवाद–कूट पीस कर अभिषवन (निचोड़ने) योग्य सोम रस को अथवा शत्रुओं का वध करने वाले द्युलोक में विद्यमान सोम देवता को मैं ही धारण करती हूं। मैं त्वष्टा (निर्माण करने वाला देवता), पूषा (पोषण करने वाला सूर्य देवता और भग (भग नामक ऐश्वर्य का देवता या ऐश्वर्य) के लिये सुन्दर हवि पहुंचाने वाले और सोम का अभिषव करने वाले यजमान के लिये यज्ञ के फल रूप धन को धारण करती हूं।

व्याकरण– आहनसम्–आ+हन् धातु से वैदिक असुन (अस्) प्रत्यय=आहनस्। द्वितीया विभक्ति का एकवचन।

त्वष्टारम्–त्वक्ष्+तृच्=त्वष्टृ। द्वितीया विभक्ति का एकवचन।

हविष्मते–हविष्+मतुप्=हविष्मत्। चतुर्थी विभक्ति का एकवचन।

सप्राव्ये–सु+प्र+अव् धातु से "अवितृस्तृतन्त्रिभ्यः' उणादि सूत्र से 'ई' प्रत्यय=**सुप्रावी**। चतुर्थी विभक्ति का एकवचन।

सुन्वते–सू+(श्नु)+शतृ=सुन्वत्। चतुर्थी का एकवचन।

विशेष–'आहनसम्' शब्द का प्रयोग ऋग्वेद में अनेक स्थानों पर किया गया है। इसका अर्थ प्रायः 'मारने वाला' किया गया है। सोमलता को कूटकर, पीटकर और निचोड़ कर सोमरस निकाला जाता है। अतः उस अर्थ में 'आहनस्' पद का प्रयोग हो सकता हैं। तथापि सायण ने इसका अर्थ 'आहन्तारम्' भी किया है। यह अर्थ पश्चिमी विद्वानों को भी स्वीकार है।

'सुप्रावी' का अर्थ सायण ने 'देवताओं क लिये हवि पहुंचाने वाला', पीटर्सन ने 'धार्मिक' और रॉथ ने 'बहुत सतर्क, उत्साही' (very attentive, zealous) किया है।

छन्द के अनुरोध से 'बिभर्म्यहम्' को 'बिभर्मि अहम् और 'सुप्राव्ये' को 'सुप्राविये' पढ़ना चाहिये। इस प्रकार पाठ करने पर प्रथम पाद में एक वर्ण की कमी बनी रहती है।

३. **अ॒हं रा॒ष्ट्री॑ सं॒गम॑नी॒ वसू॑नां चिकि॒तुषी॑ प्रथ॒मा य॒ज्ञिया॑नाम्।**
तां मा॑ दे॒वा व्य॑दधुः पुरु॒त्रा भूरि॑स्थात्रां॒ भूर्या॑वे॒शय॑न्तीम्॥

पद-पाठः अ॒हम्। रा॒ष्ट्री॑। स॒म्ऽगम॑नी। वसू॑नाम्। चि॒कि॒तुषी॑। प्र॒थ॒मा। य॒ज्ञिया॑नाम्।
ताम्। मा॒। दे॒वाः। वि। अ॒द॒धुः। पु॒रु॒ऽत्रा। भूरि॑ऽस्थात्राम्। भूरि॑। आ॒ऽवे॒शय॑न्तीम्॥३॥

अन्वय–अहम् राष्ट्री वसूनाम् संगमनी चिकितुषी यज्ञियानाम् प्रथमा। ताम् भूरिस्थात्राम् भूरि आवेशयन्तीम्। मा देवा पुरुत्रा व्यदधुः।

सायण–अहं राष्ट्री ईश्वरनामैतत्। सर्वस्य जगत् ईश्वरीं। तथा वसूनां। धनानां संगमयित्री उपासकानां प्रापयित्री। चिकितुषी यत्साक्षात्कर्तव्यं परं ब्रह्म तज्ज्ञानवती स्वात्मतया साक्षात्कृतवती। अत एव यज्ञियानां यज्ञार्हाणां प्रथमा मुख्या। या एवं गुणविशिष्टाऽहं तां मां भूरिस्थात्रां बहुभावेन प्रपञ्चात्मनावतिष्ठमानम् भूरि भूरीणि बहूनि भूतजातानि आवेशयन्तीं जीवभावेन आत्मानं प्रवेशयन्तीं ईदृशीं मां पुरुत्रा बहुषु देशेषु व्यदधुः देवा विदधाति कुर्वन्ति। उक्तप्रकारेण वैश्वरूप्येणावस्थानात्। यद्यत्कुर्वन्ति तत्सर्वं मामेव कुर्वन्तीत्यर्थः।

शब्दार्थ–राष्ट्री=जगत् की ईश्वरी। **संगमनी**=प्राप्त कराने वाली। **वसूनाम्**=धनों की। **चिकितुषी**=ज्ञान से सम्पन्न, ब्रह्म को जानने वाली। **प्रथमा**=सबसे प्रमुख। **यज्ञियानाम्**=यजन करने योग्य व्यक्तियों में। **व्यदधुः**=रखा है। **पुरुत्रा**=विभिन्न स्थानों

में। **भूरिस्थात्राम्**=अनेक रूपों में अवस्थित। **भूर्यावेशवन्तीम्**=बहुत सी वस्तुओं को अपने अन्दर आवेशित करने वाली।

हिन्दी अनुवाद—मैं सम्पूर्ण जगत् की ईश्वरी हूं, धनों को प्राप्त कराने वाली हूं, खोज करने वाली, ज्ञान से सम्पन्न या ब्रह्म को जानने वाली हूं, और यजन करने योग्य व्यक्तियों को अपने अन्दर आवेशित करने वाली मुझको देवताओं ने विभिन्न स्थानों में रखा है। अर्थात् भिन्न देवताओं की जो पूजा की जाती है, वह वस्तुतः मेरी ही पूजा है।

व्याकरण—

राष्ट्री—राजते अर्थ में राज् दीप्तौ+ष्ट्रन् (उणादि ४.१५९)= राष्ट्र। 'राष्ट्र' शब्द से मतुप् अर्थ में इनि। स्त्रीलिंग में राष्ट्री।

संगमनी—सम्+गम्+ल्युट् (अन)+ ङीप्।

चिकितुषी—कित्+क्वसु+ङीप्।

यज्ञियानाम्—यज्ञम् अर्हति अर्थ में यज्ञ+घ (इय)=यज्ञिय।

व्यदधुः—वि+धा धातु लङ्लकार, प्रथम पुरुष, बहुवचन।

पुरुषा—पुरु+त्रल्+टाप्=पुरुत्रा।

भूरिस्थात्राम्—भूरि+स्था+तृच+टाप्। लोक में 'ङीप्' होकर 'भूरिस्थात्री' रूप होगा।

भूर्यविशयन्तीम्—भूरि+आ+णिजन्त विश् धातु+शतृ+ङीप्।

विशेष—रॉथ, ग्रासमान और लुडविग ने 'चिकितुषी प्रथमा यज्ञियानाम' का अर्थ 'देवताओं को सबसे पहले जानने वाली' (The first to know the gods) किया है।

छन्द के अनुरोध से 'व्यदधुः' को 'वि अदधुः' और 'भूर्यावेशयन्तीम्' को 'भूरि आवेशयन्तीम्' पढ़ना चाहिये।

४. मया सो अन्नमत्ति यो विपश्यति य प्राणिति य ईं शृणोत्युक्तम्।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि।।

पद-पाठः मया। सः। अन्नम्। अत्ति। यः। विऽपश्यति। यः। प्राणिति। यः। ईम्। शृणोति। उक्तम्। अमन्तवः। माम्। ते। उप। क्षियन्ति। श्रुधि। श्रुत। श्रद्धिऽवम्। ते। वदामि।।४।।

अन्वय–यः अन्नम् अत्ति यः मया, यः विपश्यति, यः प्राणिति, यः ईम् उक्तम् शृणोति। ये माम् अमन्तवः उपक्षियन्ति। श्रुत! श्रुधि। श्रद्धिवम् ते वदामि।

सायण–योऽन्नमत्ति स भोक्तृशक्तिरूपया मयैवान्नमत्ति। यश्च विपश्यति आलोकयतीत्यर्थः। यश्च प्राणिति श्वासोच्छ्वासरूपं व्यापारं करोति सोऽपि मयैव। यश्चोक्तं शृणोति। य ईदृशीमन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः अमन्यमानाः अजानन्तः उपक्षियन्ति उपक्षीणाः संसोरण हीनाः भवन्ति। मामन्तवः मद्विषयज्ञानरहिता इत्यर्थः। हे श्रुत विश्रुत सखे श्रुधि मया वक्ष्यमाणं शृणु। किं तच्छ्रोतव्यम् श्रद्धिवम्। श्रद्धिः श्रद्धा तया युक्तम्। श्रद्धायत्नेन लभ्यमित्यर्थः। ईदृशं ब्रह्मात्मकं वस्तु के तुभ्यं वदामि उपदिशामि।

शब्दार्थ–**अन्नम् अत्ति**=अन्न को खाता है, सांसारिक भोगों को भोगता है। **प्राणिति**=श्वास लेता है। **अमन्तवः**=न मानने वाले, न जानने वाले। **उपक्षियन्ति**=हीनता को प्राप्त होते हैं। **श्रुधि**=सुनो। **श्रुत**=विद्वान्। **श्रद्धिवम्**=श्रद्धा से प्राप्त होने योग्य वचन को।

हिन्दी अनुवाद–इस जगत् में जो भी व्यक्ति अन्न को खाता है, अर्थात् सांसारिक भोगों को भोगता है, वह मेरे द्वारा ही अन्न का भोग करता है, जो देखता है, वह मेरे द्वारा ही देखता है, जो श्वास लेता है, वह मेरे द्वारा लेता है और जो भी कहे गये वचन को सुनता है, वह मेरे द्वारा सुनता है। जो व्यक्ति इस प्रकार से अन्तर्यामी रूप से अवस्थित मुझको नहीं जानते या मानते, वे संसार में हीनता को प्राप्त होते हैं। हे विद्वान् मित्र! सुनो श्रद्धा से प्राप्त होने योग्य वचन का मैं उपदेश देती हूं।

व्याकरण–

प्राणिति–प्र+अन् धातु, लट् लकार, प्रथम पुरुष, एकवचन।

अत्ति–अद् धातु, लट् लकार, प्रथम पुरुष, एकवचन।

अमन्तकः–न+मेन् धातु से औणदिक 'तु' प्रत्यय=अमन्तु। प्रथमा विभक्ति का बहुवचन।

श्रुधि–'श्रु' धातु, लोट् लकार, मध्यम पुरुष, एकवचन। वैदिक रूप।

क्षियन्ति–क्षि धातु, लट् लकार, प्रथम पुरुष, बहुवचन।

श्रद्धिवम्–श्रत् सत्यं दधाति अर्थ में श्रत्+धा+कि=श्रद्धिः अस्य अस्ति अर्थ में प्रत्यय=श्रद्धिव।

विशेष–सायण के अर्थ को स्वीकार करते हुये भी पाश्चात्य विद्वानों ने अन्वय दूसरी प्रकार से करके यह अर्थ किया है-जो देखता है, जो श्वास लेता है और जो सुनता है, वह मेरे द्वारा अन्न को खाता है।

लुडविग, रॉथ ग्रासमान ने 'श्रुत' पद को सायण के समान सम्बोधन न मानकर लोट् लकार, मध्यम पुरुष का एकवचन माना। इसके साथ ही उन्होंने कहा कि 'श्रुतिश्रद्धिवम्' को एक पद मानकर इसमें कर्मधारय समास मानना चाहिये और 'श्रुतं च तद् श्रद्धिवं च तत्' इस प्रकार व्याख्या करनी चाहिये। इस प्रकार इस पद का अर्थ होगा-जो प्राचीन परम्परा श्रुत और श्रद्धा के योग्य है (What old tradition bids believe)।

छन्द के अनुरोध से 'सो अन्नम्' को 'सोऽन्नम्' और 'शृणोत्युक्तक्' को शृणीति उक्तम्' पढ़ना चाहिये।

५. **अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।**
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥

पद-पाठः अहम्। एव। स्वयम्। इदम। वदामि। जुष्टम्। देवेभिः। उतः। मानुषेभिः। यम्। कामयै।तम्ऽतम्। उग्रम्। कृणोमि। तम्। ब्रह्माणम्। तम्। ऋषिम्। तम्। सुऽमेधाम्॥५॥

अन्वय-अहम् स्वयम् एव देवेभिः उत मानुषेभिः जुष्टम् इदम् वदामि। यम् कामये तम् तम् उग्रम् कृणोमि। तम् ब्रह्माणं, तम् ऋषिम् तम् सुमेधाम्।

सायण-अहं स्वयमेवेदं वस्तुं ब्रह्मात्मकं वदामि उपदिशामि। देवेभिः देवैरिन्द्रादिभिरपि जुष्टं सेवितमुत अपि च मानुषेभिः मनुष्यैरपि जुष्ट्म्। ईदृग्वस्त्वात्मिकाहं यं कामये यं पुरुषं रक्षितुमहं वाञ्छामि तं पुरुषमुग्रं कृणोमि। सर्वेभ्योऽधिकं करोमि। तमेव ब्रह्माणं स्त्रष्टारं करोमि। तमेव ऋषिमतीन्द्रियार्थदर्शिनं करोमि। तमेव सुमेधां शोभनप्रज्ञं च करोमि।

शब्दार्थ-जुष्टम्=सेवित। **कामये**=चाहती हूं। **उग्रम्**=प्रचण्ड, सर्वश्रेष्ठ। **ब्रह्माणम्**=सृष्टि की रचना करने वाला ब्रह्मा। **ऋषिम्**=भूत-भविष्य का द्रष्टा ऋषि। **सुमेधाम्**=उत्तम बुद्धि वाला।

हिन्दी अनुवाद-मैं स्वयं ही इन्द्र आदि देवताओं के द्वारा और मनुष्यों के द्वारा सेवित इस ब्रह्म का उपदेश करती हूं। मैं जिस पुरुष को चाहती हूं, उस उस को प्रचण्ड या सर्वश्रेष्ठ बना देती हूं। उसको मैं सृष्टि की रचना करने वाला ब्रह्मा, भूत-भविष्य का द्रष्टा ऋषि और उत्तम बुद्धि वाला मनुष्य बना देती हूं।

व्याकरण-

जुष्टम्-जुष्+क्त=जुष्ट।

देवेभिः, मानुषेभिः-वैदिक रूप हैं। लोक में देवैः, मानुषैः रूप होंगे।

कृणोमि-वैदिक रूप है। लोक में 'करोमि' रूप होता है।

सुमेधाम्–वैदिक रूप है। लोक में 'सुमेधसम्' रूप बनेगा।

कामये–कम् धातु, लट् लकार उत्तम पुरुष् एकवचन।

विशेष–ब्रह्मा को सृष्टि की रचना करने की सामर्थ्य वाक् देवी की विशेष कृपा से ही प्राप्त हुई है। उसमें यह सामर्थ्य स्वाभाविक रूप से नही थी। अत: सभी देवता उस देवी की कृपा के इच्छुक रहते हैं। मनुष्यों को भी अप्रत्यक्ष ज्ञान की सामर्थ्य वाक् देवी की कृपा से प्राप्त होती है। उसी की कृपा से वे उत्तम बुद्धिशाली होते हैं।

६. **अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ।**
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश।

पद-पाठः अहम्। रुद्राय। धनुः। आ। तनोमि। ब्रह्मऽद्विषे। शरवे। हन्तवै। ऊं इति।
अहम्। जनाय। सऽमदम्। कृणोमि। अहम्। द्यावापृथिवी इति। आ। विवेश।।६।।

अन्वय–ब्रह्मद्विषे शरवे हन्तवै अहम् रुद्राय धनुः आतनोमि। अहम् जनाय समदम् कृणोमि। अहम् द्यावापृथिवी आविवेश।

सायण–पुरा त्रिपुविजयसमये रुद्राय रुदस्य। षष्ठ्यर्थे चतुर्थी। महादेवस्य धनुश्चापमहमातनोमि ज्यया आततं करोमि। किमर्थम्। ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरनिवासिनमसुरं हन्तवै हन्तु हिसितुम्। उ शब्द: पूरक:। अहमेव समदम्। समानं माद्यत्यस्मिन्निति समत्संग्राम:। स्तोतृजनार्थं शत्रुभि: सह संग्राममहमेव कृणोमि करोमि। तथा द्यावापृथिवी दिवं च पृथिवीं चान्तर्यामितया अहमेवाविवेश प्रविष्टवती।

शब्दार्थ–आतनोमि=प्रत्यञ्चा को चढ़ाती हूं। **ब्रह्मद्विषे**=ब्रह्म, वेदों या ब्राह्मणों से द्वेष करने वाले। **शरवे**=हिंसक असुर के। **हन्तवै**=मारने के लिये। **समदम्**=युद्ध। **कृणोमि**=करती हूं। **आविवेश**=व्याप्त हो रही हूं।

हिन्दी अनुवाद–ब्रह्म से अर्थात् वेदों से या ब्राह्मणों से द्वेश करने वाले हिंसक त्रिपुरनिवासी असुरों को मारने के लिये मैं रुद्र के धनुष की प्रत्यञ्चा को चढ़ाती हूं। अर्थात् रुद्र को मैं यह प्रेरणा देती हूं कि हिंसक असुरों को मारने के लिये वह धनुष पर प्रत्यञ्चा को चढ़ावे। मैं अपने जनों के लिये अर्थात् उनका कल्याण करने के लिए उनके लिये उनके शत्रुओं के साथ युद्ध करती हूं। अर्थात् उनको युद्ध के लिये प्रेरित करती हूं। मैं ही द्यु लोक और पृथिवी लोक में व्याप्त हो रही हूं।

व्याकरण–

रुद्राय–यहां वैदिक व्यत्यय से षष्ठी के अर्थ में चतुर्थी है।

ब्रह्मद्विषे–ब्रह्म देष्टि अर्थ में ब्रह्म+द्विष्+क्विप्। चतुर्थी का एकवचन।

शरवे–'शृ हिंसायाम्' धातु से "शृस्वृस्निहि०" उणादि सूत्र में 'उ' प्रत्यय। शरु। चतुर्थी विभक्ति का एकवचन।

कृणोमि–कृ धातु, लट् लकार, उत्तम पुरुष, एक वचन। वैदिक रूप।

हन्तवै–'हन्' धातु से 'तुमुन' के अर्थ में वैदिक 'तवै' प्रत्यय।

समदम्–समानं माद्यन्ति अस्मिन् अर्थ में स+मद्+क्विप्=समद्। द्वितीया विभक्ति का एकवचन।

विवेश–विश् धातु, लिट् लकार, उत्तम पुरुष, एकवचन।

विशेष–पीटर्सन ने यहां 'ब्रह्म' का अर्थ परमात्मा और 'शरु' का अर्थ बाण किया है। उसके अनुसार यह अर्थ होगा–That his arrow may slain all that hate God.

छन्द के अनुरोध से 'कृणोम्यहम्' को 'कृणोमि अहम्' पढ़ना चाहिये।

७. **अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे।**
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि॥

पद-पाठः अहं सुवे। पितरम्। अस्य। मूर्धन्। मम। योनिः। अप्ऽसु। अन्तरिति। समुद्रे। ततः। वि। तिष्ठे। भुवना। अनु। विश्वा। उत। अमूम्। द्याम्। वर्ष्मणा। उप। स्पृशामि॥७॥

अन्वय–अस्य मूर्धन्। पितरम् अहम् सुवे। समुद्रे अप्सु अन्तः मम योनिः। ततः विश्वा भुवना अनु वितिष्ठे। उत अमूम् द्याम् वर्ष्मणा उपस्पृशामि।

सायण–द्यौ पितेति श्रुतेः, पिता द्यौः। पितरं दिवमहं सुवे प्रसुवे जनयामि। आत्मनः आकाशः संभूत इति श्रुतेः (तै० आ० ८.१) कुत्रेति तदाह। अस्य परमात्मनः मूर्धन् मूर्धनि उपरि। परमाकारणभूते। तस्मिन् हि वियदादिकार्यजातं सर्वं वर्तते तन्तुषु तट इव। मम च योनिः कारणं समुद्रे। समुद्द्रवन्त्यस्माद् भूतजातानीति समुद्रः परमात्मा। तस्मिन्नप्सु व्यापनशीलासु धीवृत्तिष्वन्तर्मध्ये यद् भूतजातान्यनु प्रविश्य वितिष्ठे। यत ईदृग्भूताहमस्मि ततो हेतोर्विश्वा विश्वानि सर्वाणि भूता भूतानि भूतजातान्यनु प्रविश्य वितिष्ठे। विविधं व्याप्य तिष्ठामि। "समप्रविभ्यःस्थः" इत्यात्मनेपदम् (पाणिनि १. ३२२)। उत अपि च अमूं द्यां विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकम्। उपलक्षणमेतत्। एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदीयने देहेन उपस्पृशामि। यद्वा अस्य भूतस्य मूर्धन्मूर्धनि उपरि अहं पितरमाकाशं सुवे। समुद्र जलधौ अप्सु उदकेषु अर्न्मध्ये मम योनिः कारणभूतोऽम्भृणाख्य ऋषिर्वर्तते। यद्वा। समुद्रेऽन्तरिक्षेऽप्सु अम्भयेषु देवशरीरेषु मम कारणभूतं ब्रह्म चैतन्यं वर्तते। ततोऽहं कारणात्मिका सती सर्वाणि

भुवनानि व्याप्नोमि। अन्यत्समानम्।

शब्दार्थ–सुवे=उत्पन्न करती हूं। **पिरम्**=द्युलोक को, आकाश को। **मूर्धन**=शिरोस्थानीय। **योनिः**=कारण रूप है। **अप्सु अन्तः**=व्यापनशील बुद्धियों, जलों में। **समुद्र**=परमात्मा में, समुद्र में। **अनुवितिष्ठे**=विविध रूपों से व्याप्त किये हुये हूं। **भुवना**=भुवनों में, पञ्च महाभूतों में। **विश्वा**=सम्पूर्ण **वर्ष्मणा**=सर्वत्र व्याप्त होने वाले कारणभूत शरीर से। **उपस्पृशामि**=स्पर्श कर रही हूं।

हिन्दी अनुवाद–इस ब्रह्म के शिरः स्थानीय द्यु लोक को अथवा इस ब्रह्म के सिर पर आकाश को मैं उत्पन्नकरती हूं। समुद्र अर्थात् परमात्मा में जो अप् अर्थात् व्यापनशील बुद्धियां हैं, उनमें मेरा ही कारण है। अथवा समुद्रों में, जलों में मैं ही कारण रूप से विद्यमान हूं। अथवा समुद्र अर्थात् अन्तरिक्ष और जलशरीर देवों में कारण हूं। इसलिये सम्पूर्ण भुवनों अर्थात् पञ्चमहाभूतों में प्रविष्ट होकर मैं ही उनको विविध रूप से व्याप्त किये हुये हूं और इस द्युलोक को मैं सर्वत्र व्यापक होते हुये अपने कारणभूत शरीर से स्पर्श कर रही हूं।

व्याकरण–

सुवे–षू (सू) धातु, लट् लकार, उत्तम पुरुष, एकवचन। वैदिक रूप।

तिष्ठे–स्था धातु, लट् लकार, उत्तम पुरुष, एकवचन। वैदिक रूप।

मूर्धन्–सप्तमी/विभक्ति का एकवचन। व्यत्यय से विभक्ति का वैदिक लोप।

वर्ष्मणा–वर्षति ददाति सुख-दुःखे जीवात्मने अर्थ में 'वृषु सेचने' धातु से मनिन् प्रत्यय। वृष=मनिन् (मन)=वर्ष्मन। तृतीया विभक्ति का एकवचन।

विश्वा भुवना–विश्व तथा भुवन शब्द (नपुंसकलिंग) द्वितीया विभक्ति। बहुवचन वैदिक रूप। लोक में विश्वानि और भुवनानि होगा।

विशेष–रॉथ ने 'वर्ष्मणा' की निष्पत्ति उसी प्रकार की है, जसे 'वर्षीयस्' और 'वर्षिष्ठ' की होती है। उसने 'वर्ष्मण' का अर्थ किया है–(१) Height, highest space (२) The crown (of the head)

छन्द से आग्रह से 'अप्स्वन्तः' को 'अप्सु अन्तः' और 'विश्वोता० को 'विश्वा उता' पढ़ना चाहिये।

८. अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव॥

पद-पाठः अहम्। एव। वातःऽइव। प्र। वामि। आऽरभमाणा। भुवनानि। विश्वा।
पुरः। दिवा। पुरः। एना। पृथिव्या। एतावती। महिना। सम्। बभूव॥८॥

अन्वय–अहम्। एव विश्वा भुवनानि आरभमाणा वात इव प्रवामि। दिवा परः एना पृथिव्या परः महिना एतावती संबभूव।

सायण–विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयन्ती अहमेव परेणानधिष्ठिता स्वमेव प्रवामि प्रवर्ते। वात इव। यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत्। उक्तं सर्वं निगमयति। परो दिवा। पर इति सकारान्तं परस्तादित्यर्थे वर्तते यथाध इत्यधस्तादर्थे। यद्योगे च तृतीया सर्वत्र दृश्यते। दिव आकाशस्य परस्तात्। एना पृथिव्या। 'द्वितीयाटौः स्वेन' इतीदम एनादेशः। अस्याः पृथिव्या परः परस्तात्। द्यावापृथिव्योरुपादानमुपलक्षणम्। एतदुपलक्षितात्सर्वस्माद्विकारजातात्पर-स्ताद्वर्तमाना सङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना। महिम्ना एतावती संबभूव। एतच्छब्देनोक्तं सर्वं परामुश्यते। सर्वजगदात्मनाहं संभूतास्मि। महिना इत्यत्र महच्छब्दादिमनिचि टेरिति टि लोपः। छान्दसो मकारलोपः।

शब्दार्थ–**वात इव**=वायु के समान। **वामि**=प्रवृत्त होती हूं। **आरभाणा**=उत्पन्न करती हुई। **भुवनानि**=लोकों को, पञ्च महाभूतों को। **दिवो परः**=द्युलोक से परे। **एना**=इस। **एतावती**=इतने बड़े परिमाण वाली। **महिना**=महिमा से। **संबभूव**=हो जाती हूं।

हिन्दी अनुवाद–मैं ही सारे लोकों को या पञ्च महाभूतों को उत्पन्न करती हुई वायु के समान प्रवृत्त होती हूं। अर्थात् वायु के समान व्याप्त हो जाती हूं। द्युलोक से परे और इस पृथिवी लोक से भी परे और इनको अतिक्रान्त करती हुई मैं अपनी महिमा से इतने बड़े परिमाण वाली हो जाती हं।

व्याकरण–

आरभमाणा–आ+रभ्+शानच्+टाप्।

एना–'इदम्' शब्द के स्थान पर 'एन' आदेश। तृतीया का एकवचन। वैदिक रूप। लोक में 'एनेन' बनेगा।

एतावती–एतत् परिमाणम् अस्याः अर्थ में एतद्+मतुप्+ङीप् (ई) ''आ सर्वनाम्नः'' सूत्र से 'एतद्' के 'द्' को आ आदेश। 'म' को 'व' आदेश।

महिना–'महत्' शब्द से 'इमनिच्' प्रत्यय। महत्+इमनिच्। 'टि' का और 'इमनिच्' के 'म' का लोप होकर मह+इन्=महिन्। तृतीया का एकवचन।

विशेष–इस मन्त्र के द्वारा ब्रह्म को जानने वाली वाक् देवी में लोकान्तरो और पञ्चमहाभूतों को सृजन करने की क्षमता अभिव्यक्त होती है।

छन्द के आग्रह से 'वाम्यारभमाणा' को 'वामि आरभमाणा' तथा 'पृथिव्यैतावती' को 'पृथिव्या एतावती' पढ़ना चाहिये।

बृहस्पति सूक्त

(मण्डल - ४, सूक्त - ५०)

ऋषि वामदेवः।। देवता बृहस्पतिः १ से ९। इन्द्राबृहस्पति १०-११ ।

छन्दः १-९ त्रिष्टुप्। जगती १०-११ ।।

साधारणतया इस सूक्त के तीन विभाग माने जा सकते हैं। पहले विभाग में (ऋचा १ से ६ तक) बृहस्पति के उस पराक्रम का ही वर्णन है जिससे वे बल के कारागार से देवों की गायों को मुक्त कर पाए। इसमें वास्तव में युद्ध करने वाले वीर थे इन्द्र; किन्तु इनके नाम का इन ऋचाओं में उल्लेख नहीं है। दूसरे विभाग में इहलोक के युद्धों में तथा और अवसरों पर बृहस्पति के पार्थिव प्रतिनिधि की, राजपुरोहित की, महिमा को राजाओं के हृदयों पर अंकित करने का प्रयत्न है। तीसरे विभाग में याग या यज्ञ के स्थल पर सोमपान के लिए प्रधान रूप से बृहस्पति को और उसके साथ इन्द्र को निमंत्रित किया गया है।

१. यस्तुस्तम्भ सहसा वि ज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम्।।१।।

पद-पाठः यः। तुस्तम्भ। सहसा। वि। ज्मः। अन्तान्। बृहस्पतिः। त्रिऽसधस्थः। रवेण।
तम्। प्रत्नासः। ऋषयः। दीध्यानाः। पुरः। विप्राः। दधिरे। मन्द्रऽजिह्वम्।।१।।

हिन्दी अनुवाद–तीनों लोको में निवास करने वाले जिस बृहस्पति ने अपनी सामर्थ्य तथा सिंहगर्जना से पृथ्वी के अन्तों को एक-दूसरे से पृथक् कर रखा है, उस सरस रसना वाले बृहस्पति को उन पुरातन ऋषियों ने तथा कवियों ने अपने सभी लोगों का नेता निश्चित रूप से मान लिया।

विशेष–**वि-तस्तम्भ** 'भिन्न-भिन्न स्थानों पर रोककर रखा'। **त्रिषधस्थः**–वह जिसके आश्रयस्थान तीन (स्वर्ग, अन्तरिक्ष, तथा पृथ्वी) हों। इस उद्देश्य से अग्नि, सोम, विष्णु, तथा सरस्वती इन सभी को ऋग्वेद में **त्रिषधस्थ** कहा गया है। **रवेण**-**रव** अथवा **विरव** शब्द का अभिप्राय प्रायः 'मन्त्र के उच्चारण के ध्वनि' से होता है।

बृहस्पति के शस्त्रागार का यह एक प्रमुख शस्त्र है। **प्रत्नासः ऋषयः विप्राः** अर्थात् अङ्गिरस ऋषि; बृहस्पति इनके नेता हैं।

२. धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे।

पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम्॥२॥

पद-पाठः धुनऽइतयः। सुऽप्रकेतम्। मदन्तः। बृहस्पते। अभि। ये। नः। ततस्रे।

पृषन्तम्। सृप्रम्। अदब्धम्। ऊर्वम्। बृहस्पते। रक्षतात्। अस्य। योनिम्॥२॥

हिन्दी अनुवाद–हे बृहस्पते, जिन्होंने हमारे चित्रविचित्र वर्ण, चञ्चल तथा अजेय (धेनुओं के) झुण्ड के लिये अपने ध्वज खड़े किये, वे (पुरातन अङ्गिरस ऋषि) अपनी दौड़ से (आकाश को) निनादित कर रहे हैं तथा (कैद में रखी गायें) सहज रीति से से पहचानी जायँ, इसलिये अपना उन्माद प्रकट कर रहे हैं। हे बृहस्पते, इस (गायों के झुंड के) मूल स्थान की ध्यान से रक्षा करो।

विशेष–**धुना**=ध्वनन युक्त+**इतिः**=गमन है जिनका वे **धुनेतयः। धुनेतयः मदन्तः** (सन्ति) इसे मुख्य मानकर पहले दो या तीन पादों का अन्वय एक साथ ही करें। अथवा पहले तीन पादों से एक उपवाक्य बना है यह मानकर ऋ. १ के **पुरो दधिरे** (ते त्वां पुरो दधिरे) से इसे सम्बद्ध करें। किन्तु प्रस्तुत ऋचा में कवि ने बृहस्पति तथा उसके अनुयायियों को अर्थात् अङ्गिरस ऋषियों को अपने मन की आँखों के सामने प्रत्यक्ष खड़ा किया है, इसकी ओर ध्यान देकर इस ऋचा में विद्यमान वाक्य को वर्तमान काल की वाचक क्रिया (प्रत्यक्ष अथवा अध्याहृत) से जोड़ना अधिक युक्तियुक्त होगा। इसी पुरातन बल की गुहा में (निरुद्ध) गायों के समूह को कवि ने **अस्य** अर्थात् स्वयं उसके वर्तमानकालीन गायों को समूह की उत्पत्ति का स्रोत माना और बृहस्पति के सामने प्रत्यक्ष प्रार्थना की कि वह उनकी सुरक्षा करे। **अभि नः ऊर्वं च ततस्रे**–'हमारी और हमारी (गायों के) समूह की तरफ से अपने ध्वजों को फहराया'। **नः** में कवि पूर्वजों के साथ अपनी एकता की कल्पना कर रहा है। **अस्य** का सम्बन्ध कवि के वर्तमानकालीन गायों के समूह से है। **योनिम्**–उत्पत्ति स्थान, यहाँ अभिप्राय बलके कारागार में निरुद्ध गायों का समूह से। बृहस्पति को मन की आँखों के सामने रखकर कवि प्रार्थना कर रहा है–"वलकी गुहा में निरुद्ध गौएं भविष्य में सभी गायों की उत्पत्ति का स्रोत हैं, अतः उनकी सुरक्षा करो।" तीसरे पाद को **अभिततस्रे** के स्थान पर **रक्षतात्** से भी अन्वित करना संभव है। ऐसा करने से पूर्वार्ध में एक वाक्य होगा–'**धुनेतयः सन्ति**' और उत्तरार्ध में दूसरा वाक्य होगा–'**अस्य योनिं ऊर्वं रक्षतात्**'। **अभि+तंस्** का अर्थ है 'श्रेष्ठता के भाव से ध्वज को ऊपर उठाना, फहराना'। यहाँ **नः** का अभिप्राय होगा, 'हमारी ओर से'। इसके विपरीत १०.८९.१५ के '**शत्रूयन्तो अभि ये नस्ततस्रे**' में, जैसा कि **शत्रूयन्तः** विशेषण स्पष्ट है, **नः** का

अर्थ है 'हमारे विरुद्ध'। **अभि** उपसर्ग से प्रायः श्रेष्ठता का भाव सूचित होता है।

३. बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः।
तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतन्त्यभितो विरप्शम्॥३॥

पद-पाठः बृहस्पते। या। परमा। पराऽवत्। अतः। आ। ते ऋतऽस्पृशः। नि। सेदुः।
तुभ्यम्। खाताः। अवताः। अद्रिऽदुग्धाः। मध्वः। श्चोतन्ति। अभितः। विऽरप्शम्॥३॥

हिन्दी अनुवाद–हे बृहस्पते, अत्यन्त दूर बसे हुए अति दूर स्थान से (यहाँ आकर) ये यज्ञ सम्पादन करने वाले (अङ्गिरस ऋषि) तुम्हारे लिये (यज्ञ करने के उद्देश्य से) आसनों पर विराजमान हुए हैं। खोदकर (सोम रस से) भरी ये खाइयाँ, पत्थरों से रगड़कर दोहित हुई हैं। इस लिये, मधुर सोमरस की वर्षा चारों ओर से रही है।

विशेष–इस ऋचा में भी कवि मन से वलकालीन अतीत में ही घूम रहा है। **ऋतुस्पृशः** ऋत को अर्थात् यज्ञ को स्पर्श करने वाले अर्थात् 'यज्ञ को संपन्न करने वाले'। **खाताः अवताः** 'खोदी हुई रस से पूर्ण खाइयाँ। सोमवल्ली पर यह एक रूपक है। इसीलिए इन्हें **अद्रिदुग्धा** 'पाषाणों की सहायता से दुहे गए' कहा गया है। यहाँ **दुग्धाः** पद से स्पष्ट है कि सोमवल्ली के टुकड़ों पर गाय के स्तन का आरोप भी कवि के लिए अभिप्रेत है। अङ्गिरसों के इस यश का वर्णन ऋग्वेद में अन्यत्र भी पाया जाता है।

४. बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि॥४॥

पद-पाठः बृहस्पतिः। प्रथमम्। जायमानः। महः।
ज्योतिषः। परमे। विऽओमन्॥
सप्तऽआस्यः। तुविऽजातः। रवेण। वि।
सप्तऽरश्मिः। अधमत्। तमांसि॥४॥

हिन्दी अनुवाद–अत्युच्च स्वर्गलोक में महान् तेजोवलय से सर्वप्रथम जन्म ग्रहण करने वाले सात मुखों से विराजित तथा सात रज्जुखण्डों से रोका जाय, इतने जन्म से ही बलशाली बृहस्पति ने अपनी सिंहगर्जना से अन्धकारों को दूर भगा दिया।

विशेष–सप्तास्यः 'सात मुखों वाला' अर्थात् 'सातगुनी वक्तृता देने वाले मुख वाला'। अर्थ है 'अत्यन्त कुशल या प्रभावी वक्ता'। **रवेणसप्तरश्मिः** वह जिसके लिए सात रस्सियाँ या सात लगाम आवश्यक हों' अर्थात् अत्यन्त शक्तिमान्, ताकतवर (वृषभ या बैल)। इन्द्र को **सप्तरश्मिः वृषभः** कहा गया है। **अधमत् तमांसि**–क्योंकि

वह स्वयं ही एक बड़े तेजोगोल से उत्पन्न हुआ है।

५. स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण।

बृहस्पतिरुस्त्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत्॥५॥

पद-पाठः सः। सुऽस्तुभा। सः। ऋक्वता। गणेन। वलम्। रुरोज। फलिऽगम्। रवेण।

बृहस्पतिः। उस्त्रियाः। हव्यऽसूदः। कनिक्रदत्। वावशतीः। उत्। आजत्॥५॥

हिन्दी अनुवाद—उस बृहस्पति ने ऋचा में तथा स्तोत्रों में प्रवीण (अङ्गिरस ऋषियों के) गण की सहायता से तथा अपनी सिंहगर्जना से शिलामय प्रकार रूपी बल नाम के असुर का भेदन किया। और पुनः पुनः गर्जना करके, (सोमरूपी) हव्य को अपने दूध से स्वादुता अर्पित करने वाली तथा बार-बार रम्भाने वाली गायों को बाहर निकाला।

विशेष—**वावशतीः** धातु है वाश्—'रँभाना'। यहाँ अर्थ होगा 'बृहस्पति की सिंह जैसी गर्जना को प्रतिध्वनित करने वाली'।

६. एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः।

बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम्॥६॥

पद-पाठः एव। पित्रे। विश्वऽदेवाय। वृष्णे। यज्ञैः। विधेम। नमसा। हविःऽभिः।

बृहस्पते। सुऽप्रजाः। वीरऽवन्तः। वयम्। स्याम। पतयः। रयीणाम्॥६॥

हिन्दी अनुवाद—इस प्रकार हम अपने सभी देवों के इस प्रतिनिधि एवं पराक्रमी पिता का, यज्ञ, प्रणाम तथा हविर्द्रव्यों से पूजन करें। हे बृहस्पते, अच्छी सन्तान तथा वीर्यशाली अनुयायियों सहित हमें बहुविध संपदा के स्वामी होने दो।

विशेष—**विश्वदेव** यह बहुव्रीहि समास है—'वह जिसके वश में सभी देव हों'। ऋग्वेद ३.६२.४ में इस देवता को (बृहस्पति को) 'विश्वदेव्य' कहा गया है; वहाँ इसके माने हैं 'वह जिससे सभी देव संबद्ध हों'। प्रस्तुत ऋचा का चौथा पाद ही ऋग्वेद के अन्य तीन (५.५५, ८.४०, १०.१२१) सूक्तों की अन्तिम ऋचा के अन्तिम पाद के रूप में आया है, परन्तु प्रस्तुत सूक्त के साथ-साथ केवल ८.४८ में अन्तिम ऋचा के अन्त में की गई प्रार्थना के रूप में आने के स्थान पर मध्यवर्तिनी प्रार्थना के रूप में दिखाई देता है। प्रस्तुत सूक्त में इस स्थान पर पाद के समावेश का कारण संभवतः यह है कि सिर्फ बृहस्पति की स्तुति एवं प्रार्थना यहीं पर समाप्त हुई है।

७. स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण।

बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम्॥७॥

पद-पाठः सः। इत्। राजा। प्रतिऽजन्यानि। विश्वा। शुष्मेण। तस्थौ। अभि। वीर्येण। बृहस्पतिम्। यः सुऽभृतम्। बिभर्ति। वल्गुऽयति। वन्दते। पूर्वऽभाजम्।।७।।

हिन्दी अनुवाद–सर्व प्रथम (गौरव) संपादन करने वाले, तथा उत्तम (हविर्भागों से) सन्तुष्ट किए गए बृहस्पति को जो राजा हविर्द्रव्य समर्पण करता है तथा उसका स्तवन और वन्दन करता है, वह शारीरिक बल तथा वीर्य से अपने सभी प्रकार के विरोधियों की (सामर्थ्यो) पर विजय प्राप्त कर लेता है।

विशेष–**विश्वा प्रतिजन्यानि** इसके बाद **धनानि** अथवा **महांसि** का अध्याहार करें। **सुभृतं** का अर्थ है 'अन्यैः विप्रैः सुभृतम्'। **पूर्वभाजम्– पर्व एति पूर्वं (भागं) भजति।**

८. स इत् क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम्।
तस्मै विशः स्वयमेवा नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति।।८।।

पद-पाठः सः। इत्। क्षेति। सुऽधितः। ओकसि। स्वे। तस्मै। इळा। पिन्वते। विश्वऽदानीम्। तस्मै। विशः। स्वयम्। एव। नमन्ते। यस्मिन्। ब्रह्मा। राजनि। पूर्वः। एति।।८।।

हिन्दी अनुवाद–जिस राजा की राजसभा में उसका पुरोहित प्रथम सम्मान का भाजन होता है वही राजा अपने प्रासाद में सुस्थिर होकर चिरकाल तक निवास करता रहता है। केवल उसी के लिये ही सर्वकाल धन धान्य विपुलमात्रा में हो जाता है, तथा उसी के सामने उसके प्रजाजन स्वयं ही विनम्र हो जाते हैं।

९. अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः।।९।।

पद-पाठः अप्रतिऽहतः। जयति। सम्। धनानि। प्रतिऽजन्यानि। उत। या। सऽजन्या। अवस्यवे। यः। वरिवः। कृणोति। ब्रह्मणे। राजा। तम्। अवन्ति। देवाः।।९।।

हिन्दी अनुवाद–किसी प्रकार के विरोध का अनुभव न करते हुए वह राजा स्वपक्षीय तथा प्रतिपक्षीय राजाओं की सभी प्रकार की संपत्ति जीतने में शक्तिशाली होता है। साहाय्य की याचना करने वाले अपने पुरोहित को जो राजा सन्तुष्ट करता है, उसकी सुरक्षा देवता ही करते रहते हैं।

१०. इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषणवसू।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम्।।१०।।

पद-पाठः इन्द्रः। च। सोमम्। पिबतम्। बृहस्पते। अस्मिन्। यज्ञे। मन्दसाना। वृषण्वसू इति वृषण्ऽवसू। आ। वाम्। विशन्तु। इन्दवः। सुऽआभुवः। अस्मे इति। रयिम्। सर्वऽवीरम्। नि। यच्छतम्।।१०।।

हिन्दी अनुवाद–हे बृहस्पते, तुम और इन्द्र दोनों ही प्रसन्न होकर हमारे इस यज्ञ में सोमपान करो। हे विपुलता की वृष्टि करने वाले धन के स्वामी, उत्तम परिचर्या करने वाले हमारे ये सोमबिन्दु आपके उदर में प्रविष्ट हो जायँ। अनन्तर आप हमें वीर्यशाली अनुयायियों से समन्वित सभी प्रकार की संपत्ति समर्पित कीजिए।

विशेष–स्वाभुवः–(**सु+आभू**)–'उत्कृष्ट रीति से परिचर्या (सेवा) करने वाले अथवा सहायता देने वाले'। **आभू**–'सब प्रकारों से पास रहने वाला, परिचारक, विश्वासपात्र सेवक'। दे० **आभूभिरिन्द्रः श्नथयन्ननाभुवः** १.५१.९; तथा **स्वाभुवो जरणामश्नवन्त (सूरयः)** ७.३०.४।

११. बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः।।११।।

पद-पाठः बृहस्पते। इन्द्र। वर्धतम्। नः। सचा। सा। वाम्। सुऽमतिः। भूतु। अस्मे इति। अविष्टम्। धियः। जिगृतम्। पुरम्ऽधीः। जजस्तम्। अर्यः। वनुषाम्। अरातीः।।११।।

हिन्दी अनुवाद–हे बृहस्पते, हे इन्द्र, हमें समृद्ध बनाइए। आपकी वह कृपा हमारे ऊपर नित्य रहने दीजिए। हमारी स्तुतियों की रक्षा कीजिए। (हमारे यजमानों के मन में) दानबुद्धियों को जागृत कीजिए। हमारे शत्रु और विरोधकों की दुष्ट प्रवृत्तियाँ नष्ट कीजिए।

नासदीय सूक्त

(मण्डल-१०, सूक्त - १२९)

ऋषि - परमेष्ठी प्रजापति देवता-सृष्टि-स्थिति-प्रलयकर्ता, परमात्मा छन्द-त्रिष्टुप्

१ नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ।।

पद-पाठः न । असत् । आसीत् । नो इति । सत् । आसीत् । तदानीम् । न । आसीत् । रजः । नो इति । विऽओम । परः । यत् । किम् । आ । अवरीवरिति । कुह ।कस्य ।शर्मन् ।अम्भः ।किम् ।आसीत् ।गहनम् ।गभीरम् ।।१ ।।

अन्वय - तदानीम् असत् न आसीत्, सत् नो आसीत्, रजः न आसीत्, व्योम नो यत् परः।

किम् आवरीवः ? कुह ? कस्य शर्मन् ? गहनम् गभीरम् अम्भः किम् आसीत् ?

सायण - तपसस्तन्महिनाजायतैकमित्यादिनाग्रे सृष्टि प्रतिपादयिष्यते । अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा वा प्रलयावस्था सा निरूप्यते । तदानीं प्रलयदशायामवस्थितं यदस्य जगतो मूलकारणं तदसच्छशविषाणवन्निरूपाख्यं नासीत्। न हि तादृशात्कारणादस्य सतो जगत उत्पत्तिः संभवति। तथा नो सन्नैव सदात्मवसत्त्वेन निर्वाच्यमासीत्। यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि संभवति। कुतस्तयोस्तादात्म्यमिति उभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः। ननु नो सदिति पारमार्थिकसत्त्वस्य निषेधः ।तर्ह्यात्मनाऽप्यनिर्वाच्यत्वप्रसङ्ग ।अथोच्येत ।न ।आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते। परिशेषान्मायाया एवात्र सत्त्वं निषिध्यत इति । एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि तस्याः पारमार्थिकसत्त्वाभावात्। अथ व्यावहारिकसतां पृथिव्यादीनां भावानां विद्यमानत्वात् कथं नो सदिति निषेधः ।तत्राह ।नासीद्रज इत्यादि।लोका रजांस्युच्यन्ते । (नि० ४-१९) इति यास्कः। अत्र च सामान्यापेक्षमेकवचनम् । व्योम्नो वक्ष्यमाणत्वात्तस्याधस्तनाः पातालादयः पृथिव्यन्ता नासन्नित्यर्थः।तथा व्योमान्तरिक्षं तदपि नो नैवासीत् ।पर इति सकारान्तं परस्तादित्यर्थे वर्तते।परशब्दाच्छान्दसोऽस्तातेरर्थेऽसि प्रत्ययः । परो व्योम्नः परस्तादुपरिदेशे द्युलोकप्रभृति सत्यलोकान्तं तदपि नासीदित्यर्थः । अनेन चतुर्दशभुवनगर्भं ब्रह्माण्डं स्वरूपेण निषिद्धं भवति।अथ तदावरकत्वेन पुराणेषु प्रसिद्धानि यानि वियदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चापेक्षमुखेन क्रमेण निषेधयति किमावरीवरिति । किमावरणीयं तत्त्वमावरकभूतजातमावरीवः। अत्यन्तमावृणुयात्। आवार्याभावात्तदावरकमपि नासीदित्यर्थः।वृणोतेर्यङ्लुडन्ताच्छान्दसे लङि् तिपि रूपमेतत् । यद्वा किमिति प्रथमैव ।किं तत्त्वमावरकमावृणुयात्।आवार्याभावादाव्रियमाणवत्तदपि स्वरूपेण नीीदित्यर्थः ।आवृण्वत्ततत्वं कुह कुत्र देशेऽवस्थायावृणोति ।आधारभूतस्तादृशो देशोऽपि नासीदित्यर्थः ।कि शब्दात् सप्तम्यर्थे ह प्रत्ययः ।कुतिहोः ।(पा० ७-२-१०४) इति।प्रकृतेः क्वादेशः।कस्य शर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि सुखदुःखसाक्षात्कारलक्षणे वा निमित्ततभूते सति तदावरकं तत्त्वमावृणुयात् ।जीवानामुपभोगार्था हि सृष्टिः ।तस्यां हि सत्यां ब्रह्माण्डस्य भूतैरावरणं प्रलयदशायां च भोक्तारो जीवा उपाधिविलयात्प्रलीना इति कस्य कश्चिदपि भोक्ता न संभवतीत्यावरणस्य निमित्ताभावादपि तन्न घटत इत्यर्थः ।एतेन भोग्यप्रपञ्चवद्भोक्तृप्रपञ्चोऽपि तदानीं नासीदित्युक्तं भवति। किं शब्दादुत्तरस्य ङसः सावेकाच इति प्राप्तस्योदात्तत्वस्य न गोश्वन्सावर्णेति प्रतिषेधः ।सुपां सुलुगिति शर्मणः सप्तम्या लुक्।यद्यपि सावरणस्य ब्रह्माण्डस्य निषेधेन तदन्तर्गतमप्सत्त्वमपि निराकृतं तथाप्यापो वा इदमग्रे सलिमासीत्। (तै०स०-७-१-५-१)। इत्यादि श्रुत्या कश्चिदपां सद्भावमाशंकेत। तं प्रतयाचष्टेऽम्भः किमासीदिति। गहनं दुष्प्रवेशं गभीरं दुःस्थानमत्यगाधम् ईदृशमम्भः किमासीत्। तदपि नैवासीदित्यर्थः। श्रुतिस्त्ववान्तरप्रलयविषया।

शब्दार्थ – **असत्** – अभावात्मक तत्त्व। **सत्** – सत्तात्मक तत्त्व। **तदानीम्** – उस समय, सृष्टि उत्पत्ति से पहले प्रलय दशा में। **रजः** – पृथ्वी से लेकर पाताल पर्यन्त लोक। **व्योम** – अन्तरिक्ष। **परः** – अन्तरिक्ष से परे। **आवरीवः** – आवरण करने वाला तत्त्व। **कुह** – कहाँ। **कस्य** – किसकी। **शर्मन्** – संरक्षा में। **गहनम्** – दुष्प्रवेश्य। **गभीरम्** – अत्यन्त गहरा।

हिन्दी अनुवाद – उस अर्थात् सृष्टि उत्पत्ति से पहले प्रलय दशा में असम् अर्थात् अभावात्मक तत्त्व नहीं था और सत्तात्मक तत्त्व भी नहीं था। रजः अर्थात् पृथिवी से लेकर पाताल पर्यन्त लोक नहीं थे। अन्तरिक्ष नहीं था और अन्तरिक्ष से परे भी जो कुछ है वह भी नहीं था। पुनः आवरण करने वाला तत्त्व क्या था ? वह आवरक तत्त्व कहाँ था और किसकी संरक्षा में था ? उस समय दुष्प्रवेश्य एवं अत्यन्त गहरा जल क्या था ? अर्थात् वे सब नहीं थे।

व्याकरण –

असत् – अस् + शतृ – सत्। न + सत् – असत्।

सत् – अस् + शतृ – सत्।

कुह – किम् + ह –कुह।

आवरीवः – आवृणोति इति आवरणो वा आवरिः। औणादिक 'ई' प्रत्यय। आ + वृ + ई – आवरी। मतुबर्थो 'व' प्रत्यय – आवरीव।

विशेष – मैक्डानल के अनुसार रजस् – वायु (**air**); किम् आवरीवः – अपने अन्दर किसे रखता था (**what did it contain**); कस्य शर्मन् – किसकी संरक्षा में (**in whose protection**)

२ न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥

पद-पाठः न। मृत्युः। आसीत्। अमृतम्। न। तर्हि। न। रात्र्याः। अह्नः। आसीत्। प्रऽकेतः। आनीत्। अवातम्। स्वधया। तत्। एकम्। तस्मात्। ह। अन्यत्। न परः। किम्। चन। आस॥२॥

अन्वय – तर्हि मृत्युः न आसीत्, न अमृतम्, रात्र्याः अह्नः प्रकेतः न आसीत्। तत् आनीत् अवातम्, स्वधया, एकम्। ह तस्मात् अन्यत् किञ्चन न आस न परः।

सायण – ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह। न मृत्युरासीदिति। ननु यदि स नासीत् तर्हि तदभावकृममृतममरणं प्राणिनामवस्थानं तदानीमपि स्यात् तत्राह। अमृतं न तर्हीति। तर्हि तस्मिन्प्रतिहारसमये। अयं भावः। सर्वेषा प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत् तदा भोगाभावान्निष्प्रयोजनमिदं जगदिति परमेश्वरस्य

मनसि संजिहीर्षा जायते। तथैव स मृत्युः सर्वं जगत्संहरत इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथममरणं स्यादिति। एतदेवाभिप्रेत्य कठैराम्नायते। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनम् मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स। (क०उ० - २-२५) इति। नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह। न रात्र्या इति। न रात्र्या अह्नश्च प्रकेतः प्रज्ञानमासीत्। तद्धेतुभूतयोः सूर्याचन्द्रमसोरभावात्। एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः। कयं तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः। उपचारादिति ब्रूमः। यथेदानीन्तननिषेधस्य कालोऽवच्छेकस्तथा मायापि तदवच्छेदहेमुरित्यवच्छेकत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः। यदवादिष्म ब्रह्मणः परमार्थसत्त्वमग्रे वक्ष्यत इति तदिदानीं दर्शयत्यानीदिति। तत्सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वमानीत् ।प्राणितवत् ।नन्वेवं प्राणनकर्तुर्जीवभावापन्नस्य ब्रह्मणः सत्त्वं स्यात् न विवक्षितस्य निरुपाधि ाकस्य ब्रह्मणः। अप्राणो ह्यमनाः शुद्ध इति तस्य प्राणसम्बन्धाभावात् तत्राहानीदवातमिति। अयमाशयः। आनीदित्यत्र धात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसम्बन्ध इति त्रयोऽर्थाः प्रतीयन्ते। तत्र समुदायो न विधीयते यथाग्नेयोऽष्टाकपाल इति येन ब्रह्मणः सत्त्वं न स्यात् ।किं तर्ह्यनेन कर्तृत्वनूद्य भूतकालसत्तालक्षणो गुणो विधीयते दध्ना जुहोतीति वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम्। तत्राप्यनेन कर्तृविशिष्टस्य न पूर्वकालसत्ता विधीयते तन्निषेधानुपपत्तिप्रसङ्गात्। अतोऽनेन कर्तृत्वेनेदानीन्तनेनोपलक्षितं यन्निरुपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विधीयत इति न कश्चिद्दोष इति। नन्वीदृशस्य ब्रह्मणो मायया सह सम्बन्धसम्भवात्सांख्याभिमता स्वतन्त्रता सद्रूपा सत्त्वरजस्तमोगुत्मिका मूलप्रकृतिरेवाभिमतेति कथं नो सदिति निषेधः। तत्राह स्वधयेति। स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तते इति स्वधा माया। तया तद्ब्रह्मैकमविभागापन्नमासीत्। सहयुक्तेऽप्रधाने। (पा० २-३-१९) इति तृतीया सहशब्दयोगाभावेऽपि सहार्थयोगे भवति वृद्धो यूना (पा १-२-६५) इति निपातनाल्लिङ्गात। अत्र प्रकृतिप्रत्ययाभ्यां तस्याः स्वातन्त्र्यं निवार्यते। यद्यप्यसङ्गस्य ब्रह्मणस्तया सह सम्बन्धो न सम्भवति तथापि तस्मिन्नविद्यया तत्स्वरूपमिव सम्बन्धोऽप्यध्यस्यते यथा शुक्तिकायां रजतस्य। एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातम्। ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वाद् ब्रह्मणोऽपि तत्प्रसङ्ग इति कथं तस्य सत्त्वमुक्तमानीदवातमिति। ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसङ्ग इति कथं नोऽसदासीदिति सत्त्वप्रतिषेधः । मैवं। अयुक्तिदृष्टैक्यावभासेऽपि युक्त्या विविच्य मायांशस्यानिर्वाच्यत्वं ब्रह्मणः सत्त्वं च प्रतिपादितम्। ननु दृग्दृश्याविति द्वावेव पदार्थावानीदवातं स्वधयेति तौ चेदङ्गीक्रियते तत्किमपरमवशिष्यते नासीद्रज इत्यादिना प्रतिषिध्येत तत्राह तस्मादिति। तस्माद्ध तस्मात्खलु पूर्वोक्तान्मायासहिताद् ब्रह्मणोऽन्यत्किंचन किमपि वस्तु भूतभौतिकात्मकं जगन्नास। न बभूव। छन्दस्युभयथेति लिटः सार्वधातुकत्वादस्तेर्भूभावाभावः। ननु तदानीमन्यस्य सत्त्वनिषेधो न शंक्यः असत्त्वे चाप्रसक्तत्वान्न निषेधोपयोग इत्यत आह पर इति। परः परस्तात् सृष्टेरूर्ध्वं वर्तमानमिदं जगत्तदानीं न बभूवेत्यर्थः। अन्यथोक्तरीत्या क्वचिदपि निषेधो न स्यादिति भावः।

शब्दार्थ – अमृतम् – मृत्यु का अभाव। **तर्हि** – उस समय। **प्रकेतः** – ज्ञान। **आनीत्** – प्राण से युक्त। **अवातम्** – क्रिया से शून्य। **स्वधया** – माया से। **एकम्** – अविभक्त एक रूप में। **तस्मात्** – उस माया युक्त ब्रह्म से। **अन्यत्** – भिन्न। **परः** – उससे परे।

हिन्दी अनुवाद – उस प्रलयकाल में मृत्यु नहीं थी और अमृत अर्थात् मृत्यु का अभाव भी नहीं था। रात्रि का और दिन का ज्ञान भी नहीं था। वह ब्रह्म तत्त्व ही प्राण से युक्त, अपनी क्रिया से शून्य और माया के साथ अविभक्त एक रूप में विद्यमान था। उस मायासहित ब्रह्म से भिन्न कुछ नहीं था और उससे परे भी कुछ नहीं था।

व्याकरण –

अह्नः – अहन् शब्द षष्ठी का एकवचन।

स्वधया – स्व + धा + क + टाप् – स्वधा। तृतीया का एकवचन।

प्रकेतः – प्र + कित् ज्ञाने + घञ्।

विशेष – मैक्डानल के अनुसार आनीत् – श्वास लेने वाला (**one breathed**), अवातम् – वायु से रहित (**windless**), स्वधया – अपनी शक्ति से (**by its own power**)।

३ **तम॑ आसी॒त्तम॑सा गू॒ळ्हमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम् ।**

तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॒त्तप॑स॒स्तन्म॑हि॒नाजा॑य॒तैक॑म् ॥

पद-पाठः तम॑: । आ॒सी॒त् । तमसा । गू॒ळ्हम् । अग्रे॑ । अ॒प्र॒ऽके॒तम् । स॒लि॒लम् । सर्व॑म् । आ॒: । इ॒दम् । तु॒च्छ्येन॑ । आ॒भु । अपि॑ऽहितम् । यत् । आसी॑त् । तम॑स: । तत् । म॒हि॒ना । अ॒जा॒य॒त॒ । एक॑म् ॥ ३ ॥

अन्वय – अग्रे तमसा गूळ्हम् तमः आसीत् । अप्रकेतम् इदम् सर्वम् सलिलम् आः । यत् आभु तुच्छ्येन अपिहितम् आसीत्, तत् एकम् तमसः महिना अजायत।

सायण – ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत्कथं तर्हि तस्य जन्म। जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्यावश्यंभावात्। अथैद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते। कथं तस्य जन्म। अत आह। तमसा गूळ्हमग्र इति। अग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसा गूळ्हम्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् । आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति। आच्छादकात्तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्यमुत्पद्यत इत्यसद्वादिनोऽसत्कार्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः। ननु कारणे तमसि तज्जगदात्मकं विद्यते चेत् कथं नासीद्रज इत्यादिनिषेध

ा:। तत्राह तम आसीदिति। तमो भावरूपाज्ञानं मूलकारणम् । तद्रूपता तदात्मनाम्। यतः सर्वं जगत्प्राक् तम आसीदतो निषिध्यत इत्यर्थः।नन्वारकत्वादावरकं तमः कर्तृ आवार्यत्वाज्जगत्कर्म। कथं तयोः कर्मकर्त्रोस्तादात्म्यम्।तत्राह।अप्रकेतमिति।अप्रकेतमप्रज्ञायमानम्।अयमर्थः।यद्यपि जगतस्तमसश्च कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यहारदशायामिव तस्यां दशायां नामरूपाभ्यां विसृष्टं न ज्ञायत इति तादत्म्यवर्णनम्। अत एव मनुना स्मर्यते। आसीदिदं तमोभूतमप्रज्ञातलक्षणम्।अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः।(मनु० १.५) इति।कुतो वा न प्रज्ञायते तत्राह।सलिलम्।सल गतौ।औणदिक इलच्।इदं दृश्यमानं सर्वं जगत्सलिलं कारणेन सङ्गतमविभागपन्नमाः।आसीत्।अस्तेर्लङि तिपि बहुलं छन्दसीतीडभावे हल्ङ्ब्भ्य इति तिलोपे तिप्यनस्तेः। (पा० ८.२.७३) इति पर्युदासाद्दकाराभावः। यद्वा सलिलमिति लुप्तोपमम्। सलिलमिव। यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाविभागापन्नं जगन्न शक्यविज्ञानमित्यर्थः।ननु विविधविचित्ररूपभूयसः प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः। तथा तमोऽपि बलवदित्येवोच्यते। तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसंभव इत्यत आह।तुच्छ्येनेति।आ समन्ताद्भवतीत्याभु तुच्छ्येन ।छान्दसो यकारोपजनः। तुच्छेन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं छादितमासीत्।दधातेः कर्मणि निष्ठा।दधातेर्हिः।गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम्।एकमेकीभूतं कारणेन तमसाविभागतां प्राप्तमपि तत्कार्यजातं तपसः स्रष्टव्यपर्यालोचनरूपस्य महिना माहात्म्येनाजायत।उत्पन्नम्। तमसः स्रष्टव्यपर्यालोचनरूपत्वं चान्यत्राम्नायते।यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।(मु० उ० - १.१.९) इति।

शब्दार्थ – तमः – तमस् रूप मूल कारण।**तमसा** – अन्धकार से।**गूळ्हम्** – आच्छादित। **अग्रे** – पहले। **अप्रकेतम्** – अज्ञायमान। **तुच्छ्येन** – तुच्छ अभाव रूप अज्ञान से। **आभु** – व्यापक। **अपिहितम्** – आच्छादित। **तमसः** – संकल्प रूप तप की। **महिना** – महिमा से। **अजायत** – उत्पन्न हुआ।

हिन्दी अनुवाद – सृष्टि के उत्पन्न होने से पहले अर्थात् प्रलय की अवस्था में यह जगत् अन्धकार से आच्छादित था और यह जगत् अपने तमस् रूप मूल कारण में विद्यमान था। अज्ञायमान यह सम्पूर्ण जगत् उस समय सलिल रूप में था।अर्थात् उस समय कार्य और कारण दोनों मिले हुऐ थे।यह जो जगत् व्यापक एवं तुच्छ अभाव रूप अज्ञान से आच्छादित था तो वह कारण के साथ हुआ जगत् ईश्वर के संकल्प रूप तप की महिमा से उत्पन्न हुआ।

व्याकरण –

गूळ्हम् – गुह् + क्त – गूळ्ढ ।

अप्रकेतम् – प्र + कित् + अच् (अ) – प्रकेत। अविद्यमानः प्रकेतः यस्मिन् तत् – अप्रकेतम्।

तुच्छ्येन – तुच्छ शब्द का वैदिक रूप – तुच्छ्य। तृतीया का एकवचन।

आभु – आ समन्तात् भवति । आ + भू से निपातनात् ।

अपिहितम् – अपि + धा + क्त ।

महिना – महि । शब्द तृतीया का एकवचन । वैदिक रूप।

सलिलम् – सल् गतौ + इलच् ।

विशेष – मैक्डानल के अनुसार आ इदम् – अस्तित्व में आने वाले (**coming into being**)। तपस: महिना – गर्मी की शक्ति से (**through the power of heat**)।

४ कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।

सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ।।

पद-पाठः कामः । तत् । अग्रे । सम् । अवर्तत । अधि । मनसः । रेतः । प्रथमम् । यत् । आसीत् । सतः । बन्धुम् । असति । निः । अविन्दन् । हृदि । प्रतिऽइष्य । कवयः । मनीषा ।।

अन्वय – अग्रे तत् कामः सम् अवर्तत यत् मनसः अधि प्रथमम् रेतः आसीत् । सतः बन्धुम् कवयः मनीषा हृदि प्रतीष्य असति निरविन्दन् ।

सायणः – ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ कारणं तदेव किंनिबन्धनमित्यत आह कामस्तदग्र इति । अग्रेऽस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि कामः समवर्तत । सम्यगजायत । सिसृक्षा जातेत्यर्थः । ईश्वरस्य सिसृक्षा वा । किंहेतुकेत्यत आह मनस इति । मनसोऽन्तःकरणस्य सम्बन्धि वासनाशेषेण मायायां विलीने ऽन्तःकरणे समवेतम्। सामान्योपेक्षमेकवचनम्। सर्वप्राण्यन्तःकरणेषु समवेतमित्यर्थः। एतेनात्मनो गुणाधारत्वं प्रत्याख्यातम्। तादृशं रेतो भाविनः प्रपञ्चस्य बीजभूतं प्रथममतीते कल्पे प्राणिभिः कृतं पुण्यात्मकं कर्म यद्यतः कारणात्सृष्टिसमये आसीत् अभवत् । भूष्णु वर्णिष्णववजायत परिपक्वं सत्फलोन्मुखमासीदित्यर्थः। तत्ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि-सिसृक्षाजायतेत्यर्थः। तस्यां च जातायां स्रष्टव्यं पर्यालोच्य ततः सर्वं जगत् सृजति। तथा चाम्नायते। सोऽकामयत बहु स्यां प्रजायेयेति सो तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किञ्च। (तै० आ० ८-६)। इति श्रुत्यातमनेत्थमवगमितेऽर्थे विद्वदनुभवत्यनुग्राहकत्वेन प्रमाणयति सत इति। सतः सत्त्वेनेदानीमनुभूयमानस्य सर्वस्य जगतो बन्धुं बन्धकं हेतुभूतं कल्पान्तरे प्राण्यनुष्ठितं कर्मसमूहं कवयः कान्तदर्शना अतीतानागतवर्तमानाभिज्ञा योगिनो हृदि हृदये निरुद्धया मनीषा मनीषया बुद्ध्या। सुपां सुलुगिति तृतीयाया लुक्। प्रतीष्य विचार्य। अन्येषामपीति सांहितिको दीर्घः। असति सद्विलक्षणेऽव्याकृते कारणे निरविन्दन्। निष्कृष्यालभन्त। विविच्याजानन्नित्यर्थः।

शब्दार्थ – **कामः** – सुष्टि उत्पन्न करने की इच्छा। **अग्रे** – सबसे पहले। **समवर्तत** – उत्पन्न हुई। **मनसः अधि** – मन में। **रेतः** – सृष्टि का बीज रूप कारण। **प्रथमम्** – सबसे पहला। **सतः** –अस्तित्व रूप में विद्यमान जगत् के। **बन्धुम्** – बन्धन के कारण को। **असति** – अभाव में। **निरविन्दन्** – खोज कर पाया। **हृदि** – हृदय में। **प्रतीष्य** – विचार कर। **कवयः** – क्रान्तदर्शी ऋषियों ने। **मनीषा** – बुद्धि से।

हिन्दी अनुवाद – सृष्टि की उत्पत्ति होने के समय सबसे पहले वह काम अर्थात् सृष्टि उत्पन्न करने की इच्छा उत्पन्न हुई, जो परमेश्वर के मन में सबसे पहला सृष्टि का बीज रूप कारण हुआ। अस्तित्व रूप से विद्यमान जगत् के बन्धन के कारण को क्रान्तदर्शी ऋषियों ने अपनी बुद्धि से हृदय में विचार कर भाव से विलक्षण अभाव में खोज कर पाया।

व्याकरण –

समवर्तत – सम् + वृत् धातु, लङ् लकार, प्रथम पुरुष, एकवचन।

मनीषा – मनीषा शब्द, तृतीया का एकवचन। वैदिक रूप।

निरविन्दन् – निर् + विद् (विन्द्) धातु, लङ् लकार, प्रथम पुरुष, बहुवचन।

प्रतीष्य – प्रति + इष् इच्छायाम् + क्त्वा (ल्यप्)। वैदिक दीर्घ।

विशेष – मैक्डानल का अर्थ भी इसी प्रकार से है। उसने 'रेतस्' का अर्थ 'बीज' (seed) किया है।

५ **ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम॒धः स्वि॑दा॒सी३दु॒परि॑ स्विदासी३त्।**
रे॒तो॒धा आ॑सन्महि॒मान॑ आसन्त्स्व॒धा अ॒वस्ता॒त्प्रय॑तिः प॒रस्ता॑त् ।।

पद-पाठः ति॒र॒श्चीनः॑। विऽत॑तः। र॒श्मिः। ए॒षा॒म्। अ॒धः। स्वि॒त्। आ॒सी॒३त्। उ॒परि॑। स्वि॒त्। आ॒सी॒३त्। रे॒तः॒ऽधाः। आ॒स॒न्। म॒हि॒मानः॑। आ॒स॒न्। स्व॒धा। अ॒वस्ता॑त्। प्रऽय॑तिः। प॒रस्ता॑त्।।५।।

अन्वय – एषाम् रश्मिः विततः तिरश्चीनः अधः स्वित् आसीत् उपरि स्वित् आसीत्? रेतोधाः आसन् महिमानः आसन् स्वधा प्रयतिः परस्तात्।

सायणः – एवमविद्याकामकर्माणि सृष्टेर्हेतुत्वेनोक्तानि। अधुना तेषां स्वकार्यजनने शैघ्र्यं प्रतिपाद्यते। येयं नासदासीदित्यविद्या प्रतिपादिता यश्च कामस्तदग्र इति कामो मनसो रेतः प्रथमं यदासीदिति यत्कर्मैषामविद्याकामकर्मणां विपदादिभूतजातानि सुजतां रश्मी रश्मसदृशो यथा सूर्यरश्मिरुदयानन्तरं निमेषमात्रेण युगपत् सर्वं जगद् व्याप्नोति तथा शीघ्रं सर्वत्र व्याप्नुवन् यः कार्यवर्गो विततो विस्तृत आसीत्। स्विदासीदिति वक्ष्यमाणमत्रापि सम्बध्यते। विचार्यमाणानाम्। (पा० ८-२-९७) इति प्लुतः। तत्रोदात्त इत्यनुवृत्तेः स चोदात्तः। स्विदिति वितर्के। स कार्यवर्गः

किं प्रथमतः तिरश्चीनस्तिर्यगवस्थितो मध्ये स्थित आसीत् किंवाधोऽधस्तादासीत् । आहोस्विदुपर्युपरिष्ठात् किमासीत् ।उपरि स्विदासीदिति च (पा० ८-२-१०२) इति अनुदात्तः प्लुतः। आत्मनः आकाशः संभूत आकाशाद्वायुर्वायोरग्निः। (तै० आ० ८-१) इत्यादिकया पञ्चमीश्रुत्या तत उद्गातारं ततो होतारमितिवत्क्रमप्रतिपत्तौ सत्यामपि विद्युत्प्रकाशवत्सर्गस्य शीघ्रव्यापनेन तस्य क्रमस्य दुर्लक्षणत्वादेतेषु त्रिषु स्थानेषु प्राथम्यं कुत्रेति विचार्यते। एवं नाम शीघ्रं सर्वतो दिक्षु सर्गो निष्पन्नः इत्यर्थः। एतदेव विभजते। सृष्टेषु कार्येषु मध्ये केचिद्भावा रेतोधा रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवा आसन् अन्ये भावा महिमानः। स्वार्थिक इमनिच् ।महान्तो वियदादयो भोग्या आसन्। एवं मायासहितः परमेश्वरः सर्व जगत् सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवानित्यर्थः अयमेवार्थस्तैत्तिरीय के तत्सृष्ट्वा तदेवानुप्राविशत् (तै० आ० ८-६) इत्यारभ्य प्रतिपाद्यते। तत्र च भोक्तृभोग्योर्मध्ये स्वधा।अन्नामैतत्। भोग्यप्रपञ्चोऽवस्तादवरो निकृष्ट आसीत्।प्रयतिः प्रयतिता भोक्ता परस्तात्पर उत्कृष्ट आसीत्। भोग्यप्रपञ्च भोक्तृप्रपञ्चस्य शेषभूंत कृतवानित्यर्थः।विभाषा परावराभ्याम्। (पा० ५-३-२९) इति प्रथमार्थेऽस्तातिः । अस्ताति च। (पा० ५-३-४०) इतयवरशबदसयावादेशः।अवस्तादिति संहितायामीषाअक्षादित्वात् प्रकृतिभावः।

शब्दार्थ – तिरश्चीनः – तिरछा था। **विततः** – विस्तृत। **रश्मिः** – सूर्य की किरणों के समान व्यापकता का भाव। **अघः** – नीचे। **स्वित्** – क्या। **रेतोघाः** – बीज रूप कर्म को धारण करने वाले जीव रूप। **महिमानः** – आकाश आदि महान् रूप में प्रकृति रूप। **स्वधा** – भोग्य पदार्थ। **अवस्तात्** – निकृष्ट। **प्रयति** – भोक्ता पदार्थ। **परस्तात्** – उत्कृष्ट।

हिन्दी अनुवाद – **इन तीनों कारणों ('नासदासीत्' में कथित अविद्या, 'कामस्तदग्रे' में कथित संकल्प और 'मनस रेतः' में कथित सृष्टि का बीज रूप कारण) का सूर्य की किरणों के समान बहुत अधिक व्यापकता का भाव बहुत विस्तृत था। यह सब पहले क्या तिरछा था या मध्य में विद्यमान था क्या वह नीचे विद्यमान था अथवा क्या वह ऊपर विद्यमान था ? अर्थात् वह सब स्थानों पर समान भाव से उत्पन्न हुआ था। इस प्रकार उत्पन्न हुए जगत् में कुछ पदार्थ बीज रूप कर्म को धारण करने वाले जीवरूप में थे और कुछ पदार्थ आकाश आदि महान् रूप में प्रकृति रूप थे। इस भोक्ता और भोग्य सृष्टि में भोग्य पदार्थ निकृष्ट समझा जाता है और नियमित करने वाला भोक्ता पदार्थ उत्कृष्ट माना जाता हैं।**

व्याकरण –

तिरश्चीनः – तिरस् + अञ्च् + ख (ईन) ।

विततः – वि + तन् + क्त ।

रेतोधाः – रेतः दधाति ।रेतस् + धा + क्विप् ।

महिमानः – महत् + इमनिच् – महिमन्। प्रथमा विभक्ति का बहुवचन ।

प्रयतिः – प्र + यम् + क्तिन् ।

विशेष – मैक्डानल के अनुसार तिरश्चीनः – आरपार (**across**), विततः – फैला हुआ था (**was extended**), रश्मि – रस्सी (**cord**), महिमानः – शक्तियाँ (**powers**), स्वधा – अन्तः शक्ति (**energy**), प्रयतिः – मानसिक आवेग (**impulse**)। मैक्डानल के अनुसार पूरा अर्थ इस प्रकार है –

There cord was extended across : was there below or was there above ? There were impregnators, there were powers; there was energy below, there was impulse above.

६ को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ।।

पद-पाठः कः । अद्धा । वेद । कः । इह । प्र । वोचत् । कुतः । आऽजाता । कुतः । इयम् । विऽसृष्टिः । अर्वाक् । देवाः । अस्य । विऽसर्जनेन । अथ । कः । वेद । यतः । आऽबभूव ।।

अन्वय – कः अद्धा वेद, कः इह प्र वोचत्, इयम् विसृष्टिः कुतः आजाता। देवाः अस्य विसर्जनेन अर्वाक् । अथ कः वेद यतः आ बभूव।

सायणः – एवं भोक्तृभोग्यरूपेण सृष्टिः संग्रहेण प्रतिपादिता। एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इतिवत् । अथेदानीं सा सृष्टि दुर्विज्ञानेति न विस्तरेणाभिहितेत्याह । को अद्धेति । कः पुरुषोऽद्धा पारमार्थ्येन वेद । जानाति। को वेहास्मिंल्लोके प्र वोचत् । प्रब्रूयात् । इयं दृश्यमाना विसृष्टिर्विविधा भूतभौतिकक्तृभोग्यादिरूपेण बहुप्रकारा सृष्टिः कुतः कस्मादुपादानकारणात् कुतः कस्माच्च निमित्तकारणाजाता। समन्ताज्जाता। प्रादुर्भूता एतदुभयं सम्यक्को वेद को वा विस्तरेण वक्तुं शक्नुयादित्यर्थः। ननु देवा अजानन्तः । सर्वज्ञास्ते ज्ञास्यन्ति वक्तुं च शक्नुवन्तीत्यत आह। अर्वागति। देवाश्चस्य जगतो विसर्जनेन वियदादिभूतोत्पत्त्यनन्तरं विविधं यद्भौतिकं सर्जनं सृष्टिस्तेनार्वागर्वाचीनाः कृताः। भूतसृष्टेः पश्चाज्जाता इत्यर्थः। तथाविधास्ते कथं स्वोत्पत्तेः पूर्वकालीनां सृष्टिं जानीयुः। अजानन्तो वा कथं प्रब्रूयुः। उक्तं दुर्विजानत्वं निर्गमयति। अथैवं सति देवा अपि न जानन्ति किल। तद्व्यतिरिक्तः को नाम मनुष्यादिर्वेद यज्जगत्कारणं जानाति। यतः कारणात्कृत्स्नं जगदाबभूव अजायत।

शब्दार्थ – कः – कौन। **अद्धा** – वास्तविक रूप से। **वेद** – जानता है। **प्रवोचत्** – बता सकता है। **कुतः** – किस उपादान कारण से। **आजाता** – उत्पन्न हुई है। **कुतः** – किस निमित्त कारण से। **विसृष्टिः** – विविध प्रकार की सृष्टि। **अर्वाक्** – बाद के हैं। **विसर्जनेन** – सृष्टि के उत्पन्न होने से। **यतः** – जिस कारण से। **आ बभूव** – उत्पन्न हुआ है।

हिन्दी अनुवाद – कौन इस बात को वास्तविक रूप से जानता है और कौन इस लोक में सृष्टि के उत्पन्न होने का विवरण बता सकता है कि यह विविध प्रकार की सृष्टि किस उपादान

कारण से और किस निमित्त कारण से सब ओर से उत्पन्न हुई है। देवता भी इस विविध प्रकार की सृष्टि के उत्पन्न होने से बाद के हैं, अतः वे भी अपने से पहले की बात नहीं बता सकते। इसलिये कौन मनुष्य जानता है, जिस कारण से यह सारा संसार उत्पन्न हुआ है।

व्याकरण -

प्रवोचत् - प्र + ब्रू या वच् धातु, लुङ् लकार, प्रथम पुरुष, एकवचन। वैदिक रूप।

आजाता - आ + जन् + क्त + टाप्।

विसृष्टिः - वि + सृज + क्तिन्।

विसर्जनेन - वि + सृज्। ल्युट् (अन) - विसर्जन। तृतीया का एकवचन।

७ **इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।**
यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद ॥

पद-पाठः इयम्। विऽसृष्टिः। यतः। आऽबभूव। यदि। वा। दधे। यदि। वा। न। यः। अस्य। अधिऽअक्षः। परमे। विऽओमन्। सः। अङ्ग। वेद। यदि। वा। न। वेद ॥

अन्वय - इयम् विसृष्टिः यतः आबभूव यदि वा दधे यदि वा न। अस्य यः अध्यक्षः परमे व्योमन् अङ्ग सः वेद यदि वा न वेद।

सायण - उक्तप्रकारेण यथेदं जगत्सर्जनं दुर्विज्ञानमेवं सृष्टं तज्जगद्दुर्धरमपीत्याह। इयमिति। यत उपादानभूतात्परमात्मन इयं विसृष्टिर्विविधा गिरिनदीसमुद्रादिरूपेण विचित्रा सृष्टिराबभूव आजाता सोऽपि किल यदि वा दधे धारयति यदि वा न धारयति। एवं च को नामान्यो धर्तुं शक्नुयात्। यदि धारयेदीश्वर एव धारयेन्नान्य इत्यर्थः। एतेन कार्यस्य धारयितृत्वप्रतिपादनेन ब्रह्मण उपादानकारणत्वमुक्तं भवति। तथा च पारमार्षं सूक्तम्। प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्। (वेदा० १-४-२३) इति। यद्वा अनेनार्धर्चेन पूर्वोक्तं सृष्टेर्ज्ञानत्वमेव दृढयति। वेदेत्यनुवर्तते। इयं विविधा सृष्टिर्यत आबभूव आ समन्तादजायतेति को वेद। न कोऽपि। नास्त्येव जगतो जन्म कदाचिदनीदृशं जगदिति बहवो भ्रान्ता भवन्त्यपि। यतः। जनिकर्तुः प्रकृतिः। (पा० १-४-३०) इत्यपादानसंज्ञायां पञ्चम्यास्तसिल्। यस्मात्परमात्मन उपादानभूतादाबभूव तं परमात्मानं को वेद। न कोऽपि। प्रकृतितः परमाणुभ्यो वा जगज्जन्मेति हि बहवो भ्रान्ताः। यथा स एवोपादानभूतः परमात्मा स्वयमेव निमित्तभतोऽपि सन् यदि वा देध विदध इदं जगत्ससर्ज यदि वा न ससर्ज। असन्दिग्धे सन्दिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा। स एव विदधे। तं को वेद। अजानन्तोऽपि बहवो जडात्प्रधानादकर्तृकमेवेदं जगत्स्वयमजायतेति विपरीतंप्रतिपन्ना विदधतो विधानमजानन्तोऽपि। स एवोपादानभूत इत्यपि को वेद। न कोऽपि उपादानादन्यस्तटस्थ एवेश्वरो विदध इति हि बहवः प्रतिपन्नाः। देवा अपि यन्न जानन्ति तदर्वाचीनानामेषां तत्परिज्ञाने कैव कथेत्यर्थः। यद्येवं जगत्सृष्टिन्तदुरवबोधना तर्हि सा

प्रमाणपद्धतिमध्यास्त इत्याशङ्क्य तत्सद्भाव ईश्वरो वेदं प्रमाणयति। यो अस्येति । अस्य भूतभौतिकात्मकस्य जगतो योऽध्यक्ष ईश्वरः परम उत्कृष्टे उत्यभूते व्योमन् व्योम्न्याकाश आकाशवन्निर्मले स्वप्रकाशे। यद्वा । अवतेस्तर्पणार्थादन्येभ्योऽपि दृश्यन्त इति मनिन्। नेड्वशि कृतीतीट्प्रतिषेधः।ज्वरत्वरेत्यादिना वकारोपधयोरूट्। सप्तम्या लुक् । न ङिसम्बुद्ध्योरिति न लोपप्रतिषेधः। व्योमनि विशेषेण तृप्ते । निरतिशयानन्दस्वरूप इत्यर्थः। यद्वा अवतिर्गत्यर्थः। व्योमनि विशेषेण गन्तव्ये। देशकालवस्तुभिरपरिच्छिन्न इत्यर्थः। अथवा अवतिर्ज्ञानार्थः। व्योमनि विशेषेण ज्ञातरि विशिष्टज्ञानात्मनि । ईदृशे स्वात्मनि प्रतिष्ठितः। श्रूयते हि सनत्कुमारनारदयोः संवादे। स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि। (छा० उ० ७-२४-१) ।इति । ईदृशो यः परमेश्वरः सो अङ्गेति प्रसिद्धौ। सोऽपि नाम वेद जानाति। यदि वा न वेद न जानाति। को नामान्यो जानीयात् । सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्य इत्यर्थः।

शब्दार्थ – **विसृष्टिः** – विविध प्रकार की सृष्टि। **दधे** – धारण किये हुये। **अध्यक्षः** – स्वामी ईश्वर। **परमे व्योमन्** – उत्कृष्ट सत्यरूप आकाश के सदृश अपने प्रकाश में या स्वरूप में। **अङ्ग** – हे प्रिय श्रोताओ।

हिन्दी अनुवाद – यह विविध प्रकार की सृष्टि जिस प्रकार उपादान और निमित्त कारण से उत्पन्न हुई है, यह कारण अर्थात् ईश्वर ही सृष्टि को धारण किये हुये है, उसके अतिरिक्त अन्य कोई धारण किये हुये नहीं है। इस सृष्टि को जो स्वामी ईश्वर उत्कृष्ट सत्य रूप आकाश के सदृश अपने प्रकाश में या आनन्द स्वरूप में प्रतिष्ठित है। हे प्रिय श्रोताओ ! यह सुख स्वरूप परमात्मा ही उसको जानता है । उसके अतिरिक्त इसको कोई नहीं जानता है।

व्याकरण –

विसृष्टिः – वि + सृज् + क्तिन् ।

दधे – धा धातु, लट् लकार, प्रथम पुरुष, एकवचन ।

व्योमन् – सप्तमी विभक्ति एकवचन, वैदिक रूप।

विशेष – मैक्डानल के अनुसार दधे – निर्मित किथा (**founded**) , परमे व्योमन् – उच्चतम अन्तरिक्ष में (**in the highest heaven**), अध्यक्षः – खोजने वाला (**Surveyor**)।

❋ ❋ ❋

द्वितीयं घटकम्

विष्णु-सूक्त

(मण्डल - १, सूक्त - १५४)

ऋषि - दीर्घतमा, देवता - विष्णु छन्द - त्रिष्टुम्

१ **विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ।**
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ।।

पद-पाठः विष्णोः । नु । कम् । वीर्याणि । प्र । वोचम् । यः । पार्थिवानि । विऽममे । रजांसि । यः । अस्कभायत् । उत्ऽस्थम् । विऽचक्रमाणः । त्रेधा । उरुऽगायः ।।

अन्वय - विष्णोः वीर्याणि नु कम् प्रवोचम्, यः पार्थिवानि रजांसि विममे, यः त्रेधा विचक्रमाणः उरुगायः उत्तरम् सधस्थम् अस्कभायत् ।

सायण - हे नराः ! विष्णोर्व्यापनशीलस्य देवस्य वीर्याणि वीरकर्माणि नु कम् अतिशीघ्रं प्रवोचं ब्रवीमि । अत्र यद्यपि नु कम् इति पदद्वयं तथापि यास्केन नवोत्तराणि पदानीत्युक्तत्वात् । (निघण्टु ३-१२) शाखान्तरे एकत्वेन पाठाच्च इत्येतस्मिन्नेवार्थे नु कम् इति पदद्वयम् । कानि तानीति तत्राह - यो विष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीन्यग्निवाय्वादित्यरूपाणि रजांसि विममे विशेषेण निर्ममे । अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः । तथा च मन्त्रान्तरम् - यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यस्यां परमस्यामुत स्थः (ऋग् १/१०८/९) । तैत्तिरीयेऽपि 'योऽस्यां पृथिव्यामस्यायुषे' त्युपक्रम्य यो द्वितीयस्यां तृतीयस्यां पृथिव्यामिति (तै० सं० १/२/१२/१) तस्माल्लोकत्रयस्य पृथिविशब्दवाच्यत्वम् । किं च यश्च उत्तरमुद्गततरम् अतिविस्तीर्णं सधस्थं सहस्थानं लोकत्रयाश्रयभूतं अन्तरिक्षं अस्कभायत् तेषामाधारत्वेन स्तम्भितवान् ! निर्मितवानित्यर्थः । अनेनान्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति । यद्वा यो विष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान् । रजःशब्दो लोकवाची लोकाः रजांस्युच्यन्त इति यास्केनोक्तत्वात् (निघण्टु ४/३/१९) किं च यश्च उत्तरमुद्गततरम् उत्तरभाविनं सधस्यं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोसप्तकं अस्कभायत् स्कम्भितवान् सृष्टवानित्यर्थः । स्कम्भेः 'स्तम्भस्तुम्भु' इति विहितस्य श्नः छन्दसि शायजपीति व्यत्ययेन शायजादेशः (पाणिनि ३/१/४८) । अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि

भूरादिलोकत्रयं विममे इत्यर्थः । भूरादिलोकत्रयमित्यर्थः । भूम्यामुपार्जितकर्मभोगार्थत्वादितरेषां लोकानां तत्कारणत्वात् । किं च यश्चोत्तरमुत्कृष्टरं सर्वेषां लोकानामुपरिभूतं, अपुनरावृत्तेस्तस्योत्कृष्टत्वम् । सधस्थमुपासकानां सहस्थानं सत्यलोकम् अस्कभायत् स्कम्भिवान् ध्रुवं स्थापितवान् । किं कुर्वन् त्रेधा विचक्रमाणः त्रिप्रकारं स्वसृष्टान् लोकान् क्रममाणः । विष्णोस्त्रेधाः क्रमणम् इदम् । विष्णुर्विचक्रमे' (१/२२/१७ ऋक्) इत्यादि श्रुतिषु प्रसिद्धम् । अत एवोरूगाय उरूभिर्महद्भिर्गीयमानः, अति प्रभूतं गीयमानो वा । य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्रवोचम् ।

शब्दार्थ – विष्णुः – व्यापनशील विष्णु देवता । **नु** – शीघ्र । **वीर्याणि** – वीर कार्यों को। **प्रवोचम्** – कहता हूँ। **पार्थिवानि** – पृथ्वी सम्बन्धी । **रजांसि** – रजःकणों को, लोकों को। **विममे** – विशेष रूप से बनाया । **अस्कभायत्** – स्तम्भित किया, आधार रूप से बनाया। **उत्तरम्** – अति उत्कृष्ट । **सस्धस्थम्** – साथ रहने का स्थान । **विचक्रमाणः** – लांघते हुये । **त्रेधा** – तीन प्रकार से, या तीन डगों में। **उरुगायः** – महान् पुरूषों से स्तुति किया जाता हुआ।

हिन्दी अनुवाद – **हे मनुष्यो ! मैं व्यापनशील विष्णु देवता के वीर कार्यों को बहुत शीघ्र कहता हूँ, जिस विष्णु ने पृथिवी सम्बन्धी रजःकणों अर्थात् अग्नि, वायु, आदित्य आदि विशेष लोकों की विशेष रूप से रचना की। और जिस विष्णु ने तीन प्रकार से या तीन डगों में अपने बनाये हुए लोकों को लांघते हुए एवं महान् पुरूषों से स्तुति किये जाते हुए होकर ऊँचे या अति उत्कृष्ट तीनों लोकों के आश्रयभूत साथ रहने के स्थान को स्तम्भित किया, आधार रूप से बनाया ।**

व्याकरण –

विष्णोः – 'विष्लृ व्याप्तौ' धातु से विष् + नु – विष्णु । षष्ठी विभक्ति का एकवचन ।

वीर्याणि – वीर् + यत् = वीर्य । नपुंसकलिंग, द्वितीया विभक्ति, बहुवचन ।

प्रवोचम् – 'प्र+ वच्' धातु, लङ् लकार, उत्तम पुरूष, एकवचन । छान्दस अट् का अभाव। वर्तमानकाल में 'लङ्' का प्रयोग ।

पार्थिवानि – पृथिवी + अण् – पार्थिव ।

अस्कभायत् – 'स्कम्भ' धातु लङ् लकार, प्रथम पुरूष, एकवचन । यहाँ 'श्ना' को वैदिक 'शायच्' आदेश हुआ । लोक में 'अस्कभ्नात्' रूप होगा।

विचक्रमाणः – वि + क्रम्' से लिट् के अर्थ में 'कानच्' प्रत्यय

त्रेधा – वि + मा धातु लिट् लकार, प्रथम पुरुष, एकवचन।

उरुगायः – 'उरूभिः गीयते' अर्थ में उरू + गै + अच् (अ) – उरूगाय ।

उत्तरम् – उत् + तरप् – उत्तर ।

सधस्थम् – सह + स्था + क – सधस्य ।

विशेष – 'त्रेधा विचक्रमाणः का अर्थ पीटर्सन ने 'तीन डगों में परिक्रमा करते हुये किया है। छन्द की पूर्ति के लिये 'वीर्याणि' एवं 'त्रेधा' उच्चारण करना चाहिये।

२ **प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।**

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।

पद-पाठः प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिऽस्थाः ।

यस्य । उरुषु । त्रिषु । विऽक्रमणेषु । अधिऽक्षियन्ति । भुवनानि । विश्वा ।।

अन्वय – यस्य उरुषु त्रिषु विक्रमणेषु विश्वा भुवनानि अधिक्षियन्ति तत् विष्णुः वीर्येण प्रस्तवते, भीमः कुचरः गिरिष्ठाः मृगः न ।

सायण – यस्येति वक्ष्यमाणत्वात् स इत्यवगम्यते । स महानुभावो वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तवते । स्तूयते सर्वैः । कर्मणि व्यत्ययेन शप् । वीर्येण स्तूयमानत्वे दृष्टान्तः, मृगो न सिंहादिरिव । यथा स्वविरोधिनो मृगयिता सिंहो भीमो भीतिजनक कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा गिरिष्ठाः पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते । अस्मिन्नर्थे निरूक्तं-मृगो न भीमः कुचरो गिरिष्ठा। मृग इव भीमः कुचरो गिरिष्ठा। मृगः मार्ष्टेर्गतिकर्मणः । भीमो बिभ्यत्यस्मात्। भीष्मोऽप्येतस्मादेव । कुचर इति चरतिकर्म कुत्सिततमथ चेद्देवताभिधानं क्वायं न चरतीति वा। गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा (नि० १-२०) । इति तद्वदयमपि मृगः शत्रूणां भीमः भयानकः सर्वेषां भीत्युपादानभूतः। परमेश्वराद् भीतिर्भीषास्माद् वातः पवते (तै० आ० ८.८.१) इत्यादिषु श्रुतिषु प्रसिद्धा। किं च कुचरः शत्रुवधादिकुत्सितकर्मकर्त्ता कुषु सर्वासु भूमिषु लोकत्रये सञ्चारी। यद्वा गिरिमन्त्रदिरूपायां वाचि सर्वदा वर्तमानः । किं च यस्य विष्णोरूरूषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातानि अधिक्षियन्ति आश्रित्य निवसन्ति स विष्णुः स्तूयते।

शब्दार्थ – **प्रस्तवते** – स्तुति किया जाता है। **भीमः** – भयानक । **कुचरः** – कुत्सित हिंसा आदि कार्य करने वाला, स्वतन्त्रता पूर्वक भूमि पर विचरण करने वाला । **गिरिष्ठाः** – पर्वतों में रहने वाला । **उरुषु** – विस्तीर्ण । **विक्रमणेषु** – डगों में । **अधिक्षियन्ति** – निवास करते हैं।

हिन्दी अनुवाद – **जिस विष्णु के लम्बे तीन डगों में सम्पूर्ण लोक आ जाते हैं या आश्रय लेकर निवास करते हैं, उस विष्णु की वीर कार्यों से स्तुति उसी प्रकार की जाती है, जिस प्रकार भयानक, कुत्सित हिंसा आदि कार्य करने वाले या स्वतन्त्रता पूर्वक भूमि पर विचरण करने वाले, पर्वत आदि उन्नत प्रदेशों में रहने वाले एवं विरोधियों को ढूंढ कर मारने वाले सिंह आदि**

की स्तुति की जाती है।

व्याकरण -

स्तवते – 'स्तु' धातु से कर्म कारक में लट् लकार, प्रथम पुरूष, एकवचन। व्यत्यय से 'यक्' के स्थान पर 'शप्' हुआ। वैदिक रूप। लोक में स्तूयते रूप होगा।

कुचरः – कु + चर् + ट।

मृगः – मार्ष्टि गच्छति अन्विषति अर्थ में मृज् + क – मृग। अथवा मृ + गम् + अ – मृग।

गिरिष्ठाः – गिरिषु तिष्ठति अर्थ में – गिरि + स्था + स्विप्।

विश्वा – विश्व पद प्रथमा विभक्ति, बहुवचन। लोक में 'विश्वानि' बनेगा।

वीर्येण – वीर् + यत् – वीर्य। तृतीया विभक्ति, एकवचन – वीर्येण।

विक्रमणेषु – वि + क्रम् + ल्युट् (अन) – विक्रमण। सप्तमी विभक्ति, बहुवचन – विक्रमणेषु।

अधिक्षियन्ति – अधि + क्षि, लट् लकार, प्रथम पुरूष, बहुवचन।

विशेष – सायण ने 'कुचरः' का अर्थ 'कुत्सित हिंसा आदि कर्म करने वाला' किया है। पीटर्सन के अनुसार इसका अर्थ है – स्वतन्त्रतापूर्वक विचरण करने वाला। सायण के अनुसार 'गिरिष्ठाः का अर्थ उन्नत प्रदेश में रहने वाला' है। पीटर्सन और मैक्डानल ने इसका अर्थ 'पर्वतों में विचरण करने वाला' किया है। सायण ने 'स्तवते' को कर्मवाच्य में मानकर 'स्तूयते' अर्थ किया, परन्तु पीटर्सन इसे ठीक नहीं मानता। उसके अनुसार यह कर्तृवाच्य ही हैं। विष्णु स्वयं अपने कार्यों की प्रशंसा करता है – **Vishnu praises, makes loud boast of his deeds**। 'वीर्येण' को उसने क्रिया-विशेषण मानकर **might** अर्थ किया। ग्रासमान ने 'तत्' को 'प्रस्तवते' का कर्म माना और 'वीर्येण' का अर्थ **might** किया – **Undertakes the glorious mighty deeds.** ।'

छन्द के आग्रह से 'वीर्येण' को वीरियेण और 'विक्रमणेष्वधि' को सन्धि तोड़कर 'विक्रमणेषु अधि' पढ़ना चाहिये।

३ प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः॥

पद-पाठः प्र। विष्णवे। शूषम्। एतु। मन्म। गिरिऽक्षिते। उरुऽगायाय। वृष्णे। यः। इदम्। दीर्घम्। प्रऽयतम्। सधऽस्थम्। एकः। विऽममे। त्रिऽभिः। इत् पदेभिः॥ ३॥

अन्वयः – यः इदम् दीर्घम् प्रयतम् सधस्थम् एकः त्रिभिः पदेभिः विममे, गिरिक्षिते उरुगायाय वृष्णे विष्णवे मन्म शूषम् प्र एतु ।

सायण – विष्णवे सर्वव्यापकाय शूषमस्मत् कृत्यादिजन्यं बलं महत्वं मन्म मननं स्तोत्रे मननीयं शूषं बलं वा विष्णुमेतु प्राप्नोतु। कर्मणः सम्प्रदानत्वात् चतुर्थी । कीदृशाय । गिरिक्षिते वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते । उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे कामानाम् । एवं महानुभावं शूषं प्राप्नोतु। कोऽस्य विशेषः – यो विष्णुरिदं प्रसिद्धं दृश्यमानं दीर्घमतिविस्तृतं प्रयतं नियतं सधस्थं सहस्थानं लोकत्रयमेक इत् एक एव अद्वितीयः सन् त्रिभिः पदेभिः पादैर्विममे विशेषेण निर्मितवान् ।

शब्दार्थ – शूषम् – बल । **प्र एतु** – प्राप्त होवे । **मन्म** – मननीय, स्तुति के योग्य। **गिरिक्षिते** – वाणियों में निवास करने वाले, उन्नत प्रदेश में रहने वाले । **वृष्णे** – कामनाओं को पूर्ण करने वाले। **दीर्घम्** – विस्तृत । **प्रयतम्** – नियमों में बंधा हुआ। **सधस्थम्** – सबका सम्मिलित रहने का स्थान। विममे – नाप लिया था।

हिन्दी अनुवाद – जिस विष्णु ने इस दृश्यमान अति विस्तृत नियमों में बंधे हुए सबके सम्मिलित स्थान लोकत्रय को अकेले ही तीन डगों में नाप लिया था, उस वाणियों में निवास करने वाले या उन्नत प्रदेश में रहने वाले, बहुतों के द्वारा स्तुति किये जाने वाले, कामनाओं को पूर्ण करने वाले और सर्वव्यापक विष्णु के लिये हमारा यह मननीय या स्तुति के योग्य बल, जो हमारे कृत्यों से उत्पन्न हुआ है, प्राप्त होवे ।

व्याकरण –

शूषम् – शूष् + घञ् ।

मन्म – मन् + मनिन् ।

गिरिक्षिते – गिरि + क्षि + क्विप् – गिरिक्षित् । गिरौ क्षयति अर्थ में ।

उरुगायाय – उरुभिः गीयते तस्मै । उरु + गा + यक् – उरूगाय । चतुर्थी विभक्ति, एकवचन – उरुगायाय।

प्रयतम् – प्र + यम् + क्त – प्रयत ।

सधस्थम् – सह + स्था + क – सधस्थ । 'सह' के 'ह' को 'ध' आदेश ।

विममे – वि + मा, धातु, लिट् लकार, प्रथम पुरूष, एकवचन ।

वृष्णे – वृष् + कनिन् (अन्) – वृषन् वेद में चतुर्थी का एकवचन ।

विशेष – उरुगायाय पद में 'गा' का अर्थ सायण ने 'गान करना' किया है। परन्तु पीटर्सन ने इसका अर्थ 'गमन करना' किया है और 'उरुगायाय' का अर्थ बड़े-बड़े पद वाला बैल

(**wide pacing bull**) किया है। 'शूषम्' की निष्पत्ति रॉथ के अनुसार 'श्वस्' धातु से होती है और इसका अर्थ **Piping sound** है।

छन्द पूर्ति के लिए 'शूषम्' को 'शु उषम्' उच्चारण करना चाहिये।

४ **यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।**

य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ।।

पद-पाठः यस्य ।त्री ।पूर्णा ।मधुना ।पदानि ।अक्षीयमाणा ।स्वधया ।मदन्ति ।

यः ।ऊँ इति ।त्रिऽधातु ।पृथिवीम् ।उत ।द्याम् ।एकः ।दाधार ।भुवनानि ।विश्वा ।।४ ।।

अन्वय – यस्य मधुना पूर्णा त्री पदानि अक्षीयमाणा स्वधया मदन्ति, य उ एकः पृथिवीम् द्याम् उत त्रिधातु विश्वा भुवनानि दाधार ।

सायण – यस्य विष्णोः मधुना मधुरेण दिव्यामृतेन पूर्णा पूर्णानि त्रीणि पदानि पादप्रक्षेपणानि अक्षीयमाणा स्वधया अन्नेन मदन्ति मादयन्ति तदाश्रितजनान् । य उ य एव पृथिवीं प्रख्यातां भूमिं द्यामुत द्योतनात्मकमन्तरिक्षं च विश्वा भुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च। यद्वा पृथिवीशब्देन अधोवर्तीन्यतलवितलादिसप्तभुवनानि उपात्तानि । द्यु शब्देन तदवान्तररूपाणि भूरादिसप्तभुवनानि। एवं चतुर्दशलोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि। त्रिधातु त्रयाणां धातूनां समाहारस्त्रिधातु । पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा। दाधार धृतवान् । तुजादित्वादभ्यासदीर्घत्वम् । उत्पादितवानित्यर्थः। छान्दोगारण्यके । तत्तेजोऽसृजत तदन्नमसृजत ता आप ऐक्षंतेति भूतत्रयसृष्टिमुक्त्वा हन्ताहमिमास्तस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणीत्यादिना त्रिवृत्करणसृष्टिरूपपादिता । छा० उ० ६.२.३-३.३ । यद्वा । त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः।

शब्दार्थ – पूर्णा – भरे हुये । **मधुना** – दिव्य अमृत से। **अक्षीयमाणा** – क्षीण न होते हुये। **स्वधया** – अन्न के द्वारा । **मदन्ति** – आनन्दित करते हैं। **त्रिधातु** – पृथिवी-जल-तेज इन तीनों धातुओं से युक्त। **उत** – और। **दाधार** – धारण करता है।

हिन्दी अनुवाद – जिस विष्णु के दिव्य अमृत से भरे हुए तीन पद कभी क्षीण न होते हुए अन्न के द्वारा आनन्दित करते हैं, और जो अकेला ही विस्तृत भूलोक को, द्यु लोक और अन्तरिक्ष लोक को, तीन धातुओं-पृथिवी, जल, तेज से युक्त बनाता हुआ सभी लोकों को धारण करता है।

व्याकरण-

त्री – 'जस्' का लोप और 'त्रि' को दीर्घ। वैदिक रूप। लोक में 'त्रीणि' होगा।

अक्षीयमाणा – क्षि + यक् + (मुक् का आगम) + शानच् – क्षीयमाण । न + क्षीयमाण – अक्षीयमाण ।

पूर्णा – लोक में पूर्णानि होगा ।

मदन्ति – 'मदी हर्षे' धातु 'लट् लकार' प्रथम पुरूष, बहुवचन। लोक में 'मदयन्ति' या 'माद्यन्ति' रूप होगा।

त्रिधातु – त्रयाणां धातूनां समाहारः ।

विश्वा – वैदिक रूप । लोक में 'विश्वानि' होगा ।

द्याम् – द्यो शब्द, द्वितीया का एकवचन ।

दाधार – धृ धातु, लिट् लकार, प्रथम पुरूष, एकवचन। वर्तमान काल में लिट् ।

विशेष – सायण ने 'स्वधा' का अर्थ 'अन्न' किया है। परन्तु वेदों में अनेक स्थानों पर इस शब्द के प्रयोग को देखकर रॉथ ने अनेक अर्थ बताये – **accustomed place, home, comfort, contentment, sweet drink, oblation** ।

छन्द के आग्रह से सन्धि तोड़कर पदान्यक्षीयमाणा को 'पदानि अक्षीयमाणा' पढ़ना चाहिये।

५ **तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।**
उरूक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ।।

पद-पाठः तत् । अस्य । प्रियम् । अभि । पाथः । अश्याम् । नरः । यत्र । देवऽयवः । मदन्ति । उरुऽक्रमस्य । सः । हि । बन्धुः । इत्था । विष्णोः । पदे । परमे । मध्वः । उत्सः ।।५ ।।

अन्वय – अस्य प्रियम् तत् पाथः अभि अश्याम्, यत्र देवयवः नरः मदन्ति । उरुक्रमस्य विष्णोः परमे पदे मध्वः उत्सः । इत्था सः हि बन्धुः ।

सायण – अस्य महतो विष्णोः प्रियं प्रियभूतं तत् सर्वैः प्रसिद्धं पाथः अन्तरिक्षं (नि० ६. ७) अविनश्वरं ब्रह्मलोकमित्यर्थः । अभि अश्यां व्याप्नुयामित्यर्थः । तदेव विशेष्यते – यत्र स्थाने देवयवः देवं द्योतनस्वभावं विष्णुमात्मने इच्छन्तः यज्ञदानादिभिः प्राप्तुमिच्छन्तो नराः मदन्ति तृप्तिमनुभवन्ति तदश्यामित्यन्वयः । पुनरपि तदपि विशेष्यते – उरुक्रमस्य सर्वं जगद् आक्रममाणस्य विष्णोर्व्यापनशीलस्य परमेश्वरस्य परमे उत्कृष्टे पदे स्थाने मध्वः मधुरस्य उत्सः निष्यन्दो भवति। तदश्याम् – यत्र क्षुतृष्णा जरामरणपुनरावृत्त्यादिभयं नास्ति । इत्था इत्थमुक्तप्रकारेण स हि बन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतः तस्य पदं प्राप्तवता न च पुनरावृत्तेः। न च पुनरावर्तते इति श्रुतेस्तस्य बन्धुत्वम्। हि शब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ।

शब्दार्थ – पाथः – लोक को । **अभि अश्याम्** – प्राप्त करूँ । **देवयवः** – विष्णु देवता के भक्त। **मदन्ति** – आनन्दित होते हैं। **उरूक्रमस्य** – परम पराक्रम वाले, महान् डगों वाले। **इत्था** –

इस प्रकार से। मध्वः -मधुर अमृत का। उत्सः - स्रोत।

हिन्दी अनुवाद – इस विष्णु के प्रिय उस लोक को (मैं) प्राप्त करूँ, जहाँ उस विष्णु देव के भक्त जन आनन्द का अनुभव करते हैं। परम पराक्रम वाले अथवा महान् डगों वाले सर्वव्याप्क विष्णु के परम स्थान में मधुर अमृत का स्रोत है। इस प्रकार से वह विष्णु निश्चय से सबका बन्धु है।

व्याकरण -

अश्याम् - अश् धातु, आशीर्लिङ्, उत्तम पुरूष, एकवचन ।

पाथः - पा + असुन् (थुट् का आगम) ।

देवयवः - देव + यु + क्विप् - देवयु । प्रथमा विभक्ति का बहुवचन ।

मदन्ति - मद् धातु, लट् लकार, प्रथम पुरूष, बहुवचन ।

इत्था - 'इत्थम्' का वैदिक रूप ।

मध्वः - 'मधु' शब्द षष्ठी विभक्ति का एकवचन । लोक में 'मधुनः' बनेगा।

विशेष - लौकिक संस्कृत में 'पाथस्' का अर्थ जल है। सायण ने ऋग्वेद १/४७/३३ में, पाथस् का अर्थ स्नान किया है। पिशेल ने इत्था का अर्थ 'अत्र' किया है और 'इत्था बन्धुः' का अर्थ किया है - यह मित्रों का समाज है (**This is the society of friends**)।

६ **ता वां वास्तूंन्युश्मसि गमंध्यै यत्र गावो भूरिंशृङ्गा अयासः ।**
अत्राह तदुंरुगायस्य वृष्णः परमं पदमवं भाति भूरिं ।।

पद-पाठः ता । वाम् । वास्तूंनि । उश्मसि । गमंध्यै । यत्रं । गावंः । भूरिंऽशृङ्गाः । अयासंः । अत्रं । अहं । तत् । उरुऽगायस्यं । वृष्णंः । परमम् । पदम् । अवं । भाति । भूरिं ।।६ ।।

अन्वय - यत्र भूरिशृङ्गाः गावः अयासः, वाम् ता वास्तूनि गमध्यै उश्मसि। अत्र अह उरुगायस्य वृष्णः तत् परमम् पदम् भूरि अव भाति ।

सायण - हे पत्नीयजमानौ ! वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनाथ उश्मसि कामयामहे। तदर्थं विष्णुं कामयामहे इत्यर्थः । **तानि कानीत्याह** - यत्र येषु वास्तुषु गावो रश्मयो भूरिशृङ्गाः अत्यन्तोन्नताः बहुभिराश्रयणीया वा । अयासः अयना गन्तारोऽतिविस्तृताः । यद्वा यासः गन्तारः, अतादृशाः अत्यन्तप्रकाशयुक्ता इत्यर्थः। अत्राह - अत्र खलु वास्त्वाध.रभूते द्युलोके उरूगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोस्तत् तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अतिप्रभूतमवभाति स्वमहिम्ना स्फुरति। यत्र

गाव: भूरिशृङ्गा बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सत:। शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा। अयासोऽयना: तत्र तदुरुगायस्य विष्णोर्महागते: परमं पदं परार्ध्यस्थमवभाति भूरि स्वमहिम्ना स्फुरति। पाद: पद्यते (नि० २-७) इति।

शब्दार्थ – वास्तूनि – निवास योग्य स्थान या लोक । **उश्मसि** – कामना करते हैं। **गमध्यै** – जाने के लिये। **गाव:** – गौवें, किरणें। **भूरिशृङ्गा:** – बड़े ऊँचे सीगों वाली, अनेक प्रकार से फैलने वाली। **अयास:** – निवास करती हैं, प्रकाश से युक्त हैं। **अह** – निश्चय से। **अवभाति** – प्रकाशित हो रहा है। **भूरि** – अत्यधिक ।

हिन्दी अनुवाद – हे यजमान और हे यजमान पत्नी ! जहाँ बड़े बड़े ऊंचे सींगों वाली गौवें अथवा अनेक प्रकार से फैलने वाली किरणें निवास करती हैं या अत्यधिक प्रकाश से युक्त हैं, तुम दोनों के उन निवास योग्य स्थानों या लोकों पर जाने के लिये हम कामना करते हैं। यहाँ निश्चय ही महान् जनों से या बहुतों से स्तुति किये जाने वाले और कामनाओं को पूरा करने वाले विष्णु देव का परम पद या सर्वोत्कृष्ट अन्तरिक्ष लोक अत्यधिक रूप से प्रकाशित हो रहा है।

व्याकरण –

ता – वैदिक रूप है। लोक में 'तानि' होगा ।

गमध्यै – 'गम्' धातु से 'तुमुन्' प्रत्यय के अर्थ में वैदिक 'अध्यैन्' प्रत्यय ।

वाम् – युवयो: का रूप है।

उश्मसि – 'वश् कान्तौ' धातु, लट् लकार, उत्तम पुरूष, बहुवचन । छान्दस रूप ।

अयास: – 'इण् गतौ' + अच् – अय । प्रथमा विभक्ति का बहुवचन वैदिक रूप ।

अवभाति – अव + भा धातु लट् लकार, प्रथम पुरूष, एकवचन ।

विशेष – सायण ने यहाँ 'वाम् का अर्थ 'यजमान और उसकी पत्नी' किया है। परन्तु पाश्चात्य विद्वानों ने इस अर्थ को ठीक नहीं माना। उनके अनुसार यहाँ 'विष्णु' और उसके साथी 'इन्द्र' इन दो देवताओं को ग्रहण करना चाहिये। 'अयास:' का अर्थ मैक्डानल ने 'द्रुतगामी' (**nimble**) एवं पीटर्सन ने 'अविश्रान्त' (**unresting**) किया है। मैक्डानल और पीटर्सन के अनुसार 'भूरिशृङ्गा: गाव:' का अर्थ 'अनेक सींगों वाली गौवें, है।

रूद्र सूक्त

(मण्डल -२, सूक्त-३३)

ऋषि - गृत्समद देवता - रूद्र छन्दः - त्रिष्टुप्

१ आ ते॑ पितर्मरुतां सु॒म्नमे॑तु मा न॒ः सुर्यस्य स॒ंदृशो॑ युयोथाः ।

अ॒भि नो॑ वी॒रो अर्वति क्षमेत॒ प्र जा॑येमहि रुद्र प्र॒जाभि॑ः ।।

पद-पाठः आ । ते॒ । पि॒तः॒ । म॒रू॒ता॒म् । सु॒म्नम् । ए॒तु॒ । मा । न॒ः । सूर्यस्य । स॒म्ऽदृशः । यु॒यो॒था॒ः । अ॒भि । न॒ः । वी॒रः । अर्वति । क्ष॒मे॒त॒ । प्र । जा॒ये॒म॒हि॒ । रू॒द्र॒ । प्र॒जाऽभिः॑ । ।१ ।।

अन्वय – मरूताम् पितः ते सुम्नम् आ एतु । नः सूर्यस्य संदृशः मा युयोथाः । अर्वति नः वीरः अभिक्षमेत । रूद्र ! प्रजाभिः प्रजायेमहि ।

संस्कृत-व्याख्या – हे मरूतां पितः मरूत्संज्ञकानां देवानामुत्पादक रूद्र ! ते त्वदीयं सुम्नम् अस्मभ्यं दातव्यं सुखम् आ एतु आगच्छतु । तथा त्वम् नः अस्मान् सूर्यस्य भानोः संदृशः संदर्शनात् मा युयोथाः मा वियुज्यस्व । अर्वति शत्रौ नः अस्माकं वीरः वीर्यवान् पुत्रादिः अभिक्षमेत समर्थो जायेत। अथवा वीरस्त्वं नोऽस्मान् अभिक्षमेत । हे रूद्र । प्रजाभिः पुत्रपौत्रादिभिः प्रजायेमहि वयं प्रभूताः स्याम ।

शब्दार्थ – **मरूताम् पितः** = हे मरुत् नामक देवताओं के पिता। **सुम्नम्** – सुख । **आ एतु** – प्राप्त होवे । **संदृशः** – दर्शन से । **युयोथाः** – वियुक्त करो । **वीरः** – वीर पुत्र । **अर्वति** – शत्रुओं के सम्बन्ध में । **अभिक्षमेत** – अभिभव करने में समर्थ हो। **प्रजायेमहि** – वृद्धि को प्राप्त होवें। **प्रजाभिः** = सन्तानों के द्वारा ।

हिन्दी अनुवाद – हे मरुत् नामक देवताओं के पिता रूद्र ! तुम्हारे द्वारा हमें देने योग्य सुख हमको प्राप्त होवे। तुम हमें सूर्य के दर्शन से वियुक्त मत करो। शत्रुओं के सम्बन्ध में हमारे वीर पुत्र उनका अभिभव करने में समर्थ हों। हे रुद्र ! सन्तानों के द्वारा हम वृद्धि को प्राप्त होवें।

व्याकरण -

पितः – पितृ शब्द, सम्बोधन, एकवचन ।

एतु – इण् धातु, लोट् लकार, प्रथम पुरूष, एकवचन ।

युयोथाः – 'यु मिश्रणामिश्रणयोः' धातु, लङ् लकार, मध्यम पुरूष ए०व० । छान्दस रूप।

क्षमेत – क्षम् धातु, विधिलिङ्, प्रथम पुरूष, एकवचन ।

जायेमहि – जन् धातु, विधिलिङ्, उत्तम पुरूष, बहुवचन ।

विशेष – मैक्डानल ने 'सुम्नम्' का अर्थ 'सदिच्छा' (**goodwill**) किया है। उसने 'अर्वत्' का अर्थ घोड़ा करके तीसरे पाद की व्याख्या इस प्रकार की है – **May he hero be merciful to us in regard to our steeds.**

२ त्वादत्तेभी रूद्र शंतमेभिः शतंहिमा अशीय भेषजेभिः ।

व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ।।

पद-पाठः त्वाऽदत्तेभिः ।रूद्र ।शम्ऽतमेभिः ।शतम् ।हिमाः ।अशीय ।भेषजेभिः । वि ।अस्मत् ।द्वेषः । विऽतरम् ।वि ।अंहः ।वि ।अमीवाः ।चातयस्व ।विषूचीः ।।२ ।।

अन्वय – रूद्र ! त्वादत्तेभिः भेषजेभिः शतं हिमाः अशीय ।अस्मत् द्वेषः विचातयस्व, अंहः वितरम् अमीवाः वि विषूचीः ।

संस्कृत-व्याख्या – हे रूद्र ! त्वादत्तेभिः त्वया दत्तैः शंतमेभिः अतिशयेन सुखकरैः भेषजेभिः ओषधैः शतं हिमाः शतसंवत्सरान् अशीय व्याप्नुयाम् ।अपि च अस्मत् अस्मत्तः द्वेषः द्वेष्टृन् विचातयस्व विनाशय तथा अहः पापं वितरम् अत्यन्तं विचातयस्व, विषूचीः विविध प्रकारैः वपुषि व्याप्तान् अमीवाः रोगान् विषूचीः विषु नानाञ्चतीः कृत्स्नशरीरव्यापकान् रोगान् विचातयस्व अस्मत्तः पृथक्कृत्य विनाशय ।

शब्दार्थ – त्वादत्तेभिः – तुम्हारे द्वारा दी गई ।**शंतमेभिः** – अत्यधिक कल्याण करने वाली।**हिमाः** – हिमन्त ऋतुओं तक।**अशीय** – व्याप्त रहें।**द्वेषः** – द्वेष करने वालों को।**वितरम्** – अत्यधिक ।**अंहः** – पाप को ।**अमीवाः** – रोगों को ।**विचातयस्व** – नष्ट कर दो।**विषूचीः** – नाना प्रकार से शरीर में व्याप्त होने वाले ।

हिन्दी अनुवाद – हे रूद्र ! तुम्हारे द्वारा दी गई अत्यधिक कल्याण करने वाली औषधियों से हम सौ हेमन्त ऋतुओं तक अर्थात् सौ वर्ष तक व्याप्त रहें अर्थात् जीवित रहें। तुम हमसे द्वेष करने वालों को नष्ट कर दो, पाप को अत्यधिक नष्ट कर दो ।नाना प्रकार से शरीर में व्याप्त होने वाले रोगों को नष्ट कर दो ।

व्याकरण –

शंतमेभिः, भेषजेभिः – तृतीया के बहुवचन में वैदिक रूप है।लोक में शंतमैः, भेषजैः रूप बनेंगे।

त्वादत्तसेभिः – त्वया दत्तैः ।छान्दस रूप ।

अशीय – अश् धातु, विधिलिङ्, उत्तम पुरूष, एकवचन ।

द्वेषः – द्विष् + विच् – द्वेष् ।द्वितीया का बहुवचन ।

विचातयस्व – णिजन्त चत् धातु लोट् लकार, मध्यम पुरूष, एकवचन ।

विशेष - मैक्डानल के अनुसार इस मन्त्र का अर्थ कुछ भिन्न है। उसने 'शंतमेभि:' का अर्थ 'लाभदायक प्रभाव रखने वाली' (**most salutary**) 'द्विष:' का अर्थ 'घृणा करने वाले' (**hatred**) और 'अंह:' का अर्थ कष्ट (**distress**) किया है। उसके अनुसार 'विषूची:' विशेषण नहीं अपितु क्रिया, विशेषण है और 'अमीवा: विचातयस्व विषूची:' का अर्थ है - **Drive away diseases in all directions.**

३ **श्रेष्ठौ जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।**

पर्षि ण: पारमंहस: स्वस्ति विश्वा अभीती रपसो युयोधि ।।

पद-पाठ: श्रेष्ठ: । जातस्य । रूद्र । श्रिया । असि । तव:ऽतम: । तवसाम् । वज्रबाहो इति वज्रऽबाहो । पर्षि । न: । पारम् । अंहस: । स्वस्ति । विश्वा: । अभिऽइती: । रपस: । युयोधि ।।

अन्वय - रूद्र ! जातस्य श्रिया श्रेष्ठ: असि । वज्रबाहो ! तवसा तवस्तम: । न: अंहस: पारम् स्वस्ति पर्षि । रपस: विश्वा: अभीती: युयोधि ।

संस्कृत-व्याख्या - हे रूद्र ! जातस्य उत्पन्नस्य सर्वस्य जगत: मध्ये श्रिया ऐश्वर्येण श्रेष्ठ: प्रशस्यतम: असि भवसि, तथा हे वज्रबाहो बज्रायुधहस्त रुद्र ! तवसां प्रवृद्धानां बलशालिनां मध्ये तवस्तम: अतिशयेन प्रवृद्ध: बलशाली असि। स त्वम् न: अस्मान् अंहस: पापस्य पारं तीरं स्वस्ति क्षेमेण पर्षि पारय । तथा रपस: पापस्य विश्वा: सर्वा: अभीती: अभिगमनानि युयोधि पृथक् कुरू।

शब्दार्थ - जातस्य - उत्पन्न हुये इस सम्पूर्ण जगत् में । **श्रिया** - ऐश्वर्य से। **तवस्तम:** - सबसे अधिक बलशाली । **तवसाम्** - बलशाली व्यक्तियों में। **वज्रबाहो** - हे वज्र को हाथों में ध ारण करने वाले। **पर्षि** - पार करा दो। **अंहस** - पाप के। **स्वस्ति** - कल्याणपूर्वक। **विश्वा:** - सभी। **अभीती:** - आगमनों को। **रपस:** - पाप के। **युयोघि** - पृथक् कर दो।

हिन्दी अनुवाद - **हे रुद्र ! उत्पन्न हुये इस सम्पूर्ण जगत् में तुम अपने ऐश्वर्य से सबसे श्रेष्ठ हो। वज्र को हाथों में धारण करने वाले हे रुद्र ! तुम बलशाली व्यक्यिों में सबसे अधिक बलशाली हो । हमको तुम पाप के पार कल्याण पूर्वक पार करा दो और पाप के सभी आगमनों को हमसे पृथक् कर दो।**

व्याकरण -

जातस्य - जन् + क्त - जात । षष्ठी का एकवचन ।

तवस्तम: - तवस् + तमप् - तवस्तम ।

पर्षि - पृ धातु, लोट् लकार, मध्यम पुरूष, एकवचन, वैदिक रूप ।

अभीती: - अभि + इ + क्तिन् - अभीति । द्वितीया का बहुवचन ।

युयोधि – यु धातु, लोट् लकार, मध्यम पुरूष, एकवचन, वैदिक रूप ।

विशेष – मैक्डानल के अनुसार 'श्रिया' का अर्थ 'यश' (glory) और 'रपस:' का अर्थ 'बुराइयाँ' (mischief) है।

४ **मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।**
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ।।

पद-पाठः मा ।त्वा ।रुद्र ।चुक्रुधाम ।नमः ऽभिः ।मा ।दुःस्तुती ।वृषभ ।मा ।सऽहूती। उत् ।नः ।वीरान् ।अर्पय ।भेषजेभिः ।भिषक्ऽतमम् ।त्वा ।भिषजाम् ।शृणोमि ।।४ ।।

अन्वय – रूद्र ! त्वा नमोभिः मा चुक्रुधाम ।वृषभ ! दुष्टुती मा सहूती मा ।नः वीरान् उत् भेषजेभिः अर्पय ।त्वा भिषजाम् भिषक्तमम् शृणोमि ।

संस्कृत-व्याख्या – हे रूद्र ! त्वा त्वाम् नमोभिः नमस्कारैर्हविभिर्वा मा चक्रुधाम मा क्रोधयाम। हे वृषभ ! कामानां वर्षितः दुष्टुती दुःस्तुत्या मा चुक्रुधाम । तथा सहूती सहूत्या विसदृशैरन्यैर्देवैः सह आह्वनेन मा क्रोधयाम । स त्वम् नः अस्माकं वीरान् पुत्रान् भेषजेभिः औषधैः उत् अर्पय उत्कृष्टं संयोजय ।हे रूद्र ! त्वा त्वां भिषजां चिकित्सकानां मध्ये भिषक्तमम् अतिशयेन भैषज्यकर्तारं शृणोमि ।

शब्दार्थ – चुक्रुधाम – क्रोधित करें। **नमोभिः** – अनुचित प्रकार से किये गये नमस्कारों से। **दुःस्तुतीः** – बुरी स्तुतियों द्वारा । **वृषभ** – कामनाओं की वर्षा करने वाले । **सहूती** – छोटे देवताओं के साथ तुम्हारा आह्वान करके । **वीरान्** – पुत्र आदि को । **अर्पय** – संयुक्त करो। **भिषक्तमम्** – सबसे श्रेष्ठ चिकित्सक ।

हिन्दी अनुवाद – हे रूद्र ! हम तुमको अनुचित प्रकार से किये गये नमस्कारों से क्रोधित न करें। कामनाओं की वर्षा करने वाले हे रुद्र ! हम बुरी स्तुतियों द्वारा तुमको क्रोधित न करें और अन्य छोटे देवताओं के साथ तुम्हारा आह्वान करके तुमको क्रोधित न करें। तुम हमारे पुत्र आदि को ओषधियों से संयुक्त करो। हे रुद्र ! मैं तुमको चिकित्सकों में सबसे श्रेष्ठ चिकित्सक सुनता हूँ।

व्याकरण –

चुक्रधाम – क्रुध् धातु लुङ् लकार, उत्तम पुरूष, बहुवचन ।

दुष्टुती – दुस् + स्तुति – दुष्टुती ।

सहूती – हे + क्तिन् – हूति ।समाना हूतिः – सहूति । तृतीया का एकवचन, वैदिक रूप।

भेषजेभिः – भेषज का तृतीया का एकवचन ।

अर्पय - णिजन्त ऋ धातु, लोट लकार, मध्यम पुरूष, एकवचन ।

विशेष - यहाँ मैक्डानल ने 'वृषभ' का अर्थ 'बैल' (**bull**) और 'वीर' का अर्थ 'योद्धा' (hero) किया है।

५ **हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रूद्रं दिषीय ।**

ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ।।

पद-पाठः हवींमऽभिः ।हवते ।यः ।हविःऽभिः ।अव ।स्तोमेभिः ।रूद्रम् ।दिषीय ।

ऋदूदरः ।सुऽहवः ।मा ।नः अस्यै ।बभ्रुः ।सुऽशिप्रः ।रीरधत् ।मनायै ।।६ ।।

अन्वय - यः हविर्भिः हवीमभिः हवते रूद्रम् स्तोमेभिः अवदिषीय ।ऋदूदरः सुहवः बभ्रुः सुशिप्रः अस्यै मनाये नः मा रीरधत् ।

संस्कृत व्याख्या - यः रूद्रः हविर्भिः चरूपुरोडाशादिभिः सहितैः, हवीमभिः आह्वानैः हवते आहूयते तं रूद्रं एतन्नामकं देवं स्तोमेभिः स्तोत्रैः अवदिषीय अवखण्डयामि अपगतक्रोधं करोमि इति भावः । ऋदूदरः मृदुमध्यः सुहवः शोभनाह्वानः बभ्रुः भर्ता बभ्रुवर्णो वा सुशिप्रः शोभनहनुः स रुद्रः अस्यै मनायै हन्मीति बुद्ध्या नः अस्मान् मा रीरधत् मा वशं नैषीत् ।

शब्दार्थ - **हवीमभिः** - आह्वानों से ।**हवते** - बुलाया या स्तुति किया जाता है।**स्तोमेभिः** - स्तुतियों के द्वारा ।**अवदिषीय** - खण्डित करता हूँ, क्रोधरहित करता हूँ। **ऋदूदरः** - कोमल उदर वाला।**सुहवः** - सुन्दर आह्वान के योग्य ।**बभ्रुः** - भरण पोषण करने वाला, भूरे रंग का। **सुशिप्रः** - सुन्दर हनु वाला।**रीरधत्** - हिंसा न करें।**मनायै** - मार डालूँ, इस विचार से।

हिन्दी अनुवाद - जिस रूद्र को चरू पुरोडाश आदि से युक्त हवियों वाले आह्वानों से बुलाया या स्तुति किया जाता है, उस रुद्र को मैं स्तुतियों के द्वारा खण्डित करता हूँ अर्थात् क्रोध रहित करता हूँ।कोमल उदर वाला, सुन्दर आह्वान के योग्य, भरण-पोषण करने वाला या भूरे रंग का और सुन्दर हनु वाला वह रुद्र देवता इस विचार से, कि मैं इसको मार डालूँ, वशीभूत होकर हम लोगों की हिंसा न करे।

व्याकरण -

हवते - ह्वे धातु (कर्मवाच्य), लट् लकार, प्रथम पुरूष, एकवचन ।

स्तोमेभिः - स्तोम शब्द, तृतीया विभक्ति, बहुवचन, वैदिक रूप ।

ऋदूदरः - ऋदु उदरं यस्य स ।

दिषीय - 'दिङ्' क्षये या 'दो' अवखण्डने धातु, लिङ् लकार, उत्तम पुरूष, एकवचन। वैदिक रूप है।

रीरधत् – 'रध् हिंसासंराद्धयो:' धातु, लिङ् लकार, उत्तम पुरूष, एकवचन का ण्यन्त रूप ।

विशेष – मैक्डानल ने 'ऋदूदर:' का अर्थ 'दयालु' (**Compessionate**) और 'सुशिप्र:' का अर्थ 'सुन्दर होठों वाला' (**fair lipped**) किया है।

६ उन्मा ममन्द वृषभो मरूत्वान् त्वक्षीयसा वयसा नाधमानस् ।

घृणीव छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ।।

पद-पाठः उत् । मा । ममन्द । वृषभः । मरूत्वान् । त्वक्षीयसा । वयसा । नाधमानस् ।

घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रूद्रस्य । सुम्नम् ।। ६ ।।

अन्वय – वृषभ: मरूत्वान् नाधमानम् मा त्वक्षीयसा वयसा उत् ममन्द । अरपा: घृणीव छायाम् रुद्रस्य सुम्नम् अशीय । आविवासेयम् ।

संस्कृत व्याख्या – वृषभ: कामानां वर्षिता, मरूत्वान् मरूद्भिर्युक्तो रुद्र: नाधमानं याचमानं मा मां त्वक्षीयसा दीप्तेन वयसा अन्नेन उत् ममन्द उत्कर्षेण तर्पयतु । अपि चाहम् घृणीव छायाम् यथा सूर्य किरणसन्तप्त: छायां प्रविशति एवं रूद्रस्य सुम्नं सुखम् अरपा: अपाप: सन् अशीय व्याप्नुयाम् । तदर्थं तं रूद्रम् आविवासेयं परिचरेयम् ।

शब्दार्थ – **मा** – मुझको । **उत् ममन्द** – उत्कृष्ट रूप से तृप्त करे। **वृषभः** – कामनाओं की वर्षा करने वाला । **मरूत्वान्** – मरूत् नामक देवताओं से युक्त होता हुआ । **त्वक्षीयसा** – दीप्तिमान्। **वयसा** – अन्न से, आयु से । **नाधमानम्** – याचना करने वाले । **घृणी** – सूर्य की किरणों से सन्तप्त मनुष्य। **इव** – जैसे। **अरपाः** – पाप से रहित होता हुआ। **अशीय** – व्याप्त करूँ। **आविवासेयम्** – परिचर्या करूँ। **सुम्नम्** – सुख को।

हिन्दी अनुवाद – कामनाओं की वर्षा करने वाला और मरूत् नामक देवताओं से युक्त होता हुआ वह रुद्र याचना करने वाले मुझको दीप्तिमान् अन्न से या आयु से उत्कृष्ट रूप से तृप्त करे। पाप से रहित होता हुआ मैं, जिस प्रकार सूर्य से संतप्त मनुष्य छाया का आश्रय लेता है उसी प्रकार उस रूद्र के सुख को व्याप्त करूँ और इस सुख को प्राप्त करने के लिये रुद्र की परिचर्या करूँ।

व्याकरण –

मरुत्वान् – मरुत: अस्य सन्ति । मरुत् + मतुप् (वत्) – मरुत्वत्।

त्वक्षीयसा – त्वक्ष् + ईयसुन् – त्वक्षीयस्। तृतीया का एकवचन ।

ममन्द – मदि (मन्द्) धातु, लिट् लकार, प्रथम पुरूष, एकवचन ।

नाधमानम् – नाध् + (शप्) + (मुक्) + शानच् – नाधमान ।

अशीय – अश् धातु, विधिलिङ्, उत्तम पुरूष, एकवचन ।

विवासेयम् – वि + वास् धातु, विधिलिङ्, उत्तम पुरूष, एकवचन ।

विशेष – मैक्डानल ने 'त्वक्षीयसा वयसा' का अर्थ 'ओजस्वी शक्ति (**Vigorous force**) किया है। उसके अनुसार 'अरपा:' का अर्थ 'अक्षत' (**unscached**) और 'सुम्न' का अर्थ 'सद्भावना' (**goodwill**) है।

७ क्व१॒स्य ते॑ मृळ॒याकु॒र्हस्तो॒ यो अस्ति॑ भेष॒जो जला॑षः ।

अ॒प॒भ॒र्ता रप॑सो॒ दैव्य॑स्या॒भी नु मा॑ वृषभ चक्षमीथाः ।।

पद-पाठः क्व॑ । स्यः । ते॒ । रु॒द्र॒ । मृ॒ळ॒याकुः॑ । हस्तः॑ । यः । अस्ति॑ । भे॒ष॒जः । जला॑षः ।
अ॒प॒ऽभ॒र्ता । रप॑सः । दैव्य॑स्य । अ॒भि । नु । मा॒ । वृ॒ष॒भ॒ । च॒क्ष॒मी॒थाः॒ ।।७ ।।

अन्वय – रुद्र ! ते मृळयाकुः स्यः हस्तः क्व यः भेषजः जलाषः अस्ति । वृषभ ! दैव्यस्य रपसः अपभर्ता मा नु अभिचक्षमीथाः ।

संस्कृत व्याख्या – हे रुद्र ! ते तब मृळयाकुः सुखयिता स्यः सः हस्तः करः क्व कुत्र वर्तते ? यः हस्तः भेषजः भैषज्यकृत् जलाषः सर्वेषां सुखकरः अस्ति भवति। तेन हस्तेन मां रक्ष इति भावः। वृषभ हे कामानां वर्षितः ! दैव्यस्य देवकृतस्य रपसः पापस्य अपभर्ता विनाशयिता भूत्वा मा मां नु क्षिप्रम् अभिचक्षमीथाः अभिक्षमस्व ।

शब्दार्थ – स्यः – वह । **मुळयाकुः** – सुख देने वाला । **भेषजः** – चिकित्सा करने वाला । **जलाषः** – सुखदायी। **अपभर्ता** – नष्ट करने वाला। **रपसः** – पाप का। **दैव्यस्य** – देवताओं के, इन्द्रियों के । **अभिचक्षमीथाः** – शीघ्र क्षमा कर दीजिये ।

हिन्दी अनुवाद – हे रुद्र ! तुम्हारा सुख देने वाला वह हाथ कहाँ है ? जो चिकित्सा करने वाला और सुखदायी है। इस हाथ से आप मेरी रक्षा करें। कामनाओं की वर्षा करने वाले हे रुद्र ! देवताओं द्वारा अथवा इन्द्रियों द्वारा किये गये पाप को नष्ट करने वाले होते हुये आप मुझको शीघ्र क्षमा कर दीजिये।

व्याकरण –

स्वः – सर्वनाम त्यद् शब्द, पुंल्लिङ्ग, प्रथमा का एकवचन ।

अपभर्त्ता – अप + भृ + तृच् ।

जलाषः – लडयोरभेदः नियम से 'जलं जडतां स्यति खण्डयति' अर्थ में जल + षो अन्तकर्मणि + क – जलाष ।

चक्षमीथा – 'क्षमूष् सहने' धातु आत्मनेपदी, लोट् लकार, म० पु०, ए०व०, वैदिक रूप ।

विशेष – मैक्डानल के अनुसार 'मृडयाकु:' का अर्थ 'दयालु' (**merciful**), 'जलाष:' का अर्थ 'ठण्डक देने वाला' (**cooling**) और 'रपस:' का अर्थ 'क्षत' (**injury**) है। देवों द्वारा होने वाले क्षत को रुद्र दूर करता है।

८ **प्र बभ्रवे वृषभाय शिवतीचे महो महीं सुष्टुतिमीरयामि ।**
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ।।

पद-पाठः प्र । बभ्रवे । वृषभाय । शिवतीचे । महः । महीम् । सुऽस्तुतिम् । ईरयामि ।
नमस्य । कल्मलीकिनम् । नमःऽभिः । गृणीमसि । त्वेषम् । रुद्रस्य । नाम ।।

अन्वय – बभ्रवे वृषभाय शिवतीचे महः महीम् सुष्टुतिम् प्र ईरयामि । कल्मलीकिनम् नमोभिः नमस्य । रूद्रस्य त्वेषम् नाम गृणीमसि ।

संस्कृत व्याख्या – बभ्रवे विश्वस्य भर्त्रे बभ्रुवर्णाय वा वृषभाय कामानां वर्षित्रे शिवतीचे श्वैत्यमञ्चते रूद्राय महो महीं महतोऽपि महतीं सुष्टुतिं शोभनस्तुतिं प्र ईरयामि प्रकर्षेच्चारयामि । हे स्तोतः ! त्वं कल्मलीकिनं ज्वलन्तं रूद्रं नमोभिः नमस्कारैः नमस्य पूजय । वयं च रूद्रस्य देवस्य त्वेषं दीप्तं नाम गृणीमसि संकीर्तयामः ।

शब्दार्थ – बभ्रवे – भरण-पोषण करने वाले, भूरे रंग के । **शिवतीचे** – श्वेत रंग को धारण करने वाले । **महः महीम्** – महान् से भी महान् । **सुष्टुतिम्** – सुन्दर स्तुति का । **प्र ईरयामि** – उच्चारण करता हूँ। **नमस्य** – पूजन कर । **कल्मलीकिनम्** – कान्तिमान्। **गृणीमसि** – संकीर्तन करते हैं। **त्वेषम्** – प्रकाशमान।

हिन्दी अनुवाद – संसार का भरण-पोषण करने वाले या भूरे रंग के, कामनाओं की वर्षा करने वाले और श्वेत रंग को धारण करने वाले रूद्र के लिये हम महान् से भी महान् सुन्दर स्तुति का उच्च स्वर से उच्चारण करते हैं। हे स्तोता ! तुम तेजस्वी कान्तिमान् उस रुद्र का नमस्कारों के द्वारा पूजन करो। हम उस रूद्र के प्रकाशवान् नाम का संकीर्तन करते हैं।

व्याकरण –

शिवतीचे – 'शिवता वर्णे' धातु से औणादिक 'इन्' प्रत्यय – शिवति । शिवतिम् अञ्चति अर्थ में 'क्विन्' प्रत्यय-शिवतीच्। चतुर्थी विभक्ति का एकवचन ।

ईरयामि – णिजन्त ईर् धातु, लट् लकार उत्तम पुरूष, एकवचन ।

कल्मलीकिनम् – कल्मलीक + इनि – कल्मलीकिन् । द्वितीया का एकवचन ।

गृणीमसि – 'गृ संशब्दने' धातु, लट् लकार, उत्तम पुरूष, बहुवचन। वैदिक रूप ।

विशेष – सायण ने 'महोमहीम्' का अर्थ किया है – महतोऽपि महतीम् । परन्तु मैक्डानल इससे सहमत नहीं हैं। वे 'महः' को रुद्र का और 'महीम्' को 'सुष्टुति' का विशेषण मान कर अर्थ करते हैं – 'महान् रुद्र की महान् स्तुति' (**a mighty enology of the mighty one**)। उनके अनुसार 'त्वेषम्' का अर्थ 'भयानक' (**terrible**) है।

९ स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।

ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ।।

पद-पाठः स्थिरेभिः । अङ्गैः पुरुऽरूपः । उग्रः । बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः । ईशानात् । अस्य भुवनस्य । भूरेः । न । वै । ऊँ इति । योषत् । रूद्रात् । असुर्यम् ।।

अन्वय – स्थिरेभिः अङ्गैः पुरुरूपः उग्रः बभ्रुः शुक्रेभिः हिरण्यैः पिपिशे । अस्य भुवनस्य भूरेः ईशानात् रूद्रात् असुर्यम् न उ वै योषत् ।

संस्कृत-व्याख्या – स्थिरेभिः स्थिरैः अङ्गैः अवयवैः युक्तः पुरुरूपः अष्टमूर्त्यात्मकैर्बहुभिः रूपैः उपेतः उग्रः तेजस्वी बभ्रुः भर्ता बभ्रुवर्णो वा रुद्रः शुक्रेभिः दीप्तैः हिरण्यैः हिरण्मयैरलङ्कारैः पिपिशे दीप्यते। ईशानात् ईश्वरात् अस्य भुवनस्य भूतजातस्य भूरेः रुद्रात् महादेवात् असुर्यम् बलं न वा उ योषत्, नैव पृथग्भवति ।

शब्दार्थ – **स्थिरेभिः** – दृढ़ । **पुरुरूपः** – यजमान आदि आठ मूर्तियों वाला । **उग्रः** – प्रचण्ड । **शुक्रेभिः** –दीप्तिमान् । **हिरण्यैः** – स्वर्णालङ्कारों से । **ईशानात्** –ईश्वर रुद्र से । **भूरेः** – पालन करने वाले । **असुर्यम्** – बल । **न योषत्** – अलग नहीं होता ।

हिन्दी अनुवाद – दृढ़ अङ्गों से युक्त, यजमान आदि मूर्तियों वाला, प्रचण्ड, पालन-पोषण करने वाला या भूरे रंग का वह रूद्र दीप्तिमान स्वर्णालङ्कारों से चमकता है। इस लोक का पालन करने वाले सबके ईश्वर रुद्र से बल निश्चय ही कभी अलग नहीं होता। अर्थात् वह सदा बलिष्ठ बना रहता है।

व्याकरण –

पिपिशे – 'पिश्' धातु, लिट् लकार, प्रथम पुरूष, एकवचन ।

असुर्यम् – 'असु क्षेपणे' धातु 'उरन्' प्रत्यय। अस् + उरन् (उर) – असुर। असुरे साधुः अर्थ में 'तत्र साधुः' से यत् प्रत्यय – असुर्य ।

योषत् – 'यु मिश्रणामिश्रणयोः' धातु से लेट् लकार, प्रथम पुरुष, एकवचन ।

विशेष – मैक्डानल ने 'भूरेः' को 'भुवनस्य' का विशेषण बताकर इसका अर्थ 'महान्' किया है (**great world**)। 'असुर्यम्' का अर्थ उसने दिव्य साम्राज्य (**devine dominion**) किया है।

१० अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ।।

पद-पाठः अर्हन् । बिभर्षि । सायकानि । धन्वं । अर्हन् । निष्कम् । यजतम् । विश्वऽरूपम् ।

अर्हन् । इदम् । दयसे । विश्वम् । अभ्वम् । न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ।।

अन्वय – अर्हन् सायकानि धन्व विभर्षि । अर्हन् यजतम् विश्वरूपम् । निष्कम् अर्हन् इदम् विश्वम् अभ्वम् दयसे । रुद्र । त्वत् ओजीयः वै न अस्ति ।

संस्कृत-व्याख्या – हे रुद्र ! त्वम् अर्हन् योग्यः सन् सायकानि शरान् धन्व धनुश्च बिभर्षि धारयसि । अर्हन् योग्यः सन्नेव यजतं पूजनीयं विश्वरूपं अनेकैः रूपैः सम्पन्नं निष्कं स्वर्णहारं धारयसि । अर्हन् योग्यः सन्नेव इदं विश्वं सर्वम् अभ्वम् अतिविस्तृतं जगत् दयसे रक्षसि । हे रुद्र ! त्वत् त्वत्तः अन्यत् किञ्चित् ओजीयः ओजस्वितरः न वै निश्चयेन न वर्तते ।

शब्दार्थ – **अर्हन्** – योग्य होता हुआ । **विभर्षि** – धारण करते हो । **सायकानि** – बाणों को । **धन्व** – धनुष को । **यजतम्** – पूजनीय । **निष्कम्** – सोने का हार । **विश्वरूपम्** – अनेक रूपों से युक्त । **दयसे** – रक्षा करते हो । **विश्वम्** – सम्पूर्ण । **अभ्वम्** – अति विस्तृत जगत् । **ओजीयः** – अधिक ओजस्वी । **त्वत्** – तुमसे ।

हिन्दी अनुवाद – हे रुद्र ! योग्य होते हुये तुम बाणों और धनुष को धारण करते हो । योग्य होते हुये तुम पूजनीय और अनेक रूपों से युक्त सोने के हार को धारण करते हो । योग्य होते हुये तुम इस सारे अति विस्तृत जगत् की रक्षा करते हो । हे रुद्र ! तुम से अधिक ओजस्वी और कोई निश्चय से नहीं है ।

व्याकरण –

अर्हन् – अर्ह् + शतृ – अर्हत् । प्रथमा का एकवचन ।

यजतम् – यज् + अतच् – यजत । द्वितीया का एकवचन ।

दयसे – दय् धातु, लट् लकार, मध्यम पुरूष, एकवचन ।

ओजीयः – ओजस् + ईयसुन् – ओजीयस् ।

विशेष – मैक्डानल ने 'दयसे' का अर्थ 'शासन करना' और 'अभ्वम्' का अर्थ 'शक्ति' किया है । इस प्रकार तीसरे चरण का अर्थ इस प्रकार है **Worthy thou wieldest all this force.**

११ स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ।।

पद-पाठः स्तुहि । श्रुतम् । गर्तऽसदम् । युवानम् । मृगम् । न । भीमम् । उपऽहत्नुम् । उग्रम् । मृळ । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते अस्मत् । नि । वपन्तु । सेनाः ।।११।।

अन्वय – श्रुतम् गर्तसदम् युवानम् मृगम् न भीमम् उपहत्नुम् उग्रम् स्तुहि । रुद्र ! स्तवानः जरित्रे मृळ । ते सेनाः अस्मत् अन्यम् नि वपन्तु ।

संस्कृत-व्याख्या – हे स्तोतः श्रुतं विख्यातं रुद्रं गर्तसदं रथासीनं युवानं नित्यतरुणं मृगं न भीमं सिंहमिव भयङ्करम् उपहत्नुम् उपहन्तारम् उग्रम् उग्रस्वरूपं रुद्रं स्तुहि स्तुतिं कुरु । हे रुद्र ! त्वं स्तवानः अस्माभिः स्तूयमानः जरित्रे स्तोत्रे मह्यं मृळ सुखय । ते त्वदीयाः सेनाः अस्मदन्यम् अस्मद्व्यतिरिक्तं पुरुषं निवपन्तु निघ्नन्तु ।

शब्दार्थ – **स्तुहि** – स्तुति करो । **श्रुतम्** – प्रसिद्ध । **गर्तसदम्** – रथ पर आसीन । **युवानम्** – नित्य युवा । **मृगं न भीमम्** – सिंह के समान भयंङ्कर । **उपहत्नुम्** – शत्रुओं को मारने वाले । **उग्रम्** – उग्र स्वरूप वाले । **मृळ** – सुखी करो । **जरित्रे** – स्तुति करने वाले को । **स्तवानः** – स्तुति किया जाता हुआ । **अन्यम्** – दूसरे को । **निवपन्तु** – नष्ट कर दें ।

हिन्दी अनुवाद – **हे स्तोता ! तुम प्रसिद्ध, रथ पर आसीन, नित्य युवा, सिंह के समान भयङ्कर, शत्रुओं को मारने वाले, और उग्र स्वरूप वाले रुद्र देवता की स्तुति करो । हे रुद्र ! स्तुति किये जाते हुये तुम ! स्तुति करने वाले को सुखी करो । वे तुम्हारी सेनायें हमसे भिन्न दूसरों को अर्थात् हमारे शत्रुओं को नष्ट कर दें ।**

व्याकरण –

श्रुतम् – श्रु + क्त – श्रुत । गर्तसदम् – गर्ते सीदति । गर्त + सद् + अच् – गर्तसद ।

स्तवानः – स्तू + शानच् – स्तवान ।

वपन्तु – वप् धातु, लोट् लकार, प्रथम पुरूष, एकवचन ।

जरित्रे – 'जृ' + तृच् (इट् का आगम) – जरितृ । चतुर्थी का एकवचन ।

विशेष – मैक्डानल के अनुसार 'मृगम्' पद 'उपहत्नुम्' का कर्म है और इसका अर्थ है – **That stays like a dread beast** । उसने 'सेनाः' शब्द का फैंक कर मारने वाला शस्त्र (**missilies**) किया है ।

१२ कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ।।

पद-पाठः कुमारः । चित् । पितरम् । वन्दमानम् । प्रति । ननाम । रुद्र । उपऽयन्तम् । भूरेः । दातारम् । सत्ऽपतिम् । गृणीषे । स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ।।

अन्वय – वन्दमानम् पितरम् कुमारः चित् रुद्र ! उपयन्तम् प्रति ननाम । भूरेः दातारम् सत्पतिम् गृणीषे । स्तुतः त्वम् भेषजा अस्मे रासि ।

संस्कृत व्याख्या – वन्दमानं आशीर्वचनं ददानं पितरं जनकं कुमारश्चित् यथा कश्चित् कुमारः प्रणमति तथैव हे रुद्र ! उपयन्तम् अस्मत्समीपमागच्छन्तं त्वां प्रति ननाम प्रणतोऽस्मि। अपि च भूरेः बहुनो धनस्य दातारं सत्पतिं सतां पालयितारम् एवंभूतं त्वां गृणीषे स्तौमि । स्तुतश्च त्वं भेषजानि अस्मे अस्मभ्यं रासि देहि।

शब्दार्थ – कुमार – बालक । **वन्दमानम्** – आशीर्वचन देते हुए। **प्रतिनानाम** – प्रणाम करता हूँ। **उपयन्तम्** – समीप आते हुये। **भूरेः** –बहुत अधिक के। **सत्पतिम्** – सज्जनों का पालन करने वाले। **गृणीषे** – स्तुति करता हूँ। **स्तुतः** – स्तुति किया गया। **रासि** – दो। **अस्मे** – हमें।

हिन्दी अनुवाद – आशीर्वचन देते हुये पिता को जिस प्रकार कोई बालक प्रणाम करता है, उसी प्रकार समीप आते हुये हे रुद्र ! मैं तुमको प्रणाम करता हूँ। बहुत से धन को देने वाले और सज्जनों की पालना करने वाले हे रुद्र ! मैं तुम्हारी स्तुति करता हूँ। हम से स्तुति किये गये तुम ओषधियों को हमें दो ।

व्याकरण –

वन्दमानम् – वन्द् + (शप्) + शानच् – वन्दमान । द्वितीया का एकवचन ।

उपयन्तम् – उप + इ + शतृ – उपयत् । द्वितीया का एकवचन ।

नानाम –नम् धातु, लिट् लकार, प्रथम पुरूष, एकवचन । पूर्व न को छान्दस दीर्घ ।

गृणीषे – गृ धातु, लट् लकार, उत्तम पुरूष, एकवचन । छान्दस रूप ।

सत्पतिम् – सतां पालयितारम् । षष्ठी समास ।

अस्मे – अस्मभ्यम् का वैदिक रूप ।

रासि – रा धातु, लट् लकार, मध्यम पुरूष, एकवचन।

विशेष – मैक्डानल ने 'सत्पतिम्' का अर्थ 'सच्चा प्रभु' (**The true lord**) किया है।

१३ या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रूद्रस्य वश्मि ।।

पद-पाठः या । वः । भेषजा । मरुतः । शुचीनि । या । शम्ऽतमा । वृषणः । या । मयःऽभु। यानि । मनुः । अवृणीत । पिता । नः । ता । शम् । च । योः च । रुद्रस्य । वश्मि ।। १३ ।।

अन्वय – वृषणः मरुतः या वः भेषजा शुचीनि या शंतमा या मयोभु, यानि नः पिता मनुः अवृणीत, ता रुद्रस्य शम् च योः च वश्मि ।

संस्कृत व्याख्या – हे मरुतः ! वः युस्माकं या यानि भेषजा औषधानि शुचीनि शुद्धानि, हे वृषणः कामानां वर्षितारः मरुत् ! या यानि च भेषजानि शंतमा अतिशयेन सुखकराणि या यानि च भेषजानि मयोभु मयसः सुखस्य भावयितृणि, तथा च नः पिता मनुः अस्माकं पिता मनुः यानि भेषजानि अवृणीत वृतवान्, ता तानि रुद्रस्य देवस्य शं व योः च रोगाणाम् उपशमनं भयानां च पृथक्करणं तदुभयं वश्मि कामये ।

शब्दार्थ – **शुचीनि** – पवित्र, निर्मल । **शंतमा** – अत्यधिक सुख को देने वाली । **मयोभु** – कल्याण की भावना उत्पन्न करने वाली । **अवृणीत** – वरण किया था । **शम्** – रोगों को शान्त करने योग्य । **योः** – रोगों को दूर रखने के योग्य । **वश्मि** – चाहता हूँ ।

हिन्दी अनुवाद – **कामनाओं की वर्षा करने वाले हे मरुत् देवताओ ! जो तुम्हारी ओषधियाँ पवित्र या निर्मल हैं, जो अत्यधिक सुख को देने वाली हैं, जो कल्याण की भावना उत्पन्न करने वाली हैं और जिन ओषधियों को हमारे पिता मनु ने हमारे लिये वरण किया था, उन सभी ओषधियों को रुद्र देवता के सम्बन्ध से रोगों को शान्त करने योग्य और रोगों को दूर रखने योग्य दोनों प्रकार की ओषधियों को मैं चाहता हूँ ।**

व्याकरण –

वः – युष्माकम् का दूसरा रूप ।

या, भेषजा, शंतमा – प्रथमा विभक्ति, बहुवचन । वैदिक रूप । लोक में यानि, भेषजानि, शंतमानि रूप होगा ।

अवृणीत – वृ धातु, लङ् लकार, प्रथम पुरूष, एकवचन ।

वश्मि – वश् धातु, लट् लकार, उत्तम पुरुष, एकवचन ।

मयोभु – मयस् + भू + क्विप् ।

विशेष – मैक्डानल ने इस मन्त्र में 'शंतमा' का अर्थ 'स्वास्थ्यप्रद' (**Wholesome**), 'वृषण:' का अर्थ 'शक्तिशाली' (**Mighty ones**), 'मयोभु' का अर्थ 'लाभदायक' (**Beneficial**) और 'शम् यो:' का अर्थ (**Healiag and blessing**) किया है।

१४ परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्‌भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ।।

पद-पाठः परि । नः । हेतिः । रुद्रस्य । वृज्याः । परि । त्वेषस्य । दुःऽमतिः । मही । गात् ।
अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृळ ।।

अन्वय – रुद्रस्य हेतिः नः परिवृज्याः । त्वेषस्य मही दुर्मतिः परि गात् । मीढ्वः ! स्थिरा मघवद्भ्यः अवतनुष्व । तोकाय तनयाय मृळ ।

संस्कृत व्याख्या – रुद्रस्य महादेवस्य हेतिः आयुधं नः अस्मान् परिवृज्याः परिवर्जयतु । त्वेषस्य दीप्तस्य रुद्रस्य मही महती दुर्मतिः दुःख कारिणी बुद्धिः परिगात् अस्मान् वर्जयित्वा अन्यत्र गच्छतु । हे मीढ्वः सेचनसमर्थ रुद्र ! स्थिरा स्थिराणि स्वधनूंषि मघवद्भ्यः हविर्लक्षणसम्पन्नेभ्यः यजमानेभ्यः अवतनुष्व अवततज्यानि कुरु । तोकाय अस्मत्पुत्राय तनयाय अस्मत्पुत्राणां पुत्राय मृळ सुखं कुरु ।

शब्दार्थ – **हेतिः** – शस्त्र । **परिवृज्याः** – छोड़ दे । **त्वेषस्य** –दीप्तिमान् । **दुर्मतिः** – दुःख देने वाली बुद्धि । **मही** – महती । **परिगात्** – दूसरी जगह चली जावे । **स्थिरा** – दृढ़ । **मघवद्भ्यः** – हवि रूप धन से सम्पन्न यजमानों के प्रति । **तनुष्व** – विस्तृत करो । **मीढ्वः** – सेचन करने में समर्थ । **तोकाय** – पुत्रों के लिये । **तनयाय** – पुत्रों के पुत्रों के लिये । **मृळ** – सुखी करो ।

हिन्दी अनुवाद – रुद्र देवता का शस्त्र हमें छोड़ दे अर्थात् हमारी हिंसा न करे । दीप्तिमान् रुद्र की दुःख देने वाली महती बुद्धि हमें छोड़कर दूसरी जगह चली जावे । हे सुखों का सेचन करने में समर्थ रुद्र ! अपने दृढ़ धनुषों को हवि रूपी धन से सम्पन्न यजमानों के प्रति विस्तृत मत करो । हमारे पुत्रों और पुत्रों के पुत्रों को सुखी करो ।

व्याकरण –

वृज्याः – वृज् धातु, विधिलिङ्, प्रथम पुरूष, एकवचन, वैदिक रूप ।

गात् – गा धातु, लेट् लकार, प्रथम पुरुष, एकवचन ।

तोकाय – तुच् + घञ् – तोक । चतुर्थी का एकवचन ।

मीढ्वः – 'मिह् सेचने' धातु से क्वसु प्रत्यय ।

मघवद्भ्यः – मघ + मतुप् – मघवत् । चतुर्थी का बहुवचन ।

तनुष्व – तन् धातु, लोट् लकार, मध्यम पुरुष, एकवचन ।

विशेष –मैक्डानल ने 'त्वेष' का अर्थ 'भयानक' (**Terrible**) और 'मीढ्व' का अर्थ 'उदार' (**Bounteous**) किया है ।

१५ एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ।।

पद-पाठः एव । बभ्रो इति । वृषभ । चेकितान । यथा । देव । न । हृणीषे । न । हंसि ।
हवनऽश्रुत् । नः । रुद्र । इह । बोधि । बृहत् । वदेम । विदथे । सुऽवीराः ।। १५ ।।

अन्वय – बभ्रो वृषभ चेकितान देव यथा एव न हृणीषे न हंसि, हवनश्रुत् रुद्र इह नः बोधि । विदथे सुवीराः बृहत् वदेम ।

संस्कृत व्याख्या – हे बभ्रो ! जगतो भर्तः वृषभ कामानां वर्षितः चेकितान सर्वं जानन् देव द्योतमान रुद्र यथा येन प्रकारेण न ह्रणीषे न कुप्यसि न च हंसि न मारयसि एवं हवनश्रुत् आह्वानं शृण्वन् नः अस्मान् इह अस्मिन् देशे बोधि बुध्यस्व । विदथे यज्ञे गृहे वा सुवीराः शोभनपुत्राः सन्तः बृहतः प्रौढं त्वदींय स्तोत्रं वदेम उच्चारयाम ।

शब्दार्थ – **चेकितान** – सब कुछ जानने वाले । **हृणीषे** – क्रुद्ध होते हो । **हंसि** – मारते हो। **हवनश्रुत्** – आह्वानों को सुनने वाला । **बोधि** – जानो । **बृहत्** – अत्यधिक । **वदेम** – स्तुति को कहते हैं । **विदये** – यज्ञ में, घर में । **सुवीराः** – शोभन पुत्रों वाले हम ।

हिन्दी अनुवाद – **हे जगत् का पालन करने वाले, कामनाओं की वर्षा करने वाले, सब कुछ जानने वाले, दीप्तिमान् रुद्र ! जिस प्रकार से तुम हम पर क्रुद्ध नहीं होओ और हमें नहीं मारो, उस प्रकार से हमारे आह्वानों के सुनने वाले रुद्र ! इस स्थान पर स्थित हमें तुम जानो । यज्ञ में अथवा घर में शोभन पुत्रों वाले हम तुम्हारे प्रति अत्यधिक स्तुति कहते हैं।**

व्याकरण –

चेकितान – कित् ज्ञाने धातु से कानच् प्रत्यय ।

हृणीषे – हृणी धातु, लट् लकार, मध्यम पुरुष, एकवचन ।

हवनश्रुत् – हवनं शृणोति इति स । हवन + श्रु + (तुक्) + क्विप् – हवनश्रुत् ।

बोधि – बुध् धातु, लोट् लकार, मध्यम पुरुष, एकवचन । वैदिक रूप ।

विशेष – मैक्डानल ने 'चेकितान' शब्द का अर्थ महायशस्वी (**far-famed**) और 'वृषभ' का अर्थ 'बैल' (**bull**) किया है। उसने 'इह' को 'विदथे' के साथ अन्वित करके 'इह विदथे' का अर्थ किया है – **at devine worship** ।

उषस् सूक्त

(मण्डल ४, सूक्त – ५१)

ऋषि – वामदेव देवता – उषा छन्दः – त्रिष्टुप्

१ इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् ।

नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ।।

पद-पाठः इदम् । ऊँ इति । त्यत् । पुरुऽतमम् । पुरस्तात् । ज्योतिः । तमसः । वयुनऽवत् । अस्थात् । नूनम् । दिवः । दुहितरः । विऽभातीः । गातुम् । कृणवन् । उषसः । जनाय ।।१ ।।

अन्वय – इदम् उ त्यत् पुरुतमम् वयुनावत् ज्योतिः पुरस्तात् तमसः अस्थात्। नूनम् विभातीः दिवः दुहितरः उषसः जनाय गातुम् कृणवन्।

संस्कृत व्याख्या – इदम् उ पुरतो दृश्यमानं त्यत् तत् पुरुतमम् अत्यन्तप्रभूतम् ज्योतिः तेजः वयुनावत् प्रकृष्टकान्तिमत् अथवा प्रज्ञापकम् पुरस्तात् पूर्वस्यां दिशि तमसः अन्धकाराद् अस्थात् उदतिष्ठत्। एवं सति नूनं निश्चयेन दिवः आदित्यस्य दुहितरः दुहितृस्थानीयाः विभातीः विभानं कुर्वतीः उषसः जनाय स्तोत्रे यजमानाय गातुं गमनादिव्यापारसामर्थ्यं कृणवन् अकुर्वन्।

शब्दार्थ – **त्यत्** – वह। **पुरुतमम्** – अत्यधिक प्रकाशमान। **पुरस्तात्** – पूर्व दिशा में। **तमसः** – अन्धकार में से। **वयुनावत्** – प्रकृष्ट कान्ति अथवा प्रज्ञा से युक्त। **अस्थात्** – निकली है। **विभातीः** – प्रकाश करने वाली। **दिवः** – द्युलोक की। **दुहितरः** – पुत्रियाँ। **गातुम्** – गमन आदि क्रियाओं के सामर्थ्य को। **कृणवन्** – उत्पन्न कर चुकी है।

हिन्दी अनुवाद – सामने दिखाई देने वाली वह अत्यधिक प्रकाशमान प्रकृष्ट कान्ति अथवा प्रज्ञा से युक्त ज्योति पूर्व दिशा में अन्धकार में से निकली है। निश्चय से प्रकाश करने वाली द्युलोक की पुत्रियाँ उषायें स्तुति करने वाले यजमानों के लिये गमन आदि क्रियाओं के सामर्थ्य को उत्पन्न कर चुकी हैं।

व्याकरण –

दुहितरः – दोग्धि पितरौ अर्थ में दुह् + तृच् (इट् का आगम) – दुहितृ। अथवा दूरे हिता दुहिता।

विशेष – मैक्डानल के अनुसार 'वयुनावत्' का अर्थ है, स्पष्टता से युक्त (**with clearness**) उसने 'पुरुतमम् और पुरस्तात्' का एक साथ अन्वय करके अर्थ किया है, पूर्व दिशा में बार-बार आने वाली उषा (**most frequent light in the east**)।

२ **अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवोऽध्वरेषु।**
व्यू व्रजस्य तमसो द्वारोच्छन्तीरव्रञ्छुचयः पावकाः ॥

पद-पाठः अस्थुः। ऊँ इति। चित्राः। उषसः। पुरस्तात्। मिताःऽइव। स्वरवः। अध्वरेषु।
वि। ऊँ इति। व्रजस्य। तमसः। द्वारा। उच्छन्तीः। अव्रन्। शुचयः। पावकाः॥

अन्वय – चित्राः उषसः उ पुरस्तात् अस्थुः अध्वरेषु मिताः स्वरवः इव। व्रजस्व तमसः द्वारा उ वि उच्छन्तीः शुचयः पावकाः अव्रन्।

संस्कृत व्याख्या – चित्राः चायनीयाः शलाघनीयाः उषसः पुरस्तात् पूर्वस्यां दिशि अस्थुः तिष्ठन्ति। तत्र दृष्टान्त अध्वरेषु यज्ञेषु मिताः खाताः स्वरवः यूपाः इव। स्वरुशब्दः यूपच्छेदपतितप्रथमशकलवाची। ताः उषसः व्रजस्य वारकस्य तमसः अन्धकारस्य द्वारा द्वाराणि

वि उच्छन्तीः उत्सारयन्त्यः शुचयः दीप्ताः पावकाः शोधिकाः अव्रन् व्यावृण्यन् ।

शब्दार्थ – अस्थुः – स्थित हैं। **चित्राः** – प्रशंसनीय, सुन्दर। **मिताः** – गाड़े गये। **स्वरवः** – यूप। **अध्वरेषु** – यज्ञों में। **व्रजस्य** – आवृत करने वाले। **तमसः** – अन्धकार के। **द्वारा** – द्वारों को। **वि उच्छन्तीः** – हटाती हुई । **अव्रन्** – मार्गों को खोल दिया है। **शुचयः** – दीप्तिमान्। **पावकाः** – पवित्र करने वाली।

हिन्दी अनुवाद –प्रशंसनीय या सुन्दर उषायें उसी प्रकार से पूर्व दिशा में स्थित हैं, जिस प्रकार यज्ञों में गाड़े गये यूप प्रकाशित होते हैं। आवृत करने वाले अन्धकार के द्वारों को हटाती हुई दीप्तिमान् पवित्र करने वाली उन उषाओं ने मार्गों को खोल दिया है।

व्याकरण –

अव्रन् –'वृ' धातु लङ् लकार, प्रथम पुरुष, बहुवचन । वैदिक रूप ।

विशेष – मैक्डानल ने 'चित्राः' का अर्थ किया है – प्रतिभाशाली (**brilliant**)। उसके अनुसार 'ब्रज' का अर्थ 'गोष्ठ' होकर इस प्रकार का भाव व्यक्त होता है –

They have unclosed the two doors of the pen of darkness.

३ **उच्छन्तीरद्य चितयन्त भोजान्राधोदेयायोषसो मघोनीः ।**

अचित्रे अन्तः पणयः । ससन्त्वबुध्यमानास्तमसो विमध्ये ।।

पद-पाठः उच्छन्तीः ।अद्य ।चितयन्त ।भोजान् ।राधःऽदेयाय ।उषसः ।मघोनीः ।

अचित्रे ।अन्तरिति ।पणयः ।ससन्तु ।अबुध्यमानाः ।तमसः ।विऽमध्ये ।।३ ।।

अन्वय – अद्य उच्छन्तीः मघोनीः उषसः भोजान् राधोदेयाय चितयन्त ।अचित्रे तमसः विमध्ये अन्तः अबुध्यमानाः पणयः ससन्तु ।

संस्कृत व्याख्या – अद्य अस्मिन् उच्छन्तीः तमः विवासयन्त्यः मघोनीः धनवत्यः उषसः भोजान् भोजयितृन् यजमानान् राधोदेयाय सोमादिधनदानाय चितयन्त प्रज्ञापयन्ति । अचित्रे अयाचनीये तमसः अन्धकारस्य विमध्ये अत्यन्तगाढान्धकारे इति भावः पणयः वणिज इव अदातारः अन्तः अबुध्यमाना अज्ञानिनो जनाः ससन्तु स्वपन्तु।

शब्दार्थ – उच्छन्तीः – हटा देने वाली। **चितयन्त** – विचार कर रही हैं, ज्ञान करा रही हैं। **भोजान्** – भोजन वालों को । **राधोदेयाय** – धन देने के लिये । **मघोनीः** – धन सम्पन्न । **अचित्रे** – अपूजनीय, कुरूप। **अबुध्यमानाः** – अज्ञानी। **पणयः** – कञ्जूस पणि।

हिन्दी अनुवाद – आज इस दिन अन्धकार को हटा देने वाली उषायें धनसम्पन्न कराने वाले या भोजन कराने वाले अपने उपासकों को सोम आदि धन देने के लिये विचार कर रही हैं

या ज्ञान करा रही हैं। अपूजनीय या कुरूप प्रगाढ़ अन्धकार के अन्दर के अज्ञानी तथा दान न देने वाले कञ्जूस पणि सोते रहें।

विशेष – मैक्डानल ने 'भोजान्' का अर्थ 'उदार' (**liberals**), 'चितयन्त' का अर्थ 'प्रेरित करें' (**stimulate**) और 'पणयः' का अर्थ 'कञ्जूस मनुष्य' (**niggards**) किया है।

४ कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य ।
येना नवग्वे अङ्गिरे दशग्वे सप्तास्ये रेवती रेवदूष ।।

पद-पाठः कुवित् । सः । देवीः । सनयः । नवः । वा । यामः । बभूयात् । उषसः । वः । अद्य । येन । नवऽग्वे । अङ्गिरे । दशऽग्वे । सप्तऽआस्ये । रेवतीः । रेवत् । ऊष ।।४ ।।

अन्वय – देवीः उषसः वः सनयः नवः यामः सः अद्य कुवित् बभूयात्। येन रेवतीः नवग्वे दशग्वे सप्तास्ये अङ्गिरे रेवत् ऊष ।

संस्कृत व्याकरण – हे देवीः द्योतमानाः उषसः ! वः युष्मान् सनयः पुराणः नवो वा यामः गमनसाधनः सः रथः अद्य अस्मिन् यागदिने कुवित् बहुवारं बभूयात् भवेत् यामः गमनसाधनः सः रथः अद्य अस्मिन् यागदिने कुवित् बहुवारं बभूयात् भवेत् गच्छेदित्यर्थः । येन रथेन हे रेवतीः धनवत्यः उषसः यूयं नवग्वे दशग्वे सप्तास्ये वा नामके अङ्गिरे अङ्गिरोनाम्नि मनुष्यसमुदाये रेवत् धनवत् यथा भवति तथा ऊष विभातं कृतवत्यः ।

शब्दार्थ – कुवित् – बहुत बार । **सनयः** – पुराना। **नवः** – नया। **यामः** – जाने का साधनभूत रथ। **अद्य** – आज इस यज्ञ के दिन । **नवग्वे** – नौ घोड़ों द्वारा जाने वाले। **दशग्वे** – दस घोड़ों द्वारा जाने वाले। **अङ्गिरे** – अङ्गिराओं में । **सप्तास्ये** – सात छन्द रूप मुखों वाले। **रेवती** – धनसम्पन्न। **रेवत्** – जिस प्रकार धन प्राप्त हो। **ऊष** – चमको।

हिन्दी अनुवाद – **हे दीप्तिमती उषाओ। तुम्हारा पुराना या नया जाने का साधनभूत वह रथ आज इस यज्ञ के दिन बहुत बार होवे अर्थात् उस रथ से तुम बहुत बार आओ। जिस रथ के द्वारा हे धन से सम्पन्न उषाओ ! तुम नौ घोड़ों द्वारा जाने वाले, दस घोड़ों द्वारा जाने वाले और सात छन्द रूप मुखों वाले अङ्गिराओं में जिस प्रकार धन की प्राप्ति हो, उस प्रकार से चमको अर्थात् अन्धकार को नष्ट करो।**

विशेष – मैक्डानल द्वारा इस मन्त्र की व्याख्या कुछ भिन्न प्रकार से है। उसने इस मन्त्र का इस प्रकार अर्थ किया है –

Should this be an old course or a new for you today, O divine Dawns : (is it that) by which ye have shone wealth, ye wealthy ones, upon Navagva, Angira, and Dashagva the seven mouthed ?

५ यूयं हि देवीर्ऋतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम् ।।

पद-पाठः यूयम् । हि । देवीः । ऋतयुक्ऽभिः । अश्वैः । परिऽप्रयाथ । भुवनानि । सद्यः । प्रऽबोधयन्तीः । उषसः । ससन्तम् । द्विऽपात् । चतुःऽपात् । चरथाय । जीवम् ।।५ ।।

अन्वय – देवीः उषसः ! यूयम् हि ऋतयुग्भिः अश्वैः ससन्तम् द्विपाच्चतुष्पात् जीवम् चरथाय प्रबोधयन्तीः सद्यः भुवनानि परिप्रयाथ ।

संस्कृत व्याख्या – हे देवीः द्योतमानाः उषसः यूयं हि खलु ऋतयुग्भिः यज्ञगामिभिः अश्वैः भुवनानि सद्यः परिप्रयाथ परितः प्रकृष्टं गच्छथ । किं कुर्वत्यः ससन्तं स्वपन्तं द्विपाच्चतुष्पात् मनुष्यगवादिलक्षणं जीवं चरथाय चरणाय प्रबोधयन्तीः प्रबोधयन्त्यः सत्यः परिप्रयाथ ।

शब्दार्थ – देवीः – दीप्तिमती । **ऋतयुग्भिः** – यज्ञ की ओर जाने वाले । **परिप्रयाथ** – चारों ओर प्रकृष्ट रूप से जाती हो । **सद्यः** – अतिशीघ्र । **प्रबोधयन्ती** – जगाती हुई । **ससन्तम्** – सोते हुये । **द्विपात्** – दोपायों को । **चतुष्पात्** – चौपायों को । **चरथाय** – गमन आदि व्यापार करने के लिये ।

हिन्दी अनुवाद – **हे दीप्तिमती उषाओ ! तुम निश्चय ही यज्ञ की ओर जाने वाले घोड़ों से, सोते हुये दोपायों (मनुष्य आदि जीवों) चौपायों (गाय आदि जीवों) को गमन आदि व्यापार करने के लिये जगाती हुई अतिशीघ्र भुवनों के चारों ओर प्रकृष्ट रूप से जाती हो।**

व्याकरण –

चरथाय – चर् + अथच् (अथ) – चरथ । चतुर्थी का एकवचन ।

विशेष – मैक्डानल ने 'ऋतयुग्भिः अश्वैः का अर्थ किया है – उचित समय में जोते गये घोड़ों से (**with your steeds yoked in due time**)।

६ क्व स्विदासां कतमा पुराणी यया विधाना विदधुर्ऋभूणाम् ।
शुभं यच्छुभ्रा उषसश्चरन्ति न वि ज्ञायन्ते सदृशीरजुर्याः ।

पद-पाठः क्व । स्वित् । आसाम् । कतमा । पुराणी । यया । विऽधाना । विऽदधुः । ऋभूणाम् । शुभम् । यत् । शुभ्राः । उषसः । चरन्ति । न । वि । ज्ञायन्ते । सऽदृशीः । अजुर्याः ।।

अन्वय – आसाम् कतमा क्वस्वित् पुराणी, यया ऋभूणाम् विधाना विदधुः । यत् शुभ्राः उषसः शुभम् चरन्ति सदृशीः अजुर्याः न विज्ञायन्ते ।

संस्कृत व्याख्या – आसाम् उषमां मध्ये क्व स्वित् अभूदद्य कतमा पुराणी पुरातनी यया ऋभूणां सम्बन्धीनि विधाना चमसादिनिर्माणानि विदधुः अर्कुवन् । यत् याश्च उषसः शुभ्राः

दीप्ताः शुभं चरन्ति शोभां दीप्तिं कुर्वन्ति ताः अजुर्याः अजीर्णाः नूतना इत्यर्थः न इव विज्ञायन्ते, यतः सदृशीः सर्वदा चैकरूपाः ।

शब्दार्थ – **क्वस्वित्** – कहाँ पर। **आसाम्** – इन उषाओं में। **कतमा** – कौनसी। **पुराणी** – पुरानी। **विधाना** – चमस आदि साधन। **विदधुः** – बनाये गये। **ऋभूणाम्** – ऋभु उपासकों के। **शुभम्** – शोभा को। **शुभ्राः** – चमकती हुई। **चरन्ति** – उत्पन्न करती हैं। **विज्ञायन्ते** – प्रतीत होती हैं। **अजुर्याः** – नवीन।

हिन्दी अनुवाद – इन उषाओं के मध्य कौन सी कहाँ पर ऐसी है, जो पुरानी हो तथा जिससे ऋभु नामक उषा के उपासकों के चमस आदि साधन स्वयं बनाये गये। जो उषायें चमकती हुई शोभा को उत्पन्न करती हैं, वे क्योंकि एक सी दिखाई पड़ती हैं, अतः वे नवीन नहीं प्रतीत होती हैं।

व्याकरण –

अजुर्याः – 'जॄ' धातु + यत्, उत्व, रपरत्व, दीर्घ का अभाव – जुर्य। न + जुर्य – अजुर्य।

विशेष – मैक्डानल ने 'चरन्ति' का अर्थ 'चलती हैं' और 'शुभम्' का अर्थ 'चमकदार मार्ग' करके इस प्रकार भाव व्यक्त किया है – **proceed on their shining course**।

७ **ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।**

यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आप ।।

पद-पाठः ताः। घ। ता। भद्राः। उषसः। पुरा। आसुः। अभिष्टिऽद्युम्नाः। ऋतजातऽसत्याः। यासु। ईजानः। शशमानः। उक्थैः। स्तुवन्। शंसन्। द्रविणम्। सद्यः। आप ।।७ ।।

अन्वता – ताः घ ताः भद्राः उषसः पुरा आसुः। अभिष्टिद्युम्नाः ऋतजातसत्याः। यासु ईजानः उक्थैः शशमानः स्तुवन् शंसन् द्रविणम् सद्यः आप ।

संस्कृत व्याख्या – ताः घ इति प्रसिद्धौ यत् ताः उषसः उपकारिण्यः। ताः भद्राः कल्याणकारिण्यः उषसः पुरा पूर्वम् आसुः अभवन्। अभिष्टिद्युम्नाः अभिष्ट्या अभिगमनमात्रेण द्युम्नं धनं यासां ताः, ऋतजातसत्याः यज्ञार्थं जाताः सफलाश्च। यासु उषःसु ईजानः यागं कुर्वाणः, उक्थैः स्तोत्रैः शशमानः शंसमानः, स्तुवन् सामभिः स्तोत्रं निष्पादयन्, शंसन् मन्त्रगानं कुर्वन् द्रविणं धनं शीघ्रम् आप प्राप्नोति ।

शब्दार्थ – **घ** – प्रसिद्ध। **भद्राः** – उपकार करने वाली। **पुरा** – पहले। **आसुः** – थीं। **अभिष्टिद्युम्नाः** – पहुँचने मात्र से धनों को देने वाली। **ऋतजातसत्याः** – यज्ञ के लिये उत्पन्न हुई हैं और सत्य से फल को देने वाली हैं। **ईजानः** – यज्ञ करने वाला। **शशमानः** – प्रशंसा करने वाला। **उक्थैः** – स्तोत्रों से, ऋचाओं से। **स्तुवन्** – सामगान से स्तुति करने वाला। **शंसन्** – मन्त्रों

का गान करने वाला । **द्रविणम्** – धन को । **सद्यः** – शीघ्र । **आप** – प्राप्त कर लेता है ।

हिन्दी अनुवाद – वे प्रसिद्ध उषायें उपकार करने वाली हैं । वे कल्याणकारिणी उषायें पहले थीं । वे अपने पहुँचने मात्र से धनों को देने वाली हैं, जिस यज्ञ के लिये उत्पन्न हुई हैं और सत्य रूप से फल देने वाली हैं । जिन उषाओं के प्रति यज्ञ करने वाला, स्तोत्र या ऋचाओं से प्रशंसा करने वाला, सामगान से स्तुति करने वाला और मन्त्रों का गान करने वाला यजमान धन को शीघ्र प्राप्त कर लेता है ।

विशेष – मैक्डानल ने कुछ शब्दों के अर्थ इस प्रकार किये हैं – अभिष्टिद्युम्नाः – सहायता करने में विख्यात (**splendid in help**), ऋतजातसत्याः – समय का सत्य ही पालन करने वाली (**punctually true**) और शशमानः – परिश्रमी (**strenuous**) ।

८ **ता आ चरन्ति समना पुरस्तात् समानतः समना पप्रथानाः ।**
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते ।।

पद-पाठः ताः । आ । चरन्ति । समना । पुरस्तात् । समानतः । समना । पप्रथानाः ।
ऋतस्य । देवीः । सदसः । बुधानाः । गवाम् । न । सर्गाः । उषसः । जरन्ते ।।८।।

अन्वय – ताः उषसः आ समना चरन्ति पुरस्तात् समानतः समनाः पप्रथानाः ऋतस्य सदसः बुधानाः देवीः जरन्ते गवाम् सर्गाः न ।

संस्कृत व्याख्या – ता उषसः आ सर्वतः चरन्ति, समना सर्वतः समाना पुरस्तात् पूर्वस्यां दिशि समानतः समानाद्देशाद् अन्तरिक्षात् समना सर्वतः पप्रथानाः प्रथमानाः ऋतस्य यज्ञस्य सदसः सदः ऋत्विग्धविरादिकमित्यर्थः बुधानाः बोधयन्त्य एवंभूताः उषसः जरन्ते, स्तूयन्ते गवाम् उदकानां सर्गाः सृष्टयः न इव ।

शब्दार्थ – समना – सब ओर समान रूप से । **समानतः** – अन्तरिक्ष रूप स्थान से । **पप्रथानाः**– विस्तृत होती हुई । **ऋतस्य** – यज्ञ के । **सदसः** – वेदी में स्थापित यज्ञ आदि को । **बुधानाः** – जतलाती हुई । **गवाम्** – जलों की, किरणों की । **न** – समान । **सर्गाः** – सृष्टियों की । **जरन्ते** – स्तुति की जाती हैं ।

हिन्दी अनुवाद – वे उषायें सब ओर समान रूप से विचरण करती हैं । पूर्व दिशा में अन्तरिक्ष रूप स्थान से चारों ओर से विस्तृत होती हुई यज्ञ को और वेदि में स्थापित हवि आदि को जतलाती हुई इन दीप्तिमान् उषाओं की उसी प्रकार स्तुति की जाती है, जिस प्रकार जलों या किरणों की सृष्टियों की स्तुति की जाती है ।

विशेष – मैक्डानल ने कुछ शब्दों के अर्थ इस प्रकार से किये हैं – समना – एक रूप से (**equally**), बुधाना – जगती हुई (**waking**), ऋत – नियम (**seat of order**), गवाम् – गौओं के झुण्ड (**herds of kine**) और जरन्ते – क्रियाशील हैं (**are active**) ।

९ ता इन्वे॒३॑व स॑म॒ना स॑मा॒नीरमीतवर्णा उ॒षस॑श्चरन्ति ।
गू॒हन्ती॒रभ्व॒मसि॑तं॒ रुश॑द्भिः शु॒क्रास्त॒नूभि॒ः शुच॑यो रुचा॒नाः ।।

पद-पाठः ताः ।इत् ।नु ।ए॒व ।स॒म॒ना ।स॒मा॒नीः ।अमी॑तऽवर्णाः ।उ॒षस॑ः ।च॒र॒न्ति॒ ।
गू॒हन्तीः ।अभ्व॑म् ।असि॑तम् ।रुश॑त्ऽभिः ।शु॒क्राः ।त॒नूभि॑ः ।शुच॑यः ।रु॒चा॒ना ।।

अन्वय – ताः एव इत् उषसः नु समना समानीः अमीतवर्णाः अभ्वम् असितम् गूहन्तीः रुशद्भिः तनूभिः शुक्राः शुचयः रुचानाः चरन्ति ।

संस्कृत व्याख्या – ता एव उषसः इत् (पूरणार्थकम्), नु अद्य समना समाना एकध त्यर्थः समानीः एकरूपाः अमीतवर्णाः अहिंसितवर्णाः अथवा अपरिमितवर्णाः उषसः चरन्ति। किं कुर्वत्यःअभ्वम् अतिमहत् असितम् कृष्णं रूपं गूहन्तीः गोपयन्त्यः रुशद्भिः रोचमानैः तनूभिः शरीरैः शुक्राः दीप्ताः शुचयः शुद्धाः रुचानाः रोचमानाः सन्त्यः ।

शब्दार्थ – **समना** – समान होती हुई । **समानी** – एक से रूप वाली । **अमीतवर्णाः** – जिनका रूप प्रकट नहीं हुआ ऐसी, अपरिमित रूपों वाली । **गूहन्तीः** – छिपाती हुई । **अभ्वम्** – महान् । **असितम्** – काले रूप को, अन्धकार को । **रुशद्भिः** – दीप्तिमान् । **शुक्राः** चमकती हुई । **तनूभिः** – शरीरों से । **शुचयः** – पवित्र । **रुचानाः** – प्रकाशित होती हुई ।

हिन्दी अनुवाद – वे ही उषायें निश्चय से समान होती हुई, एक से रूप वाली, जिनका रूप नष्ट नहीं हुआ है ऐसी अथवा अपरिमित रूपों वाली, महान् काले रूप को अर्थात् रात्रि के अन्धकार को छिपाती हुई, दीप्तिमान् शरीर को चमकाती हुई, पवित्र और प्रकाशित होती हुई विचरण कर रही है।

विशेष – मैक्डानल ने 'अभ्वम् असितम्' का अर्थ किया है – काला दैत्य (**black monster**)।

१० र॒यिं दि॑वो दुहितरो वि॒भा॒तीः प्र॒जाव॑न्तं यच्छ॒ता॒स्मासु देवीः ।
स्यो॒नादा वः प्रति॒बुध्य॑मानाः सु॒वीर्य॑स्य पतयः स्याम ।।

पद-पाठः र॒यिम् ।दि॒वः ।दु॒हि॒त॒रः ।वि॒ऽभा॒तीः ।प्र॒जाऽव॑न्तम् ।य॒च्छ॒त॒ ।अ॒स्मासु॑ ।
दे॒वीः ।स्यो॒नात् ।आ ।व॒ः ।प्र॒ति॒ऽबुध्य॑मानाः ।सु॒ऽवीर्य॑स्य ।पत॑यः ।स्या॒म॒ ।।१० ।।

अन्वय – विभातीः दिवः दुहितरः अस्मासु प्रजावन्तम् रयिम् यच्छत । देवीः वः स्योनात् आ प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ।

संस्कृत व्याख्या – हे दिवो दुहितरः आदित्यस्य दुहितृस्थानीयाः विशेषेण भानं कुर्वत्यः अस्मासु प्रजावन्तम् पुत्राद्युपेतं रयिं धनं यच्छत दत्त । हे देवीः दीप्यमानाः उषसः स्योनात् सुखात् वः युष्मान् प्रतिबुध्यमानाः प्रतिबोधं प्राप्नुवन्तः वयं सुवीर्यस्य पुत्रादिसहितस्य धनस्य पतयः

पालकाः स्वामिनो वा स्याम भवेम।

शब्दार्थ – रयिम् – धन को। **दिवः** – प्रकाशमान सूर्य की। **दुहितरः** – पुत्रियाँ। **विभातीः** – प्रकाशित होने वाली। **प्रजावन्तम्** – पुत्र आदि से युक्त। **यच्छत** – प्रदान करो। **देवीः** दीप्तिशालिनी। **स्योनात्** – सुख से। **प्रतिबुध्यमानाः** – प्रतिबोधित होते हुये। **सुवीर्यस्य** – पुत्र आदि रूप उत्तम धन के। **पतयः** – पालक, स्वामी।

हिन्दी अनुवाद – प्रकाशित होने वाली प्रकाशमान सूर्य की पुत्रियो ! हे उषाओ ! हमें पुत्र आदि से युक्त धन को प्रदान करो। हे दीप्तिशालिनी उषाओ ! आपके द्वारा सुख से प्रतिबोधित होते हुये हम पुत्र आदि रूप उत्तम धन के पालक या स्वामी होवें।

विशेष – मैक्डानल ने कुछ शब्दों के इस प्रकार अर्थ किये हैं – स्योनात् प्रतिबुध्यमानाः – कोमल शय्या से जागते हुये (**awaking from our soft couch**), पतयः – स्वामी (**lords**) और सुवीर्यस्य – शक्तिशाली पुत्रों का समूह (**host of strong sons**)।

११ तद्वो॑ दिवो दुहितरो विभातीरुप॑ ब्रुव उषसो यज्ञकैतुः ।
वयं स्या॑म यशसो॒ जनेषु तद्द्यौश्च धत्तां पृथिवी च॑ देवी ।।

पद-पाठः तत् । वः । दिवः । दुहितरः । विऽभातीः । उप॑ । ब्रुवे । उषसः । यज्ञऽकैतुः ।
वयम् । स्याम । यशसः । जनेषु । तत् । द्यौः । च । धत्ताम् । पृथिवी । च देवी ।।

अन्वय – विभातीः दिवः दुहितरः उषसः ! यज्ञकेतुः वः तत् उप ब्रुवे । जनेषु वयम् यशसः स्याम। तत् द्यौः च पृथिवी च देवी धत्ताम्।

संस्कृत व्याख्या – हे दिवो दुहितरः उषसः ! विभातीः वः युष्मान् तत् वक्ष्यमाणं फलं यज्ञकेतुः यज्ञ एव केतुः प्रज्ञापकः यस्य सोऽहम् उपब्रुवे उपेत्य ब्रवीमि। वयं स्तुवन्त जनेषु अस्मत्समानेषु मध्ये यशसः कीर्तेः अन्नस्य वा स्वामिनः स्याम। तत् यशः द्यौः पृथिवी च देवी धत्ताम् धारयताम्।

शब्दार्थ – विभातीः – विशेष प्रकार के प्रकाशमान होती हुई। **उपब्रुवे** – समीप आकर कहता हूँ। **यज्ञकेतुः** – यज्ञ के ज्ञान को प्राप्त कराने वाला। **यशसः** – कीर्ति या अन्न के स्वामी। **धत्ताम्** – धारण करावें।

हिन्दी अनुवाद – विशेष प्रकार से प्रकाशमान होती हुई हे सूर्य की पुत्री रूप उषाओ ! यज्ञ से ज्ञान प्राप्त करने वाला मैं तुम्हें उसको (इस मन्त्र से प्राप्त होने वाले फल को) समीप आकर कहता हूँ। मनुष्यों में हम कीर्ति या अन्न को प्राप्त करें। उसे द्युलोक और पृथिवी देवी हमें धारण करावें।

विशेष – मैक्डानल ने 'यज्ञकेतु' का अर्थ 'यज्ञ जिसका झंडा है' (**whose banner is the sacrifice**) और 'यशसः' का अर्थ 'यशस्वी' (**famous**) किया है।

सविता-सूक्त

(मण्डल - ४, सूक्त - ५४)

ऋषि - वामदेव **देवता** - सविता **छन्द** - जगती, अन्तिम मन्त्र में त्रिष्टुप्

१ **अभूद्देवः सविता वन्द्यो नु न इदानीमह्न उपवाच्यो नृभिः ।**

वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ।।

पद-पाठः अभूत् । देवः । सविता । वन्द्यः । नु । नः । इदानीम् । अह्नः । उपऽवाच्यः । नृऽभिः । वि । यः । रत्ना । भजति । मानवेभ्यः । श्रेष्ठम् । नः । अत्र । द्रविणम् । यथा । दधत् ।।

अन्वय - सविता देवः अभूत् । नु नः वन्द्यः । इदानीम् अह्नः नृभिः उपवाच्यः । यः मानवेभ्यः रत्ना विभजति । अत्र नः श्रेष्ठम् द्रविणम् यथा दधत् ।

सायण - स सविता देवः अभूत् प्रादुरासीत् । असौ नु क्षिप्रमेव नोऽस्माकं वन्द्यः वन्दनीयो भवति । इदानीं यागकाले अह्नस्तृतीये सवने नृभिरस्मदीयैर्होतृभिः उपवाच्यः स्तुत्यो भवति । यः देवो मानवेभ्यः मनोरपत्येभ्यः यजमानेभ्यस्तेषामर्थाय रत्ना रमणीयानि धनानि विभजति सः देवः श्रेष्ठं प्रशस्यं द्रविणं गवादिलक्षणं धनं नः अस्मभ्यम् अत्रास्मिन् कर्मणि यथा दधत् दद्यादित्यर्थः तथा वन्द्य उपवाच्यश्चाभूदिति ।

शब्दार्थ - अभूत् - उत्पन्न हुये हैं। **सविता** - संसार को कर्मों में प्रेरित करने वाला देवता। **वन्द्यः** - वन्दनीय है। **इदानीम्** - अब, इस यज्ञ के समय में । **अह्नः** - दिन के (तृतीय सवन में) । **उपवाच्यः** स्तुति किये जाते हैं। **रत्ना** - रत्नों को, रमणीय पदार्थों को। **विभजति** - वितरित करता है। **द्रविणम्** - धन को। **आ दधत्** - धारण करावे ।

हिन्दी अनुवाद - **संसार को कर्मों में प्रेरित करने वाले सविता देवता प्रादुर्भूत हुये हैं। (शीघ्र ही) वे हमारे लिये वन्दनीय हैं। इस समय यज्ञ-काल में और दिन के तृतीय सवन में हमारे होताओं द्वारा वे स्तुति किये जाते हैं। जो सविता देवता मनुष्यों के लिये रत्नों को अर्थात् रमणीय पदार्थों को वितरित करते हैं, वे यहाँ यज्ञ के अवसर पर हमारे लिये श्रेष्ठ धन को धारण करावें।**

व्याकरण -

सविता - षू (सू) + तृच् (इट् का आगम) । गुण अवादेश - सवितृ ।

उपवाच्यः - उप + ब्रू (वच् आदेश) + ण्यत् । 'ऋहलोर्ण्यत्' सूत्र से उपधा वृद्धि ।

वन्द्यः - वदि (वन्द) + यत् - वद्य । नुम् का आगम् - वन्द्य ।

उपवाच्यः -उप + वच् + ण्यत् (य) - उपवाच्य । धातु की उपधा को वृद्धि ।

रत्ना - रत्नानि का वैदिक रूप ।

मानवेभ्यः – मनोः अपत्यम् । मनु + अण् – मानव। चतुर्थी का बहुवचन ।

दधत् – 'धा' धातु लोट् लकार, प्रथम पुरुष, एकवचन ।

विशेष – 'सविता' शब्द की निष्पत्ति 'षुञ् अभिषवे' अथवा 'षूङ् प्राणिगर्भविमोचने' से होती है। इसके अनेक अभिप्राय हैं – प्रकट होना, उत्पन्न होना, उत्पन्न करना, प्रेरित करना, आहुति देना, अधिकार सम्पन्न करना। 'प्रसवितृ' शब्द का प्रयोग भी इसी अर्थ में होता है। छन्द की पूर्ति के लिये 'वन्द्या' 'वाच्यो' और 'मानवेभ्यः' को क्रमशः 'वन्दियों', 'वाचियो' और 'मानवेभियः' पढ़ना चाहिये।

२ **देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।**

आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ।।

पद-पाठः देवेभ्यः । हि । प्रथमम् । यज्ञियेभ्यः । अमृतऽत्वम् । सुवसि । भागम् । उत्ऽतमम् । आत् । इत् । दामानम् । सवितः । वि । ऊर्णुषे । अनूचीना । जीविता । मानुषेभ्यः ।।

अन्वय – हि सवितः ! प्रथमम् यज्ञियेभ्यः देवेभ्यः अमृतत्वम् उत्तमम् भागम् सुवसि । आत् इत् दामानम् व्यूर्णुषे मानुषेभ्यः अनूचीना जीविता ।

सायण – प्रथमं देवेभ्यो हि। हि शब्दः प्रसिद्धौ । देवेभ्यः यज्ञियेभ्यः यज्ञार्हेभ्यः अमृतत्वं तत्साधनमुत्तममुत्कृष्टतमं भागं सोमादिलक्षणं सुवसि अनुजानासि। आदिद् अनन्तरमेव दामानं हविषां दातारं हे सवितः ! वि ऊर्णुषे प्रकाशयसि । मानुषेभ्यः यजमानेभ्यः जीविता जीवितानि अनूचीना अनुक्रमयुक्तानि । पितृपुत्रपौत्रा इत्यनुक्रमः । ईदृशानि । जीवितानि पश्चाद् व्यूर्णुषे प्रकाशयसि ।

शब्दार्थ – यज्ञियेभ्यः – यज्ञ के भाग को प्राप्त करने वाले। **अमृतत्वम्** – अमरता को प्राप्त कराने वाले। **उत्तमम्** – सबसे उत्कृष्ट। **भागम्** – यज्ञ के भाग को। **सुवसि** – प्रदान करते हो। **आत् इत्** – इसके पश्चात्। **दामानम्** – हवि प्रदान करने वाले यजमान को। **व्यूर्णुषे** – प्रकाशित करते हो। **अनूचीना** – अनुक्रम युक्त। **जीविता** – जीवन ।

हिन्दी अनुवाद – यह प्रसिद्ध है कि हे सविता देवता ! तुम पहले तो यज्ञ के भाग को प्राप्त करने वाले देवताओं के लिये अमरता को प्राप्त कराने वाले सबसे उत्कृष्ट यज्ञ-भाग को प्रदान करते हो और उसके पश्चात् हवि प्रदान करने वाले यजमान को प्रकाशित करते हो तथा मनुष्यों के लिये अनुक्रम से युक्त अर्थात् पिता-पुत्र-पौत्र इस क्रम से जीवन को प्रकाशित करते हो अर्थात् जीवन प्रदान करते हो।

व्याकरण – यज्ञियेभ्यः – 'यज्ञभागम् अर्हति' अर्थ में 'यज्ञ' से 'यज्ञर्त्विग्भ्याम्' से घञ् प्रत्यय। 'घ' को इयादेश – यज्ञिय।

अमृतत्वम् – मृ + क्त – मृत । न + मृत – अमृत । अमृतस्य भावः – अमृत +त्व – अमृतत्व

दामानम् – दा + मनिन् – दामन् । द्वितीया विभक्ति का एकवचन ।

ऊर्णुषे – ऊर्णु धातु, लट् लकार, मध्यम पुरुष, एकवचन ।

मानुषेभ्यः –मनु + षुक् (ष्) + अञ् – मानुष । चतुर्थी का बहुवचन ।

अनूचीना – 'अन्वग् भवाः' अर्थ में अनु + अञ्च् + ख (ईन) – अनूचीन। द्वितीया विभक्ति का बहुवचन। लोक में 'अनूचीनानि' रूप होगा।

विशेष – पीटर्सन ने 'दामानम्' को 'भागम्' का विशेषण माना है और इस शब्द को 'दो अवखण्डने' धातु से निष्पन्न कहा है।

छन्द के अनुरोध से 'यज्ञियेभ्यः'' ऽमृतत्वम्', व्यूर्णषे', और 'मानुषेभ्यः' को क्रमशः 'यज्ञियेभियः', 'अमृतत्वम्', 'वि ऊर्णुषे, 'अनूचीना' और 'मानुषेभियः' पढ़ना चाहिए।

३ अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता ।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ।।

पद-पाठः अचित्त्री । यत् । चकृम । दैव्ये । जने । दीनैः । दक्षैः । प्रऽभूती । पुरुषत्वता ।
देवेषु । च । सवितः । मानुषेषु । च । त्वम् । नः । अत्र । सुवतात् । अनागसः ।।

अन्वय – सवितः ! दैव्ये जने देवेषु च मानुषेषु च अचित्ती दीनैः दक्षैः प्रभूती पुरुषत्वता यत् चकृम, अत्र त्वम् नः अनागसः सुवतात् ।

सायण – हे सवितः ! वयमचित्ती अप्रज्ञया दैव्ये जने देवे त्वयि दीनैः दुर्बलैः पुत्रादिभिः ऋत्विग्भिर्वा तथा दक्षैः प्रवृद्धैबालैः प्रभूती ऐश्वर्यमदेनेति यावत् । पुरुषत्वता पुरुषवत्तया च यदागश्चकृम । न केवलं त्वय्येव कृतमपि तु देवेष्वन्येषु मानुषेषु चाज्ञानादिभिर्यच्चकृम नः कृतवतोऽस्मान् त्वमत्र अस्मिन् कर्मणि अनागसः अपापान् सुवतात् अनुजानीहि ।

शब्दार्थ – अचित्ती – अज्ञान से। **चकृम** – किया है (अपराध)। **दैव्ये** – दिव्य गुणों से युक्त आपके प्रति । **जने** – जन्म धारण करने वाले आपके प्रति । **दीनैः** – चतुरता से युक्त। **प्रभूती** – ऐश्वर्य के मद से। **पुरुषत्वता** – पौरुष के मद से। **देवेषु** – देवताओं के प्रति । **मानुषेषु** – सांसारिक मनुष्यों के प्रति । **सुवतात्** – बना दीजिये। **अनागसः** – अपराध रहित ।

हिन्दी अनुवाद – हे सविता देवता ! हमने दिव्य गुणों से युक्त जन्म धारण करने वाले आपके प्रति और अन्य देवताओं के प्रति एवं सांसारिक मनुष्यों के प्रति, अज्ञान से, दुर्बल अथवा बलशाली ऋत्विजों का, पुत्र आदियों के द्वारा अथवा ऐश्वर्य के मद से अथवा पौरुष के मद से जो कुछ भी अपराध किया है, इस यज्ञ में आप हमें उन अपराधों से अपराध रहित बना दीजिये।

व्याकरण –

अचित्ती – नञ् + चित् + क्तिन् । तृतीया विभक्ति का एकवचन, वैदिक रूप ।

चकृम – 'कृ' धातु, लिट् लकार, उत्तम पुरुष, बहुवचन ।

दैव्ये – देव + यञ् – दैव्य । आदि स्वर को वृद्धि तथा अन्तिम स्वर का लोप ।

प्रभूती – प्र + भू + क्तिन् – प्रभूति । तृतीया का एकवचन । वैदिक रूप ।

अनागसः – न विद्यते आगः येषां ते । बहुव्रीहि समास । द्वितीया का एकवचन ।

पुरुषत्वता – पुरुष + त्व + तल् + टाप् ।

सुवतात् – 'षू (सू)' धातू, लोट् लकार, मध्यम पुरुष, एकवचन ।

विशेष – ह्विटने के अनुसार 'दैव्ये जने' का अर्थ देवताओं का समूह (**The folk of goods**) है। पीटर्सन के अनुसार 'दीनैः' यह पद 'दक्षैः' का विशेषण है और 'दक्ष' का अर्थ है – बुद्धि। इस प्रकार यहाँ 'अपनी दुर्बल बुद्धियों से (**With feeble wit**) अर्थ होगा। उसके अनुसार यहाँ इस प्रकार अर्थ होगा – **Whatever we have done against the folk of the gods, as weak ones of ignorance, or as strong ones out of insolance**। 'पुरुषत्वता' पद का प्रयोग ऋग्वेद में एक ही अन्य मन्त्र ५/४८/५ में हुआ है।

छन्द के आग्रह से यहाँ 'दैव्ये', पुरुषत्वता' और 'त्वम्' को क्रमशः 'दैविये' 'पुरुषतुवता' और 'तुवम्' उच्चारण करना चाहिए।

४ न प्रमियें सवितुर्दैव्य॑स्य तद्यथा विश्वं भुवनं धारयिष्यति ।
यत्पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ।।

पद-पाठः न । प्रऽमियें । सवितुः । दैव्य॑स्य । तत् । यथा । विश्वम् । भुवनम् । धारयिष्यति ।

यत् । पृथिव्याः । वरिमन् । आ । सुऽअङ्गुरिः । वर्ष्मन् । दिवः । सुवति । सत्यम् । अस्य । तत् ।।

अन्वय – सवितुः दैव्यस्य तत् न प्रमिये यथा विश्वम् भुवनम् धारयिष्यति । स्वङ्गुरिः पृथिव्याः वरिमन् यत् सुवति आ दिवः वर्ष्मन् अस्य तत् सत्यम् ।

सायण – सवितुः दैव्यस्य देवस्य तत्कर्म न प्रमिये प्रमीयेत प्रहिंस्येत हिंसार्हं न भवतीत्यर्थः । कृत्यार्थे केन् प्रत्ययः । यद्वा दैव्यस्येति व्यधिकरणे षष्ठी । सा च कर्मार्था दैव्यं कर्मेत्यर्थः । कथमहिंस्यमित्यत आह । यथा विश्वं भुवनं धारयिष्यति धारयति । विश्वधारणरूपं यत्कर्मास्ति तन्न प्रमिये । तथा स्वङ्गुरिः शोभनाङ्गुल्युपलक्षितहस्तो यद् यः पृथिव्या वरिमन्ना। आकारश्चार्थे। भूम्या उरुत्वे च सुवति प्रेरयति। तथा दिवः द्युलोकस्य वर्ष्मन् उरुत्वे च सुवति । अस्य देवस्य तदुक्तं कर्म सत्यमबाध्यमिति ।

शब्दार्थ – प्रमिये – नष्ट होता है। **तत्** – वह जगत्-धारण रूप कर्म। **दैव्यस्य** – देवता का। **यथा** – जिन कर्मों द्वारा। **धारयिष्यति** – धारण करता है। **वरिमन्** – श्रेष्ठता, उन्नति। **सु अङ्गुरिः** – सुन्दर किरणों रूपी अङ्गुलियों वाला। **वर्ष्मन्** – शरीरधारी। **सुवति** – प्रेरणा देता है।

हिन्दी अनुवाद – सबको उत्पन्न करने वाले या प्रेरणा देने वाले सविता देवता का वह जगत् धारण रूप कर्म कभी नष्ट नहीं होता, जिन कर्मों के द्वारा वह सम्पूर्ण जगत् को धारण करता है। शोभन किरणों रूपी अङ्गुलियों वाला वह सविता देवता श्रेष्ठता या उन्नति के लिये जो प्रेरणा देता है और उच्च लोकों के निवासी शरीरधारियों के लिये प्रेरणा देता है, इसका वह कर्म वस्तुतः सत्य अर्थात् तीनों कालों में अबाध्य रूप से रहता है।

व्याकरण –

प्रमिये – प्र + मीञ् हिंसायाम् से कृत्य प्रत्यय के अर्थ में 'केन्' प्रत्यय। 'इयङ्' आदेश होकर – प्रमिये।

दैव्यस्य – देव + यञ् (स्वार्थ में) – दैव्य।

धारयिष्यति – धृ (णिजन्त) धातु, लृट् लकार, प्र० पु०, ए०व०। वर्तमान के अर्थ में लृट्।

वरिमन् – उरु + इमनिच्। 'उरु' को 'वर्' आदेश – वरिमन्।

स्वङ्गुरिः – शोभनाः अङ्गुरयो यस्य सः।

वर्ष्मन् – उरु + इमनिच्। 'उरु' को 'वर्ष्म्' आदेश 'इमनिच्' के 'इ' का लोप।

विशेष – 'वर्ष्मन्' का अर्थ ऊँचाई या उच्चतम प्रदेश (**height or hightest place**) भी होता है। ग्रासमान ने 'यथा' का अर्थ '**By which**' किया है। सत्यस्य तत्' का अर्थ है – **Surely that is his** अथवा **that work of his stands over.**

छन्द के आग्रह से 'दैव्यस्य' को 'दैवियस्य' और 'स्वङ्गुरिः' को 'सुवङ्गुरि', पढ़ना चाहिये।

५ **इन्द्रज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः।**
यथायथा पतयन्तो वियेमिर एवैव तस्थुः सवितः सवाय ते॥

पद-पाठः इन्द्रऽज्येष्ठान्। बृहत्ऽभ्यः। पर्वतेभ्यः। क्षयान्। एभ्यः। सुवसि। पस्त्यऽवतः।
यथाऽयथा। पतयन्तः। विऽयेमिरे। एव। एव। तस्थुः। सवितरिति। सवाय। ते॥

अन्वय – सवितः ! इन्द्रज्येष्ठान् बृहद्भ्यः पर्वतेभ्यः सुवसि एभ्यः पस्त्यावतः क्षयान्। यथा यथा पतयन्तः वियेमिरे एव एव ते सवाय तस्थुः।

सायण – हे सवितः ! इन्द्रज्येष्ठान् इन्द्रः परमैश्वर्ययुक्तस्त्वमेवं इन्द्रो वा ज्येष्ठः ज्यायान्

पूज्यो येषां ते तादृशाः । तानस्मान् बृहद्भ्यः पर्वतेभ्योऽप्यधिकान्सुवसि प्रेरयसि। यथा यथा पतयन्तः गच्छन्तः प्राणिनस्त्वया वियेमिरे विनियम्यन्ते त्वया ते तव सवाय अनुज्ञायै एवैव एवमेव नियमनमनतिक्रम्य तस्थुः तिष्ठन्ति ।

शब्दार्थ – **इन्द्रज्येष्ठान्** – परम ऐश्वर्य से युक्त तुम इन्द्र जिनके पूजनीय हो, इन्द्र जिनका पूजनीय है। **सुवसि** – प्रेरणा देते हो। **क्षयान्** – निवास स्थानों को। **पस्त्यावतः** – घरों से युक्त। **यथा यथा** – जैसे-जैसे। **पतयन्तः** – जीवन यापन करने वाले प्राणी । **वियेमिरे** – नियमों मे रहते हैं। **एव एव** – वैसे वैसे ही। **सवाय** – नियमों का पालन करने लिये । **तस्थुः** – अनुशासन में रहते हैं।

हिन्दी अनुवाद – हे सविता देवता ! परम ऐश्वर्य से युक्त तुम जिनके पूजनीय हो अथवा इन्द्र जिनका पूजनीय है ऐसे हमको तुम महान् पर्वतों से भी अधिक अर्थात् उनसे भी अधिक उन्नत रूप में प्रेरणा देते हो। इन यजमानों के लिये भवनों से युक्त अर्थात् विशाल निवास स्थानों को प्रेरित करते हो अर्थात् प्रदान करते हो। जैसे-जैसे जीवन यापन करने वाले प्राणी तुम्हारे लिये नियमों में रहते हैं, वैसे-वैसे ही वे तुम्हारे नियमों को पालन करने के लिये तुम्हारे अनुशासन में रहते हैं।

व्याकरण –

क्षयान् – 'क्षि निवासे' धातु से 'अच्' प्रत्यय – क्षय ।

पस्त्यावतः – 'पस्त्यं गृहम् अस्य अस्ति' अर्थ में पस्त्य + मतुप् । द्वितीया विभक्ति का बहुवचन।

पतयन्तः – णिजन्त 'पत्' धातु से शतृ प्रत्यय । प्रथमा विभक्ति का बहुवचन । लोक में पातयन्तः या पतन्तः बनेगा।

वियेमिरे – वि + यम् धातु, लिट् लकार, प्रथम पुरुष, बहुवचन ।

तस्थुः – स्था धातु, लट् लकार, प्रथम पुरुष, बहुवचन ।

सवाय – सू (षू) + अप् – सब । गुण तथा अवादेश ।

विशेष – सायण ने 'पर्वतेभ्यः' शब्द के अर्थ में 'अधिकान्' का अध्याहार करके अर्थ किया है – तुम हमें पर्वतों से अधिक उच्च प्रेरणा देते हो। परन्तु पीटर्सन ने सायण की इस व्याख्या को पटुतापूर्ण मानते हुये भी पूर्ण नहीं माना। उसने 'अधिकान्' को 'क्षयान्' का विशेषण मानकर अर्थ किया – पर्वतों से अधिक ऊँचे निवासों को । आर्य जाति का विश्वास रहा है कि देवगण पर्वतों पर निवास करते थे। उनके लिए 'गिरिष्ठाः' 'गिरिक्षिते' विशेषणों का प्रयोग किया गया है। 'पतयन्तो वियेमिरे' का यह भी अर्थ किया गया है – गिरते हुए नियन्त्रण से बाहर होते हैं। पिशेल ने 'पतयन्तो वियेमिरे' का अर्थ किया है – **They spread out their wings**

while they flew। पहाड़ों के पंख होने का उल्लेख प्राचीन साहित्य में मिलता है।

छन्द के अनुरोध से 'पर्वतेभ्यः' और 'पस्त्यावतः' को क्रमशः 'पर्वतेभियः' और 'पस्तियावतः' पढ़ना चाहिए।

६ ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवन्ति ।

इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैर्नो अदितिः शर्म यंसत् ।।

पद-पाठः ये । ते । त्रिः । अहन् । सवितरिति । सवासः । दिवेऽदिवे । सौभगम् । आऽसुवन्ति। इन्द्रः । द्यावापृथिवी इति । सिन्धुः । अत्ऽभिः । आदित्यैः ।नः ।अदितिः ।शर्म ।यंसत् ।।६ ।।

अन्वय – सवितः ये ते सवासः अहन् त्रिः आसुवन्ति, दिवे दिवे सौभगम् । इन्द्रः द्यावापृथिवी अद्भिः सिन्धुः आदित्यैः अदितिः नः शर्म यंसत् ।

सायण – ये यजमानाः, हे सवितस्ते त्वदर्थं सवासः सवाः सोमा। द्वितीयार्थे प्रथमा। सोमान्। यद्वा सवासः सवनानि प्रातरादीनि प्रति त्रिरहन् अभिषुण्वन्ति। न केवलमेकस्मिन्नेवाहनि सवनत्रयेषु अपि ते दिवेदिवे प्रतिदिनं सौभगं सौभाग्यजनकमासुवन्ति अभिषुण्वन्ति। तेभ्यो नोऽस्मभ्यमिन्द्रः शर्म यंसत् यच्छतु। द्यावापृथिव्यौ च अद्भिर्विशिष्टा सिन्धुः सिन्ध्वभिमानिदेवता आदित्यैः सहितादितिश्च शर्म यंसत् ।

शब्दार्थ – त्रिःअहन् – दिन में तीन बार । **सवासः** – सवन करने वाले। **दिवेदिवे** – प्रतिदिन। **सौभगम्** – सौभाग्य को। **आसुवन्ति** – अभिषव करते हैं। **अद्भिःसिन्धुः** – जलों से विशिष्ट सिन्धु। **आदित्यैः अदितिः** – आदित्य गणों के साथ देवमाता। **शर्म** – कल्याण। **यंसत्** – प्रदान करे।

हिन्दी अनुवाद – सबको प्रेरणा देने वाले हे सविता देवता ! सवन करने वाले जो यजमान तुम्हारे लिये दिन में तीन बार सोम का अभिषव करते हैं अर्थात् प्रातः सवन, माध्यन्दिन सवन और सायं सवन करते हैं और जो प्रतिदिन सौभाग्य को प्राप्त करने के लिये अभिषव करते हैं। इन्द्र, द्यावापृथिवी, जलों से विशिष्ट सिन्धु, आदित्य आदि गणों के साथ देवमाता अदिति हमारे लिये कल्याण प्रदान करें।

व्याकरण –

त्रिः – त्रि + सुच् (त्रिः वारम् अर्थ में) ।

अहन् – यहाँ सप्तमी विभक्ति का लोप छान्दस है।

अहन्त्सवितः – अहन् + सवितः । व्यञ्जन सन्धि के कारण मध्य में धुट् (ध् – त्) का आगम।

शर्म – शृ + मनिन् – शर्मन् ।

सवासः – प्रथमा का बहुवचन है। लोक में 'सवाः' रूप होगा ।

सौभगम् – सु + भग + अण् । सुभगस्य भावः अर्थ है।

दिवेदिवे – 'प्रतिदिनम्' के अर्थ में निपातनात् वैदिक अव्यय।

यंसत् – 'यम्' धातु, लट् लकार, प्रथम पुरुष, एकवचन ।

विशेष – पीटर्सन ने 'सवासः' में प्रथमा के अर्थ में द्वितीया मानकर इसको कर्म माना है। उसने इसका अर्थ इस प्रकार किया है – जो तीन बार अभिषुत किये जाने वाले सोम का अभिषव करते हैं। 'यंसत्' में प्रत्येक कर्त्ता की अलग-अलग विवक्षा करके एकवचन का प्रयोग किया गया है।

अश्विनौ सूक्त

(मण्डल – ७, सूक्त – ७१)

ऋषि – वसिष्ठ | **देवता** – युगल अश्विनौ | **छन्दः** – त्रिष्टुप्

१ **अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम् ।**

अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतम् ॥

पद-पाठः अप । स्वसुः । उषसः । नक् । जिहीते । रिणक्ति । कृष्णीः । अरुषाय । पन्थाम्।

अश्वऽमघा । गोऽमघा । वाम् । हुवेम । दिवा । नक्तम् । शरुम् । अस्मत् । युयोतम् ॥

अन्वय – स्वसुः उषसः नक् अपजिहीते । कृष्णीः अरुशाय पन्थाम् रिणक्ति । अश्वमघा गोमघा वाम् हुवेम। दिवानक्तम् अस्मत् शरुम् युयोतम् ।

सायण – स्वसुः स्वसृस्थानीयायाः उषसः सकाशात् नक् नक्तम् रात्रिः अपजिहीते अपगच्छति। कृष्णीः कृष्णवर्णा रात्रिः अरुषाय आरोचमानाय अह्ने सूर्याय वा पन्थाम् पन्थानं रिणक्ति रेचयति। हे अश्वमघा अश्वधनौ गौमघा गौधनौ अश्विनौ ! वां युवां हुवेम स्तुमः। दिवानक्तं दिवसे रात्रौ च सर्वदा अस्मत् अस्मत्तः शरुं हिंसकं युयोतं पृथक्कुरुतम् ।

शब्दार्थ – स्वसुः – बहन । **उषसः** – उषा से। **नक्** – रात्रि। **अपजिहीते** – दूर हो जाती है। **रिणक्ति** – खाली कर देती है। **कृष्णीः** – काली रात। **अरुषाय** – चमकते हुये सूर्य या दिन के लिये। **पन्थाम्** – मार्ग को। **अश्वमघा** – अश्वधन वाले । **गोमघा** – गोधन वाले। **हुवेम** – स्तुति करते है। **दिवानक्तम्** – दिन रात। **शरुम्** – हिंसा को। **युयोतम्** – दूर करो।

हिन्दी अनुवाद – बहिन उषा से रात्रि दूर हो जाती है। अर्थात् उषा के उदय होने के बाद रात्रि स्वयं हट जाती है। काले वर्ण की रात्रि चमकते हुये सूर्य या दिन के लिये मार्ग को खाली कर देती है। इसलिये हे अश्वधन वाले और गोधन वाले अश्विनीकुमारो ! तुम दोनों की हम स्तुति करते हैं। तुम दोनों दिन-रात हमसे हिंसा को दूर करो।

व्याकरण –

शरुम् – 'शृ हिंसायाम्' धातु से 'उ' प्रत्यय। शृ + उ – शुरु।

विशेष – मैक्डानल ने 'शुरु' का अर्थ 'बाण' (**arrow**) किया है।

२ **उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता ।**

युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ।।

पद-पाठः उपऽआयातम् । दाशुषे । मर्त्याय । रथेन । वामम् । अश्विना । वहन्ता । युयुतम् । अस्मत् । अनिराम् । अमीवाम् । दिवा । नक्तम् । माध्वी इति । त्रासीथाम् । नः ।। २ ।।

अन्वय – अश्विना दाशुषे मर्त्याय वामम् वहन्ता रथेन उपायातम् । अस्मत् अनिराम् अमीवाम् युयुतम् । माध्वी नः दिवानक्तम् त्रासीथाम् ।

सायण – हे अश्विनौ युवाम् उपायातम् अपागच्छतम् (अस्मदाह्वानं प्रति)। किमर्थमित्याह-दाशुषे हविषां दात्रे मर्त्याय यजमानय जनाय रथेन वामं वननीयं धनं वहन्ता वहन्तौ, अस्मत् अस्मत्तः अनिरां दारिद्र्यम् अमीवां रोगं च युयुतं पृथक्कुरुतम् । हे माध्वी मधुमन्तौ युवां नः अस्मान् दिवानक्तं अहर्निशं सर्वदा त्रासीथां रक्षतम्

शब्दार्थ – उपायातम् – आओ। **दाशुषे** – हवि प्रदान करने वाले। **वामम्** – सेवन के योग्य धन को। **वहन्ता** – वहन करते हुये। **युयुतम्** – पृथक् कर दो। **अस्मत्** – हमसे। **अनिराम्** – दरिद्रता को। **अमीवाम्** – रोग को। **माध्वी** – मधु से भरे हुये। **त्रासीथाम्** – रक्षा करो।

हिन्दी अनुवाद – हे अश्विनी देवताओ ! हवि प्रदान करने वाले यजमान मनुष्य के लिये सेवन के योग्य धन को वहन करते हुये रथ के द्वारा आओ। हमसे दरिद्रता और रोग को पृथक् करो। हे मधु से भरे हुये अश्विनी देवो ! हमारी दिन-रात रक्षा करो।

व्याकरण –

अनिराम् – न + इरा – अनिरा । इरा – अन्न।

विशेष – मैक्डानल के अनुसार अनिरा – आलस्य (**languor**) और माध्वी – मधु प्रेमी (**lovers of honey**)।

३ **आ वां रथमवस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु ।**

स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम् ।।

पद-पाठः आ ।वाम् ।रथम् ।अवमस्याम् ।विऽउष्टौ ।सुम्नऽयवः ।वृषणः ।वर्तयन्तु।

स्यूमऽगभस्तिम् ।ऋतयुक्ऽभिः ।अश्वैः ।आ ।अश्विना ।वसुऽमन्तम् ।वहेथाम् ।।

अन्वय – अवमस्याम् व्युष्टौ सुम्नायवः वृषणः वाम् रथम् आवर्तयन्तु । अश्विना ! स्यूमगभस्तिम् वसुमन्तम् ऋतयुग्भिः अश्वैः आवहेथाम् ।

सायण – अवमस्याम् आसन्नायां व्युष्टौ व्युच्छन्न उषसि वाम् युवयोः रथं सुम्नायवः सुखेन योजयन्तोऽश्वाः वृषणः वृर्षकाः युवाम् आवर्तयन्तु । स्यूमगभस्तिं सुखरश्मिं वसुमन्तं प्रदेयधनयुक्तं रथं हे अश्विना अश्विनौ ! ऋतयुग्भिः उदकयुक्तैः अश्वैः आवहेथाम् ।

शब्दार्थ – वाम् – तुम दोनों के। अवमस्याम् – आगामी या निकटवर्ती । व्युष्टौ – प्रातःकाल में। सुम्नायवः – सुख से जोते जाने वाले, सुख देने वाले। वृषणः – कामनाओं की वर्षा करने वाले घोड़े। आवर्तयन्तु – चलावें। स्यूमगभस्तिम् – सुखकारी लगामों वाले। ऋतयुग्भिः – जल से युक्त। वसुमन्तम् – दान देने योग्य धन से युक्त। आवहेथाम् – चलाओ।

हिन्दी अनुवाद – आगामी या निकटवर्ती प्रातःकाल में सुख से जोते जाने वाले या सुख देने वाले और कामनाओं की वर्षा करने वाले घोड़े तुम्हारे रथ को चलायें। हे अश्विनी देवताओ! सुखकारी लगामों वाले और दान के योग्य धनों से युक्त रथ को जल से युक्त घोड़ों से चलाओ।

व्याकरण –

स्युमगभस्तिम् – स्यूमाः सुखकराः गभस्तयः रश्मयः यस्य तम् । 'स्वि तन्तुसन्ताने' धातु से 'मन्' प्रत्यय । स्वि + मन् (म) – स्यूम ।

विशेष – मैक्डानल के अनुसार सुम्नायवः वृषणः – दयालु सांड घोड़े (**kindly stallions**) स्यूमगभस्तिम् – चमड़े के पट्टों से खींचा जाता हुआ (**drawn with thongs**) और ऋतयुग्भिः – ठीक समय पर जोते गये (**yoked in due time**)।

४ **यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उस्त्रयामा ।**

आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ।।

पद-पाठः यः ।वाम् ।रथः ।नृपती इति नृऽपती ।अस्ति ।वोळ्हा ।त्रिऽवन्धुरः । वसुऽमान् ।उस्त्रऽयामा ।आ ।नः ।एना ।नासत्या ।उप ।यातम् ।अभि । यत् ।वाम् ।विश्वऽप्स्न्यः ।जिगाति ।।४ ।।

अन्वय - नृपती यः वाम् रथः वोळ्हा त्रिवन्धुरः वसुमान् उस्रयामा अस्ति, नासत्या एना नः उप आ यातम् । यत् वाम् विश्वप्स्न्यः अभि जिगाति ।

सायण - हे नृपती नृणां पालकौ अश्विनौ ! वां युवयोः यः रथः वोळ्हा युवयोर्वाहकः अस्ति सर्वदा सन्निहितो वर्तते असौ त्रिवन्धुरः सारथ्याधिष्ठानत्रययुक्तः वसुमान् धनवान् उस्रयामा उस्रं दिवसं तत्प्रति गन्ता । एना एतेन रथेन हे नासत्या अश्विनौ ! नः अस्मान् उप आ यातम् । यत् रथः वां विश्वप्स्न्यः व्याप्तरूपः अभिजिगाति अभिगच्छति ।

शब्दार्थ - **नृपती** - मनुष्यों का पालन करने वाले। **वोळ्हा** - वाहक। **त्रिवन्धुरः** - सारथि सहित तीन व्यक्तियों के बैठने के स्थान से युक्त। **वसुमान्** - धन से सम्पन्न। **उस्रयामा** - दिन के प्रति जाने वाला। **एना** - इस रथ से। **नासत्या** - हे अश्विनीकुमारो। **उपयातम्** - पास आओ। **विश्वप्स्न्यः** - व्याप्त होने वाला, वसिष्ठ ऋषि। **अभिजिगाति** - स्तुति करता है।

हिन्दी अनुवाद - **मनुष्यों का पालन करने वाले हे अश्विनी देवताओ ! जो तुम्हारा रथ तुम दोनों का वाहक है, सारथि सहित तीन व्यक्तियों के बैठने के स्थान से युक्त है, धन से सम्पन्न है और दिन के प्रति जाने वाला है अर्थात् दिन भर चलता है, हे अश्विनीकुमारो ! इस रथ से तुम हमारे पास आओ। जो रथ संसार में व्याप्त होता हुआ अभिगमन करता है। अथवा जिस रथ की विश्वप्स्न्य, व्याप्त होने वाला अर्थात् वसिष्ठ ऋषि स्तुति करता है।**

विशेष - मैक्डानल के अनुसार उस्रयामा - प्रातःकाल के समय यात्रा करने वाला (**faring at daybreak**) और विश्वप्स्न्यः - भोजनों से भरा हुआ (**laden with foods**)।

५ युवं च्यवानं जरसोऽमुमुक्तं नि पेदवे ऊहथुराशुमश्वम् ।
निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ।।

पद-पाठः युवम् । च्यवानम् । जरसः । अमुमुक्तम् । नि । पेदवे । ऊहथुः । आशुम् । अश्वम् । निः । अंहसः । तमसः । स्पर्तम् । अत्रिम् । नि । जाहुषम् । शिथिरे । धातम् । अन्तरिति ।।

अन्वय - युवम् च्यवानम् जरसः अमुमुक्तम्, पेदवे आशुम् अश्वम् निः ऊहथुः अत्रिम् अंहसः तमसः निःस्पर्तम्, जाहुषम् शिथिरे अन्तः निधातम् ।

सायण - हे अश्विनौ युवं युवां च्यवानं च्यवननामानम् ऋषिं जरसः जीर्णाद् रूपाद् अमुमुक्तम् अमुञ्चतम् । पेदवे एतन्नामकाय राज्ञे आशुं शीघ्रगामिनम् अश्वं निः ऊहथुः युद्धे न्यवहतम् तथा अत्रिम् एतन्नामानम् ऋषिम् अंहसः तमसः गुहान्तः स्थिताद् अन्धकाराच्च निःस्पर्तं न्यपारयतम्। तथा जाहुषम् एतन्नामकं राजानं शिथिरे सञ्जाते अन्तः मध्ये निधातम् पुनः स्थापयतम्।

शब्दार्थ - **युवम्** - तुम दोनों ने। **च्यवानम्** - च्यवन् ऋषि को। **जरसः** - वृद्धावस्था से। **अमुमुक्तम्** - मुक्त किया था। **पेदवे** - पेदु नामक राजा के लिये। **निःऊहथुः** - पहुँचाया था।

आशुम् - तेज चलने वाले। **अंहसः** - पाप से। **तमसः** - अन्धकार से। **निःस्पर्तम्** - पार कराया था। **अत्रिम्** - अत्रि नामक ऋषि को। **जाहुषम्** - जाहुष नामक राजा को। **शिथिरे** - राज्य के भ्रष्ट होने पर। **निधातम्** - राज्य के भ्रष्ट होने पर। **निधातम्** - बिठला दिया था। **अन्तः** - राज्य के अन्दर।

हिन्दी अनुवाद - हे अश्विनी देवताओ ! तुम दोनों ने च्यवन ऋषि को वृद्धावस्था से मुक्त किया था। पेदु नामक राजा के लिये तेज चलने वाले घोड़े को युद्ध में पहुँचाया था, अत्रि नामक ऋषि को पाप से और गुफा के अन्धकार से पार कराया था और जाहुष नाम के राजा को उसके राज्य के भ्रष्ट हो जाने पर पुनः उस राज्य के अन्दर बिठला दिया था।

६ इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।

इमा ब्रह्माणि युवयून्यग्मन् यूयं पात स्वस्तिभिः सदा नः ।।

पद-पाठः इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् । इमा । ब्रह्माणि । युवऽयूनि । अगमन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ।।६ ।।

अन्वय - अश्विना इयम् मनीषा इयम् गीः वृषणा इमाम् सुवृक्तिम् जुषेथाः । इमा ब्रह्माणि युवयूनि अग्मन् यूयम् स्वस्तिभिः नः सदा पात ।

सायण - हे अश्विना अश्विनौ ! इयम् मनीषा मे इयम् कामना अस्ति इयं गीः मे इयं स्तुतिरस्ति यत् वृषणा कामानां वर्षितारौ युवाम् इमां सुवृक्तिं स्तुतिं जुषेथां स्वीकुरुतम्। इमा इमानि ब्रह्माणि व्यापकस्तुतिवाक्यानि युवयूनि नित्ययुवकाभ्यां युवाभ्याम् अगमन् प्राप्ताः भवेयुः । यूयं स्वस्तिभिः आशीर्वादैः कल्याणैः वा नः अस्मान् सदा पात रक्षतम् ।

शब्दार्थ - मनीषा - कामना। **गीः** -स्तुति को । **वृषणा** - कामनाओं की वर्षा करने वाले। **जुषेथाम्** - स्वीकार करो। **ब्रह्माणि** - व्यापक स्तुति वाक्य। **युवयूनि** - सदा युवा रहने वाले तुम दोनों को। **अग्मन्** - प्राप्त होवें। **पात** - रक्षा करो। **स्वस्तिभिः** - कल्याणों के द्वारा।

हिन्दी अनुवाद - हे अश्विनी देवताओ ! यह मेरी कामना है तथा यह मेरी स्तुति है कि कामनाओं की वर्षा करने वाले तुम मेरी इस स्तुति को स्वीकार करो। ये व्यापक स्तुति-वाक्य सदा युवा रहने वाले तुम दोनों को प्राप्त होवें। तुम कल्याणों द्वारा सदा हमारी रक्षा करो।

व्याकरण -

सुवृक्तिम् - सु + वृज् + क्तिन् ।

विशेष - छन्दःपूर्ति के लिये 'युवयून्यग्मन्' को 'युवयूनि अगमन्' पढना चाहिये।

सोम सूक्त

(मण्डल - ८, सूक्त-४८)

ऋषि - कण्वपुत्र प्रगाथ, **देवता** - सोम, **छन्दः** - त्रिष्टुप, पांच- जगती

१ स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ।।

पद-पाठः स्वादोः ।अभक्षि ।वयसः ।सुऽमेधाः ।सुऽआध्यः ।वरिवोवित्ऽतरस्य ।
विश्वे ।यम् ।देवाः ।उत ।मर्त्यासः ।मधु ।ब्रुवन्तः ।अभि ।सम्ऽचरन्ति ।।

अन्वय - सुमेधाः स्वाध्यः वरिवोवित्तरस्य स्वादोः वयसः अभक्षि, यम् विश्वे देवाः उत मर्त्यासः मधु ब्रुवन्त अभिसंचरन्ति ।

सायण - अहं प्रगाथः सुमेधाः शोभनप्रज्ञः स्वाध्यः स्वध्ययनः सुकर्मा वरिवोवित्तरस्य अतिशयेन पूजां लभमानस्य स्वादोः सुष्ठुवदनीयस्य स्वादुभूतस्य वयसः अन्नस्य ।एताः कर्मणि षष्ठ्यः। उक्तलक्षणं वयोऽन्नं वयोऽन्नं सोमाख्यम् अभक्षि भक्षयेय । यं यदन्नं विश्वे देवाः सर्वेऽपीन्द्रादयः उत अपि च मर्त्यासः मनुष्याः मधु ब्रुवन्तः मनोहरमेतदिति शब्दायन्तः अभिसञ्चरन्ति अभिसङ्गच्छन्ते प्राप्नुवन्ति तदन्नमभक्षीति ।

शब्दार्थ - स्वादोः - स्वादिष्ट।**अभक्षि** - खाने वाला बनूँ।**वयसः** - अन्न का ।**सुमेधाः** - उत्तम बुद्धि वाला। **स्वाध्यः** - उत्तम अध्ययन करने वाला।**वरिवोवित्तरस्य** - बहुत अधिक श्रेष्ठ।**विश्वे** - सब।**देवाः** - इन्द्र आदि देवता।**मर्त्यासः** - मनुष्य।**मधु** - मीठा।**ब्रुवन्तः** - कहते हुये।**अभिसंचरन्ति** - घूमते हैं।

हिन्दी अनुवाद - **उत्तम बुद्धि वाला, उत्तम अध्ययन करने वाला, मैं कण्व का पुत्र प्रगाथ नाम का ऋषि बहुत अधिक श्रेष्ठ स्वादिष्ट अन्न का खाने वाला बनूँ, जिस अन्न को सब इन्द्र आदि देवता और मनुष्य यह मीठा है, इस प्रकार से कहते हुये घूमते हैं। मैं उस अन्न का भक्षण करूँ।**

व्याकरण -

वरिवोवित्तरस्य - वरिवस् + विद्लृ + क्विप् + तरप् - वरिवोवित्तर। षष्ठी का एकवचन।

अभक्षि - भक्ष् धातु, लुङ् लकार, उत्तम पुरुष, एकवचन ।

ब्रुवन्तः - ब्रू + शतृ ।उवङ् आदेश - ब्रुवत् ।प्रथमा का बहुवचन ।

विशेष - मैक्डानल ने 'वरिवोवित्तरस्य' का अर्थ किया है - उत्तम विचारों को प्रेरित करने वाला । (**that stirs good thoughts**) ।

२ अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य ।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ।।

पद-पाठः अन्तरिति । च । प्र । अगाः । अदितिः । भवासि । अवऽयाता । हरसः । दैव्यस्य । इन्दो इति । इन्द्रस्य । सख्यम् । जुषाणः । श्रौष्टीऽइव । धुरम् । अनु । राये । ऋध्याः ।।

अन्वय - अन्तः च प्र अगाः । अदितिः दैव्यस्य हरसः अवयाता भवासि । इन्दो ! इन्द्रस्य सख्यम् जुषाणः श्रौष्टी धुरम् इव राये अनुऋध्याः ।

सायण - हे सोम ! त्वम् अन्तश्च प्रागाः । हृदयस्य यागागारस्य वा अन्तर्गच्छसि । गत्वा च अदितिः अदीनस्त्वं दैव्यस्य हरसः क्रोधस्य पृथक्कर्ता भवासि हर इति क्रोधनाम। हे इन्दो सोम ! त्वम् इन्द्रस्य सख्यं जुषाणः सेवमानः श्रौष्टी । श्रुष्टीति क्षिप्रनाम तत्सम्बन्धी श्रौष्टी। क्षिप्रगाम्यश्वः धुरम् इव राये अस्माकं धनलाभाय अनुऋध्याः अनुगच्छसि । अथवा अश्वो यथा धुरं वृत्वा अभिमतदेशं प्रापयति तद्वदस्मान् प्रापय । अनुपूर्व ऋधिर्गत्यर्थः ।

शब्दार्थ - अन्तः - हृदय के अन्दर तक । **प्रागाः** - गये हुये हो । **अदितिः** - दीन न रहते हुये। **दैव्यस्य** - देवताओं के। **हरसः** - क्रोध के। **अवयाता** - दूर करने वाले। **इन्दो** - हे सोम। **सख्यम्** - मित्रता को। **जुषाणः** - प्राप्त करते हुये। **श्रौष्टी** - शीघ्रगामी घोड़ा । **राये** - धन को प्राप्त कराने के लिये। **अनुऋध्या** - अनुगमन करते हो।

हिन्दी अनुवाद - **हे सोम ! तुम हृदय के अन्दर तक गये हुये हो । वहाँ जाकर दीन न रहते हुये तुम देवताओं के क्रोध के दूर करने वाले बनते हो। हे सोम ! इन्द्र की मित्रता को प्राप्त करते हुए तुम शीघ्रगामी घोड़ा जिस प्रकार धुरे का अनुगमन करता हुआ अभिमत स्थान को प्राप्त करता है, उसी प्रकार हमें धन को प्राप्त कराने के लिये अनुगमन करते हो।**

व्याकरण -

प्रागाः - प्र + इ (गा) धातु, लुङ् लकार, मध्यम पुरुष, एकवचन ।

भवासि - भू धातु, लोट् लकार, मध्यम पुरुष, एकवचन । वैदिक रूप ।

जुषाणः - जुष् + शानच् - जुषाण ।

श्रौष्टी - श्रुष्टि + अण् + ड़ीप् ।

ऋध्याः - ऋध् धातु, विधिलिङ्, मध्यम पुरुष, एकवचन।

अनुऋध्याः - अनु + ऋध् धातु गत्यर्थक होती है।

विशेष - मैक्डानल के अनुसार श्रौष्टी - आज्ञाकारिणी घोड़ी (**obedient mare**), अनुऋध्याः -आगे बढ़ते हो (**advance**)।

३ अपाम् सोममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ।

पद-पाठः अपाम ।सोमम् ।अमृताः ।अभूम ।अगन्म ।ज्योतिः।अविदाम ।देवान् ।
किम् ।नूनम् ।अस्मान् ।कृणवत् ।अरातिः ।किम् ।ऊँ इति ।धूर्तिः ।अमृत ।मर्त्यस्य ।।३ ।।

अन्वय – अमृत ! सोमम् अपाम, अमृताः अभूम, ज्योतिः अगन्म, देवान् अविदाम । अस्मान् अरातिः नूनम् किम् कृणवत् ।मर्त्यस्य धूर्तिः किमु ।

सायण – हे अमृत अमरण सोम त्वाम् अपाम पानं करवाम कुर्मः। ततः अमृताः अभूम भवेम। यस्मात् त्वम् अमृतः अतस्तव पानाद् वयमप्यमृताः स्याम। पश्चात् ज्योतिः द्योतमानं स्वर्गम् अगन्म। अविराम ज्ञातवन्तो देवान्। तथाभूतान् अस्मान् नूनम् अरातिः शत्रुः किं कृणवत् कुर्यात्। किमु किं वा मर्त्यस्य इदानीं मनुष्यभूतस्य मम धूर्तिः हिंसकः कि कृणवत् कुर्यात् ।

शब्दार्थ – अपाम – पान करें। **अमृताः** – मरणरहित। **अभूम** – हो गये हैं। **अगन्म** – जान लिया है, प्राप्त कर लिया है। **ज्योतिः** – प्रकाशमान लोकों को। **अविदाम** – प्राप्त कर लिया है। **अस्मान्** – हमारा। **कृणवत्** – कर सकता है। **अरातिः** – शत्रु। **धूर्ति** – धूर्तता।

हिन्दी अनुवाद – हे मरण रहित सोम ! हमने तुम सोम का पान किया है और मरण रहित हो गये हैं। हमने प्रकाशमान लोकों को जान लिया या प्राप्त कर लिया है और देवताओं को प्राप्त कर लिया है। इसलिये हमारा शत्रु अब निश्चय से क्या कर सकता है और मनुष्य की धूर्तता भी हमारा क्या कर सकती है। अर्थात् अब कोई हानि नहीं पहुँचा सकता।

व्याकरण –

अपाम, अभूम, अगन्म – पा, भू और गम् धातु, लड़् लकार, उत्तम पुरुष, बहुवचन।

अविदाम – 'विद् ज्ञाने' या 'विद्लृ लाभे' धातु लङ् लकार, उत्तम पुरुष, बहुवचन ।

कृणवत् – कृवि (कृण्व्) धातु, लेट् लकार, प्रथम पुरुष, एकवचन ।

४ शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ।।

पद-पाठः शम् ।नः ।भव ।हृदे ।आ ।पीतः ।इन्दो इति ।पिताऽइव ।सोम ।सूनवे। सुऽशेवः ।सखाऽइव ।सख्ये।उरुऽशंस ।धीरः ।प्र ।नः ।आयुः ।जीवसे ।सोम ।तारीः ।।४।।

अन्वय – इन्दो आपीतः नः हृदे शम् भव । सोम ! पिता सूनवे इव सखा सख्ये इव सुशेवः। उरुशंस सोम धीरः नः जीवसे आयुः प्रतारीः ।

सायण – हे इन्दो सोम अस्माभिः पीतः त्वं नः अस्माकं हृदे हृदयाय शं शुभम् आ भव ।

सुखभवने दृष्टान्तद्वयम् । पिता सूनवे स्वात्मजाय यथा सुखाय भवति यथा वा सखा अहितान्निवर्त्य हिते स्थापयिता सखा स्वसख्ये यथा सुशेवः सुसुखो भवति ।शेवमिति सुखनाम। तद्वत् त्वमपि भव। किञ्च हे उरुशंस ! बहुभिर्वहुधा वा शंसनीय बहुकीर्ते सोम धीरः धीमान् त्वं नः अस्माकं जीवसे जीवनाय आयुः आयुष्यं प्रतारीः प्रवर्धय ।

शब्दार्थ – शं भव – शुभ प्रदान करने वाला बनो । **हृदे** – हृदयों को । **आपीतः** – पीये जाते हुये। **इन्दो** – हे सोम । **सुशेवः** – सुख देने वाला । **उरुशंस** – बहुतों के द्वारा या बहुत प्रकार से स्तुति किये जाते हुये, महान् कीर्ति वाले । **धीरः** – बुद्धिमान् । **जीवसे** – जीवन के लिये । **तारीः** – बढाओ।

हिन्दी अनुवाद – हे सोम हमारे द्वारा पिये जाते हुये तुम हमारे हृदयों को शुभ प्रदान करने वाला बनो ।हे सोम ! जिस प्रकार पिता पुत्र के लिये सुख देने वाला होता है और मित्र मित्र के लिये सुख देने वाला होता है उसी प्रकार तुम हमारे लिये सुख देने वाले होओ। बहुतों के द्वारा या बहुत प्रकार से स्तुति किये जाते हुए महान् कीर्ति वाले हे सोम ! बुद्धिमान् तुम हमारे जीवन के लिये हमारी आयु को बढ़ाओ।

व्याकरण –

आपीतः – आ + पा + क्त ।पा के आ को ई आदेश ।

जीवसे – 'जीव धातु' से 'तुमुन्' के अर्थ में 'असेन्' प्रत्यय ।

तारीः – तृ धातु, लड़् लकार, मध्यम पुरुष का एकवचन ।

५ **इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु ।**

ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ।।

पद-पाठः इमे ।मा ।पीताः ।यशसः ।उरुष्यवः ।रथम् ।न ।गावः ।सम् ।अनाह । पर्वऽसु ।ते ।मा ।रक्षन्तु ।विऽस्रसः ।चरित्रात् ।उत ।मा ।स्रामात् ।यवयन्तु ।इन्दवः ।।५ ।।

अन्वय – इमे पीताः मा यशसः उरुष्यवः, गावः रथम् न पर्वसु समनाह ते मा विस्रसः चरित्रात् रक्षन्तु। उत इन्दवः मा स्रामात् यवयन्तु ।

सायण – इमे पीताः यशसः यशस्कराः उरुष्यवः अस्माकं रक्षाकामाः सोमाः गावः गोविकारभूताः वध्र्यः रथं न रथमिव ता यथा रथं विस्रस्तं पर्वसु समनाह सन्दधते तद्वत् मां पीताः सोमाः पर्वसु संनह्यन्तु। किञ्च ते सोमाः मा मां विस्रसः विस्रस्तात् चरणादनुष्ठानात् रक्षन्तु। सोमः पीतश्चेत् कर्म हाविस्रस्तं भवति। उत अपि च मा मां स्रामाद् व्याधेः इन्दवः पीताः यवयन्तु पृथक् कुर्वन्तु।

शब्दार्थ – पीताः – पिये जाते हुये। **यशसः** – कीर्तिकारक हैं। **उरुष्यवः** – रक्षा करने

वाले हैं। **गावः** – बैल । **समनाह** – पुष्ट करें। **पर्वसु** – पर्व के अवसरों पर। **विस्रसः** – पतित होते हुये। **स्रामात्** – व्याधि से। **यवयन्तु** – मुक्त रखें। **इन्दवः** – सोम ।

हिन्दी अनुवाद – ये पिये जाते हुये सोम मेरे लिये कीर्तिकारक हैं और हमारी रक्षा करने वाले हैं। जिस प्रकार जोते गये बैल रथ को तैयार रखते हैं उसी प्रकार ये सोम पर्व के अवसरों पर मुझको पुष्ट करें। वे सोम मेरी पतित होते हुये चरित्र से रक्षा करें और वे सोम मुझको व्याधि से मुक्त रखें।

व्याकरण –

यशसः – यशः कुर्वन्तिः – यशस् + मतुप् । मतुप् का छान्दस लोप – यशस्। प्रथमा का बहुवचन।

उरुष्यवः – उरुष्य् + उ – उरुष्यु । प्रथमा का बहुवचन ।

समनाह – णिजन्त 'णह्' धतु, लङ् लकार, प्रथम पुरूष का एकवचन – अनाह। सम् + अनाह – समनाह।

विस्रसः – वि + स्रंस् + क्विप् – विस्रस् । प्रथमा का बहुवचन।

चरित्रात् – चर् + इत्र – चरित्र । पञ्चमी का एकवचन ।

यवयन्तु – यु धातु, लोट् लकार, प्रथम पुरुष, बहुवचन। वैदिक रूप ।

विशेष – मैक्डानल के अनुसार गावः – लगाम (**straps**), पर्व – सन्धि (**joints**), विस्रसः चरित्रात् – एक टांग के टूटने से । (**from breaking a leg**)।

६ अ॒ग्निं न मा॑ मथि॒तं सं दि॑दीपः॒ प्र च॑क्षय कृ॒णु॒हि वस्य॑सो नः ।
अथा॒ हि ते॒ मद॒ आ सो॑म॒ मन्ये॑ रे॒वाँ इ॑व॒ प्र च॑रा पु॒ष्टिमच्छ॑ ॥

पद-पाठः अ॒ग्निम् । न । मा॒ । म॒थि॒तम् । सम् । दि॒दी॒पः॒ । प्र । च॒क्ष॒य । कृ॒णु॒हि । वस्य॑सः। न॒ः । अथ॑ । हि । ते॒ । मदे॑ । आ । सो॒म॒ । मन्ये॑ । रे॒वान्ऽइ॑व । प्र । च॒र॒ । पु॒ष्टिम् । अच्छ॑ ।।६ ।।

अन्वय – मा मथितम् अग्निम् न सम् दिदीपः , प्रचक्षय, नः वस्यसः कृणुहि। सोम ! अथ हि ते मदे आ मन्ये रेवान् इव पुष्टिम् अच्छ प्रचर ।

सायण – हे सोम ! पीतः त्वं मा मां मथितम् अग्निं न अग्निमिव संदिदिपः संदीपय । प्रचक्षय च चक्षुषः सन्धुक्षणेन । नः अस्मान् वस्यसः अतिशयेन वसुमतः कृणुहि कुरु । अथ अध ुना हि खलु ते त्वां हे सोम । मदे मदाय मन्ये स्तौमि। तथा सति रेवानिव धनवानिव । इवेति सम्प्रत्यर्थे। पुष्टिम् अस्मत् पोषम् अच्छ प्रचर अभिगच्छ ।

शब्दार्थ – अग्निं न – अग्नि के समान । **मा** – मुझको। **मथितम्** – प्रदीप्त। **संदिदीपः** –

दैदीप्यमान बना दो । **प्रचक्षय** - दीर्घदर्शी बनाओ। **कृणुहि** - बना दो। **वस्यसः** - धन से सम्पन्न। **मदे** - प्रसन्नता के लिये । **आमन्ये** - स्तुति करता हूँ। **रेवान्** - धनवान्। **पुष्टिम्** - पुष्टि को। **अच्छ** - निर्मल। **प्रचर** - बनाओ।

हिन्दी अनुवाद - **पिये जाते हुये हे सोम ! मुझको प्रदीप्त अग्नि के समान दैदीप्यमान बना दो और दीर्घदर्शी बनाओ। हमें अत्यधिक धन से सम्पन्न बना दो। हे सोम ! अब निश्चय ही तुम्हारी मैं प्रसन्नता के लिये स्तुति करता हूँ अर्थात् तुमको प्रसन्नता उत्पन्न करने वाला मानता हूँ। धनवान् के समान ही हमारी पुष्टि को तुम निर्मल बनाओ।**

व्याकरण - मथितम् - मथ् + (इट्) + क्त - मथित ।

दिदीपः - दीप् धातु, लिट् लकार, मध्यम पुरुष, एकवचन।

वस्यसः - वसु + मतुप् + ईयसुन् - वस्यस् । द्वितीया का बहुवचन।

कृणुहि - कृ धातु, लोट् लकार, मध्यम पुरुष, एकवचन । वैदिक रूप।

रेवान् - रे + मतुप् - रेवत् । प्रथमा का एकवचन ।

विशेष - मैडानल के अनुसार मथितम् - रगड़ने से उत्पन्न (**Kindled by friction**), प्रचक्षय - प्रकाशित करो (**illumine**), मदे - नशे में (**in intoxication**)। रेवानिव मन्ये - मैं अपने को धनवान् की तरह समझता हूँ। (**I regard myself as rich**)।

७ **इ॒षि॒रेण॑ ते॒ मन॑सा सु॒तस्य॑ भक्षी॒महि॒ पित्र्य॑स्येव रा॒यः ।**
सोम॑ राज॒न् प्र ण॒ आयूं॑षि तारी॒रहा॑नीव॒ सूर्यो॒ वास॒राणि॑ ।।

पद-पाठः इ॒षि॒रेण॑ । ते॒ । मन॑सा । सु॒तस्य॑ । भ॒क्षी॒महि॑ । पित्र्य॑स्यऽइ । रा॒यः ।
सोम॑ । रा॒ज॒न् । प्र । न॒ः । आयू॑षि । ता॒रीः । अहा॑निऽइव । सूर्यः । वा॒स॒राणि॑ ।।७ ।।

अन्वय - इषिरेण मनसा सुतस्य ते भक्षीमहि पित्र्यस्य रायः इव । सोम ! राजन् ! नः आयूंषि प्रतारीः सूर्यः वासराणि अहानि इव।

सायण - इषिरेण इच्छावता मनसा सुतस्य ते सुतमभिषुतं त्वां भक्षीमहि ! पित्र्यस्य पितृसम्बन्धिनो रायः धनस्येव धनमिव । पित्र्यं धनं यथेषणेन मनसोपभुञ्जते तद्वत्। भक्षित हे सोम! राजन् ! स्वामिन् नः अस्माकम् आयूंषि प्रतारीः प्रवर्धय । वासराणि जगद्वासकान्यहानि सूर्यः इव ।

शब्दार्थ - इषिरेण - इच्छा के अनुसार। **सुतस्य** - अभिषव किये गये। **भक्षीमहि** - भक्षण करता हूँ। **पित्र्यस्य** -पिता के। **रायः** - धन का। **प्रतारीः** - बढ़ाइये। **अहानि** - दिनों को। **वासराणि** - संसार को बसाने वाले।

हिन्दी अनुवाद – इच्छा के अनुसार मन से अभिषव किये गये, हे सोम ! मैं तुम्हारा भक्षण करता हूँ, अर्थात् पान करता हूँ, उसी प्रकार से जैसे इच्छानुसार पिता के धन का उपभोग किया जाता है। हे सोम ! सबके स्वामी राजन् ! आप हमारी आयुओं को उसी प्रकार से बढ़ाइये, जैसे सूर्य संसार को बसाने वाले दिनों को बढ़ाता है।

व्याकरण –

इषिरेण – इष् + इरच् – इषिर । तृतीया का एकवचन ।

सुतस्य – सु + क्त – सुत । षष्ठी का एकवचन ।

पित्र्यस्य – पितृ + यत् – पित्र्य । षष्ठी का एकवचन ।

भक्षीमहि – भक्ष् धातु, विधिलिङ्, उत्तम पुरुष, बहुवचन ।

तारीः – तृ धातु, लङ् लकार, मध्यम पुरुष, एकवचन । वैदिक रूप ।

विशेष – मैक्डानल ने 'वासराणि' का अर्थ 'वसन्त ऋतु सम्बन्धी' (**of spring**) किया है।

८ **सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्याऽस्तस्य विद्धि ।**
अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ।।

पद-पाठः सोम । राजन् । मृळय । नः । स्वस्ति । तव । स्मसि । व्रत्याः । तस्य । विद्धि । अलर्ति । दक्षः । उत । मन्युः । इन्दो इति । मा । नः । अर्यः । अनुऽकामम् । परा । दाः ।।

अन्वय – सोम ! राजन् ! नः स्वस्ति मृळय । व्रत्याः तव स्मसि । तस्य विद्धि । इन्दो ! दक्षः अलर्ति उत मन्युः । अर्यः अनुकामम् नः मा परा दाः ।

सायण – हे सोम राजन् नः अस्मान् स्वस्ति अविनाशाय मृळय सुखय च व्रत्याः व्रतिनो वयं तव स्मसि स्वभूताः स्म । तस्य तं स्वकीयं तव विद्धि जानीहि । अथवा तव त्वमित्यर्थः । त्वं जानीहि । किञ्चं हे इन्दो ! दक्षः प्रवृद्धोऽस्मच्छत्रुः अलर्ति गच्छति । उत अपि च मन्युः क्रोधः अलर्ति गच्छति । तादृशस्योभयविधस्य अर्यः अरेः अनुकामं यथाकामं नः अस्मान् मा पराः दाः परादेहि।

शब्दार्थ – राजन् – सबके स्वामी। **मृळय** – सुखी करो। **स्वस्ति** – कल्याण के साथ । **तव** – तुम्हारे। **स्मसि** – हैं। **व्रत्याः** – व्रत को धारण करने वाले। **तस्य** – तुम्हारा अपना। **विद्धि** – जानो। **अलर्ति** – जा रहा है। **दक्षः** – प्रवृद्ध हुआ शत्रु। **मन्युः** – क्रोध । **अर्यः** – शत्रु के। **अनुकामम्** – इच्छा के अनुसार । **परा दाः** –त्याग देना।

हिन्दी अनुवाद – हे सोम ! सबके स्वामी राजन् ! हमें कल्याण के साथ सुखी करो। व्रत को धारण करने वाले हम तुम्हारे हैं। ऐसे तुम्हारे हमको तुम अपना जानो । हे सोम ! प्रवृद्ध हुआ शत्रु जा रहा है और क्रोध जा रहा है। उन दोनों प्रकार के शत्रुओं की इच्छा के अनुसार हमें तुम त्याग मत देना।

व्याकरण –

व्रत्याः – व्रत + यत् – व्रत्य ।

अलर्ति – ऋ गतौ धातु, लट् लकार, प्रथम पुरुष, एकवचन । वैदिक रूप ।

अर्यः – अरि शब्द, षष्ठी विभक्ति, एकवचन । वैदिक रूप ।

परा दाः – परा पूर्वक 'दा' धातु, लोट् लकार, मध्यम पुरुष, एकवचन ।

विशेष – मैक्डानल के अनुसार व्रत्याः – उपासक (**devotees**) । दक्षः उत मन्युः अलर्ति – शक्ति और क्रोध उठता है (**There arise might and wrath**) ।

९ त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः ।
यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥

पद-पाठः त्वम् । हि । नः । तन्वः । सोम । गोपाः । गात्रेऽगात्रे । निऽससत्थ । नृऽचक्षाः ।
यत् । ते । वयम् । प्रऽमिनाम । व्रतानि । सः । नः । मृळ । सुऽसखा । देव । वस्यः ॥९॥

अन्वय – सोम ! त्वं हि नः तन्वः गोपाः, गात्रेगात्रे नृचक्षाः निषसत्थ । यत् ते व्रतानि वयम् प्रमिनाम, देव ! स वस्यः नः सुसखा मृळ ।

सायण – हे सोम देव त्वं नः अस्माकं तन्वः तनोरङ्गस्य गोपाः हि रक्षिता खलु । अतः गात्रेगात्रे सर्वेष्वङ्गेषु नृचक्षाः नृणां कर्मनेतृणां द्रष्टा त्वं निषसत्थ निषीदसि । यत् यद्यपि ते व्रतानि कर्माणि वयं प्रमिनाम हिंस्मः तथापि हे देव ! सः त्वं वस्यः श्रेष्ठान् नः अस्मान् सुसखा शोभनसखा सन् मृळ सुखय।

शब्दार्थ – तन्वः – शरीर की । **गोपाः** – रक्षा करो। **गात्रेगात्रे** – प्रत्येक अङ्ग में। **निषसत्थ** – स्थित हो जाओ। **नृचक्षाः** – मनुष्यों के कर्मों के द्रष्टा होते हुये। **प्रमिनाम** – नष्ट करते हैं। **व्रतानि** – कर्मों को, नियमों को । **मृळ** – सुखी करो। **सुसखा** – उत्तम मित्र होते हुये। **वस्यः** – श्रेष्ठ।

हिन्दी अनुवाद – हे सोम ! तुम निश्चय ही हमारे शरीर की रक्षा करो और हमारे प्रत्येक अङ्ग में मनुष्यों के कर्मों के द्रष्ट्य होते हुये स्थित हो जाओ। यद्यपि हम तुम्हारे कर्मों अथवा नियमों को नष्ट करते हैं, तथापि हे देव ! वे तुम श्रेष्ठ हमारे उत्तम मित्र होते हुये हमें सुखी करो।

व्याकरण -

तन्वः - तनु शब्द, षष्ठी का एकवचन ।

गोपा - णिजन्त गुप् + क्विप् ।

निषसत्थ - नि + सद्, लिट् लकार, मध्यम पुरुष, एकवचन ।

नृचक्षाः - नृ + चक्ष् + असुन् - नृचक्षस् । प्रथमा का एकवचन ।

प्रमिनाम - प्र + मि धातु, लट् लकार, उत्तम पुरुष, बहुवचन ।

विशेष - मैक्डानल ने 'वस्यः' का अर्थ अधिक कल्याण के लिये (**for higher welfare**) किया है।

१० **ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।**
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ।।

पद-पाठः ऋदूदरेण । सख्या । सचेय । यः । मा । न । रिष्येत् । हरिऽअश्व । पीतः । अयम् । यः । सोमः । नि । अधायि । अस्मे इति । तस्मै । इन्द्रम् । प्रऽतिरम् । एमि । आयुः ।। १० ।।

अन्वय - ऋदूदरेण सख्या सचेय, हर्यश्व ! यः पीतः मा न रिष्येत् यः अयम् सोमः अस्मे न्याधायि तस्मै प्रतिरम् आयुः इन्द्रम् एमि ।

सायण - अहं प्रगाथः ऋदूदरेण उदराबाधकेन सोमेन सख्या सचेय संगच्छेय । संगतो भवामि । 'ऋदूदरः सोमो मृदूदरः' (नि० ६.४) इति यास्कः । यः सोमः पीतः सन् मा मां रिष्येत् न हिंस्येत् हे हर्यश्व इन्द्र । सौम्ये सूक्ते इन्द्रस्य कीर्तनं सोमस्य इन्द्रस्वामिकत्वान्न विरुद्धम् । यः अयं सोमः अस्मासु न्यधासि निहितोऽभूत तस्मै सोमाय प्रतिरम् आयुः जठरे चिरकालावस्थानम् इन्द्रम् एमि याचे ।

शब्दार्थ - ऋदूदरेण - पेट को कष्ट न देने वाले । **सख्या** - मित्रता को । **सचेय** - प्राप्त करूँ । **मा** - मुझको । **न** - नहीं । **रिष्येत्** - हिंसित् करे । **हर्यश्व** - हे हरे घोड़ों वाले इन्द्र । **पीतः** - पिया जाता हुआ । **न्याघायि** - निहित हैं । **अस्मे** - हमारे में । **तस्मै** - उस सोम के लिये । **इन्द्रम्** - इन्द्र से । **प्रतिरम्** - दीर्घ । **एमि** - माँगता हूँ ।

हिन्दी अनुवाद - मैं प्रगाथ नाम का ऋषि पेट को कष्ट न देने वाले सोम से मित्रता को प्राप्त करूँ । हे हरे घोड़ों वाले इन्द्र ! जो पिया जाता हुआ सोम मुझको हिंसित न करे । यह जो सोम हमारे में निहित है, उस सोम के लिये मैं दीर्घ आयु को इन्द्र से माँगता हूँ ।

व्याकरण -

ऋदूदरेण - ऋदु उदरं यस्य तेन ।

सचेय – सच् धातु, विधिलिङ्, उत्तम पुरुष, एकवचन ।

रिष्येत् – रिष् धातु, विधिलिङ्, प्रथम पुरुष, एकवचन ।

हर्यश्व – हरयः अश्वाः यस्य सः । बहुब्रीहि समास ।

अस्मे – सप्तमी के अर्थ में 'शे' आदेश हुआ है।

न्याधायि – नि + धा धातु, लङ् लकार, प्रथम पुरुष, एकवचन ।

विशेष – मैक्डानल ने 'हर्यश्व' का अर्थ 'घोड़ों का स्वामी' (**lord of bays**) किया है। उसके अनुसार दो पादों का अर्थ इस प्रकार है – **For (the enjoyment of) that soma which has been deposited in us. I approach Indra to prolong our years.**

११ अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः ।
आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ।।

पद-पाठः अप । त्याः । अस्थुः । अनिराः । अमीवा । निः । अत्रसन् । तमिषीचीः । अभैषुः। आ । सोमः । अस्मान् । अरुहत् । विऽहायाः । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ।।

अन्वय – त्याः अनिराः अमीवाः अप अस्थुः तमिषीचीः निःअत्रसन् अभैषुः, विहायाः सोमः अस्मान् आ अरुहत्। यत्र आयुः प्रतिरन्ते अगन्म ।

सायण – त्या ताः अनिराः प्रेरयितुमशक्याः अमीवाः बलवत्यः पीडाः अप अस्थुः अपगच्छन्तु। याः तमिषीचीः बलवत्योऽस्मान् निः नितराम् अत्रसन् प्राप्नुवन् तथा अभैषुः कम्पयन्ति । अपगमे कारणमाह । यस्मात् सोमः विहायाः महान् सन् अस्मान् आ अरुहत् आगमत् प्राप्तवान् अतोऽपास्थुरिति भावः । यत्र यस्मिन् सोमे पीते आयुः आयुष्यं प्रतिरन्ते वर्धयन्ति मनुष्यास्तं सोमम् अगन्म इति ।

शब्दार्थ – **त्याः** – वे। **अप अस्थुः** – दूर हट गये है। **अनिराः** – प्रेरणा न दिये जा सकने वाले। **अमीवाः** – बड़े बड़े रोग । **निः अत्रसन्** – डराते थे। **तमिषीचीः** – बहुत बलवान्। **अभैषुः** – कंपाते थे। **अस्मान्** – हमें। **आ अरुहत्** – प्राप्त हो गया है। **विहायाः** – महान् बनता हुआ। **अगन्म** – प्राप्त करें। **प्रतिरन्ते** – बढा देते हैं।

हिन्दी अनुवाद – वे प्रेरणा न दिये जा सकने वाले बड़े-बड़े रोग हमसे दूर हट गये हैं, जो बहुत बलवान् थे और हमें डराते थे तथा कंपाते थे, क्योंकि महान् बनता हुआ सोम हमें प्राप्त हो गया है। जिस सोम के पी लेने पर वे आयु को बढ़ा देते हैं, हम मनुष्य उस सोम को प्राप्त करें।

व्याकरण – **तमिषीचीः** – तमिषीम् अञ्चति अर्थ में तमिषी + अञ्च् + क्विप् – तमिष्यन्। प्रथमा विभक्ति का बहुवचन।

विशेष – मैक्डानल के अनुसार तमिषीची: – अन्धकार की शक्तियाँ (**Powers of darkness**), विहाया – शक्ति से (**with might**)।

१२ यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्यौ आविवेश ।

तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ।।

पद-पाठः यः । नः । इन्दुः । पितरः । हृत्ऽसु । पीतः । अमर्त्यः । मर्त्यान् । आऽविवेश ।

तस्मै । सोमाय । हविषा । विधेम । मृळीके । अस्य । सुऽमतौ । स्याम ।। १२।।

अन्वय – पितरः ! यः इन्दुः हृत्सु पीतः अमर्त्यः नः मर्त्यान् आविवेश तस्मै सोमाय हविषा विधेम अस्य मृळीके सुमतौ स्याम ।

सायण – हे पितरः यः इन्दुः हृत्सु पीतः सन् अमर्त्यः मृतिरहितः सन् मर्त्यान् नः अस्मान् आविवेश तस्मै सोमाय हविषा विधेम परिचरेम । अस्य सोमस्य मृळीके सुखे सुमतौ चानुग्रहबुद्धौ च स्याम भवेम ।

शब्दार्थ – इन्दुः – सोम । **पितरः** – हे पितरो । **हृत्सु** – हृदयों में । **अमर्त्यः** – मृत न होता हुआ । **मर्त्यान्** – मरणधर्मा मनुष्यों में । **आविवेश** – प्रविष्ट हुआ है । **मृळीके** – सुख में । **सुमतौ** – अनुग्रह बुद्धि में ।

हिन्दी अनुवाद – हे पितरो ! जो सोम हमारे हृदयों में पिया गया और कभी मृत अर्थात् नष्ट न होता हुआ हम मरणधर्मा मनुष्यों में प्रविष्ट हुआ है, उस सोम की हम हवि प्रदान करके पूजा करते हैं और हम इस सोम के सुख में और उसकी अनुग्रह बुद्धि में रहें।

व्याकरण –

आविवेश – आ + विश् + लिट् लकार, प्रथम पुरुष, एकवचन ।

विधेम, स्याम – विध्, अस् धातु, विधिलिङ्, उत्तम पुरुष, बहुवचन ।

विशेष – मैक्डानल के अनुसार 'मृळीके का अर्थ है – कृपा (**mercy**)।

१३ त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।

तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ।।

पद-पाठः त्वम् । सोम । पितृऽभिः । सम्ऽविदानः । अनु । द्यावापृथिवी इति । आ । ततन्थ । तस्मै । ते । इन्दो इति । हविषा । विधेम । वयम् । स्याम । पतयः । रयीणाम् ।। १३ ।।

अन्वय – सोम ! त्वम् पितृभिः संविदानः द्यावापृथिवी अनु आ ततन्थ । इन्दो ! तस्मै ते हविषा विधेम । वयम् रयीणाम् पतयः स्याम ।

सायण – हे सोम ! त्वं पितृभिः सह संविदानः संगच्छमानः द्यावापृथिवी द्यावापृथिव्यो अनु आ ततन्थ क्रमेण विस्तारयसि ।तस्मै सोमाय हविषा विधेम परिचरेम ।वयं रयीणां धनानां पतयः स्याम भवेम ।

शब्दार्थ – पितृभिः – पितरों के साथ ।**संविदानः** – संगत होता हुआ।**आततन्थ** – विस्तृत करते हो।**इन्दो** – हे सोम ।**हविषा** – हवि के द्वारा।**विधेम** – पूजा करते हैं।**पतयः** – स्वामी।**रयीणाम्** – धनों के।

हिन्दी अनुवाद – हे सोम ! तुम पितरों के साथ संगत होते हुये द्युलोक और पृथिवी लोक को क्रमशः विस्तृत करते हो।हे सोम ! हम उस तुम्हारी हवि के द्वारा पूजा करते हैं।हम धनों के स्वामी बनें।

व्याकरण –

संविदानः – सम + विद् + शानच् – संविदान ।

द्यावापृथिवी – द्यौश्च पृथिवी च ।वैदिक रूप ।

आततन्थ – आ + तन् धातु, लिट् लकार, मध्यम पुरुष, एकवचन ।

रयीणाम् – रयि शब्द, षष्ठी का बहुवचन ।

विशेष – मैक्डानल के अनुसार 'द्यावापृथिवी अनु आ ततन्थ' का अर्थ है –

अन्तरिक्ष और पृथिवी के ऊपर फैले हुये हो (**hast extended over Heaven and Earth**)।

१४ त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ।।

पद-पाठः त्रातारः ।देवाः ।अधि ।वोचत ।नः ।मा ।नः ।निऽद्रा ।ईशत ।मा ।उत ।जल्पिः ।वयम् ।सोमस्य ।विश्वह ।प्रियासः ।सुऽवीरासः ।विदथम् ।आ ।वदेम् ।।१४ ।।

अन्वय – त्रातारः देवाः ।नः अधिवोचत ।नः निद्रा मा ईशत उत जल्पिः मा।वयम् विश्वह सोमस्य प्रियासः सुवीरासः विदथम् आ वदेम ।

सायण – हे त्रातारः रक्षितारो हे देवाः नः अस्मान् अधिवोचत अधिवचनं कुरुत ।नः अस्मान् निद्राः स्वप्नाः मा ईशत ईश्वरा मा भूवन् बाधितुम्।उत अपि च जल्पिः निन्दकः अस्मान् मा निन्दतु।वयं सोमस्य प्रियासः प्रियाः स्याम विश्वह सर्वेष्वपि अहःसु ।सर्वदेत्यर्थः ।सुवीरासः शोभनपुत्राः सन्तः विदथं स्तोत्रम् आभिमुख्येन वदेम।अथवा सुपुत्रा विदथं गृहम् आवदेम । आवेदनं पुत्रपौत्राणां धनेनोपच्छन्दनम् ।

शब्दार्थ – त्रातारः – रक्षा करने वाले। **अधिवोचत** – उपदेश दो। **मा ईशत** – कभी नहीं अधिकार करे। **उत** – और । **जल्पिः** – निन्दक। **विश्वह** – सब दिनों में । **प्रियास** – प्रिय बने रहें। **सुवीरासः** – उत्तम पुत्रों वाले हाते हुये। **विदथम्** – स्तुति को, घर को।

हिन्दी अनुवाद – हे रक्षा करने वाले देवताओ ! हमें उपदेश दो । हमारे ऊपर नींद कभी नहीं अधिकार करे अर्थात् बाधा न पहुँचावे और निन्दक हमें बाधा न पहुँचावे। हम सब दिनों में अर्थात् सदा सोम के प्रिय बने रहें और उत्तम पुत्रों वाले होते हुये तुम्हारी स्तुति करते रहें अथवा घरों में हमारे उत्तम पुत्र-पौत्र भरे रहें।

व्याकरण -

त्रातारः – त्रा + तृच् – त्रातृ ।

वोचत – वच् धातु, लोट् लकार, मध्यम पुरुष, बहुवचन । वैदिक रूप ।

प्रियासः, सुवीरासः – प्रिय और सुवीर शब्द, प्रथमा का बहुवचन । वैदिक रूप।

विदथम् – विद् + अथच् – विदथ ।

विशेष – मैक्डानल ने 'जल्पि' का अर्थ 'व्यर्थ की बाते' (**idle talk**) किया है।

१५ त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ।।

पद-पाठः त्वम् । नः । सोम । विश्वतः । वयःऽधाः । त्वम् । स्वःऽवित् । आ । विश । नृऽचक्षाः । त्वम् । नः । इन्दो इति । ऊतिऽभिः । सऽजोषाः । पाहि । पश्चातात् । उत । वा । पुरस्तात् ।। १५ ।।

अन्वय – सोम ! त्वम् नः विश्वतः वयोधाः । स्वर्वित् नृचक्षाः त्वम् आ विश । इन्दो ! ऊतिभिः सजोषाः त्वम् नः पश्चातात् उत वा पुरस्तात् पाहि ।

सायण – हे सोम ! त्वं नः अस्माकं विश्वतः सर्वाभ्यः दिग्भ्यः वयोधाः अन्नदाता । तथा त्वं स्वर्वित् स्वर्गलम्भकः नृचक्षाः सर्वमनुष्यद्रष्टा त्वम् आ विश। हे इन्दो ! त्वं सजोषाः सह प्रीयमाणः सन् ऊतिभिः सह अथवा ऊतयो गन्तारो मरुतः । तैः सहितः सन् पश्चातात् पश्तात् उत वा पुरस्तात् च पाहि ।

शब्दार्थ – विश्वतः – सब दिशाओं से। **वयोधाः** – अन्न या आयु को देने वाले हो। **स्वर्वित्** – स्वर्ग को देने वाले। **आ विश** – आकर बैठो। **नृचक्षाः** – मनुष्यों को देखने वाले। **ऊतिभिः** – रक्षाओं के साथ । **सजोषाः** – प्रीतिदायक होते हुये। **पाहि** – रक्षा करो। **पश्चातात्** – पीछे से। **पुरस्तात्** – सामने से।

हिन्दी अनुवाद – हे सोम ! तुम हमें सब दिशओं से अन्न को या आयु को देने वाले हो। स्वर्ग को देने वाले और सब मनुष्यों को देखने वाले तुम यहाँ आकर बैठो। हे सोम ! रक्षाओं के साथ प्रीतिदायक होते हुये तुम हमारी पीछे से और सामने से रक्षा करो।

व्याकरण – वयोधाः – वय: दधाति। वयस् + धा + क्विप्।

स्वर्वित् – स्व: वेत्ति। स्वर् + विद् + क्विप्।

विश, पाहि – विश् और पा धातु, लोट् लकार, मध्यम पुरुष, एकवचन।

विशेष – मैक्डानल के अनुसार वयोधा: – शक्ति को देने वाला (**giver of strength**) स्वर्वित् – प्रकाश को पाने वाला (**finder of light**), प्रीयमाण: – अनुकूल (**accordant**)।

पुरूरवा-उर्वशी

(मण्डल-१०, सूक्त-९५)

१. हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु।
न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन्॥ १॥

पद-पाठः हये। जाये। मनसा। तिष्ठ। घोरे। वचांसि। मिश्रा। कृणवावहै। नु।
न। नौ। मन्त्राः। अनुदितासः। एते। मयः। करन्। परऽतरे। चन। अहन्॥

अन्वयः— हये घोरे जाये! मनसा तिष्ठ। वचांसि मिश्रा न कृणवावहै। नौ एते अनुदितासः मन्त्राः परतरे अहन् मयः चन न करन्।

भा०— पुरूरवा: जायाम् उर्वशी-नामिकां वदति— हे घोरकारिणि जाये! मनसा निवस। येन आवाम् मिश्राणि वचांसि वदावः। आवयोः एते अनुदिताः मन्त्राः (रहस्यार्थाः) आगामि-दिवसेषु सुखं न करिष्यन्ति, दुःखमुत्पादयिष्यन्ति इत्याशयः। अतः मम समीपे उपविश्य मया सार्द्धं मधुरम् आलापं कुरु] ॥१॥

पद-व्याख्या—पुरूरवसो१० वाक्यम्। जायां पश्यन् वदति। vहये हे vघोरे। अस्माकं दुःखजनकत्वात्। घोरकारिणि vजाये vमनसा अस्मदुपर्यनुरागवता मनसा युक्ता सती vतिष्ठ क्षणमात्रं संनिधावेव निवस। इये इत्यस्य निघाताभावश्छान्दसः। किमर्थं संस्थानमिति तत्राह। vवचांसि वाकयानि मिश्राणि उक्तिप्रत्युक्तिरूपाणि vनु अद्य क्षिप्रं वा vकृणवावहै करवावहै। 'कृवि हिंसाकरणयोः'। 'धिन्विकृण्व्योरच्च' इत्युप्रत्ययः। मिर्थं वचसः करमिति चेदुच्यते। vनौ आवयोः vमन्त्राः रहस्यार्थाः vएते विवक्षिताः vअनुदितासः अव्याह्रियमाणाः परस्परमसंभाष्यमाणा गुम्फिताः सन्तः vपरतरे vचनाहन्। चनेति निपातसमुदायश्चार्थे। अनेकेषु दिवसेषु चरमेऽप्यहनि vमयः। सुखनामैतत्। सुखं vन vकरन् कुर्वन्ति। अतः कृणवावहा इति॥

हि० अ०— पुरूरवा अपनी उर्वशी नामक पत्नी से कहता है— [मुझे वियोग-जन्य] कष्ट पहुंचाने वाली हे मेरी पत्नी! [मेरे प्रति] अनुरक्त मन से [मेरे पास] रहो। [और हम दोनों] आपस में [भविष्य के विषय में] बातचीत कर लें। हम दोनों के मन में एक दूसरे के प्रति जो विचार उठते हैं उन्हें यदि नहीं कहा गया तो वे हमें बहुत दिनों तक सुख नहीं देंगे, [दुःख ही देंगे। अतः मेरे समीप बैठकर मेरे साथ मधुर आलाप करो]।।१।।

२. किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव।

पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि।। २।।

पद-पाठः किं। एता। वाचा। कृणव। तव। अहम्। प्र। अक्रमिषं। उषसां। अग्रियाऽइव।
पुरूरवः। पुनः। अस्तम्। परा। इहि। दुःऽआपना। वातःऽइव। अहं। अस्मि।।

अन्वय— पुरूरवः! एता वाचा किं कृणवा। उषसाम् अग्रियेव अहं तव प्राक्रमिषम्। अहं वात इव दुरापना अस्मि। पुनः अस्तम् परेहि।

भा०— उर्वशी पुरूरवसं प्रत्युवाच— हे पुरूरवः! एतया वाचया किं करवाव? यथा बह्वीनाम् उषसाम् मध्ये अग्र्या अग्रे भवा पूर्वोषाः प्रक्रमणं करोति तथाऽहमपि त्वत्सकाशाद् अतिक्रान्तवती अस्मि (यथा गच्छन्ती उषाः प्रत्यावर्तयितुं न शक्यते, तथैव त्वत्तः गच्छन्ती अहमपि त्वया प्रत्यावर्तयितुं न शक्या। अतः वार्तालापो व्यर्थः।) यथा वायुः प्राणिना दुष्प्राप्यो भवति — न खलु कश्चित् प्राणी वायुं धारयितुं समर्थो भवति इत्यर्थः, तथाऽहमपि त्वया दुष्प्राप्याऽस्मि। अतः त्वं मम सकाशत् प्रतिनिवृत्य पुनः स्वगृहं गच्छ।।२।।

पद-व्याख्या—अनया तमुर्वशी प्रत्युवाच। vएताएतया vवाचा केवलया पुनःसंभोगरहितया vकिं vकृणव किं करवाव। vअहं त्विदानीं त्वत्सकाशात् vप्राक्रमिषम् अतिक्रान्तवत्यस्मि। अतिक्रमे दृष्टान्तः। vउषसामग्रियेव। बह्वीनामुषसां मध्येऽग्रयाग्रे भवा पूर्वोषाः प्राक्रमीद्यथा तथाहमपीति। यस्मादेवं तसमद्धे vपुरूरवः त्वं vपुनः अस्मत्सकाशात् vअस्तं गृहं vपरेहि परागच्छ। मा मय्यभिलाषं कार्षीः। स्वस्या दुर्ग्रहत्वमाह। vअहं vवातइव वायुरिव vदुरापना दुष्प्रापा दुरापा वा vअस्मि। 'दुरापा वा अहं त्वयैतर्ह्यस्मि पुनर्गृहानिहीति हेवैनं तदुवाच' (श०ब्रा० ११.५.१.७) इति वाजसनेयकम्।।

हि० अ०— उर्वशी ने पुरूरवा को उत्तर दिया— हे पुरूरवा! अब तुम्हारे साथ नहीं रहूंगी। जैसे अनेक उषाओं में से पर-पर-वर्ती उषाएं पूर्व-पूर्व-वर्ती उषाओं को लांघ जाती हैं, किसी के रोके नहीं रुकतीं, वैसे ही मैं भी तुम्हारे रोके नहीं रुकूंगी। जैसे वायु किसी के हाथ नहीं आती, उसी प्रकार मैं भी अब तुम्हारे हाथ नहीं आऊँगी। अतः तुम वापस घर लौट जाओ।।२।।

३. इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः।

अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः।।३।।

पद-पाठः इषुः। न। श्रिये। इषुऽधेः। असना। गोऽसाः। शतऽसाः। न। रंहिः।
अवीरे। क्रतौ। वि। दविद्युतत्। न। उरा। न। मायुम्। चितयंत। धुनयः।।

अन्वयः— इषुधेः इषुः श्रिये असना न। रंहिः गोषाः शतसा न। अवीरे क्रतौ न वि दविद्युतत्। धुनयः उरा मायुं न चितयंत।

भा०— पुरूरवाः स्वस्य विरहजनितं वैक्लव्यम् उर्वशीं प्रति ब्रूते— अहं श्रिये निषंगात् बाणं प्रक्षेप्तुं न समर्थोऽस्मि। त्वद्-विरहाद् युद्ध-विरतो जातोऽस्मि इत्याशयः। अहं शत्रूणां गवां, शतानाम् धनानां च वेगवान् बलाद् हर्ता न भवामि। शत्रूणां गाः धनानि च बलाद् हर्तुं नितान्तम् असमर्थोऽस्मि इति भावः। अपि च। सोऽयं पुरूरवाः अवीरे क्रतौ न विद्योतते— अधुना लेशमात्रमपि शोभां न दधाति। अस्माकं धुनयः उरसि स्वहृदयेषु मम मायुं यथापूर्वं न अनुभवन्ति, अथवा उरसि मम सिंहनादं यथापूर्व न शृण्वन्ति।। ३।।

पद-व्याख्या—अनया पुरूरवाः स्वस्य विरहजनितं वैक्लव्यं तां प्रति ब्रूते। vइषुधेः। इषवो धीयन्तेऽत्रेतीषुधिर्निषङ्गः। ततः सकाशात् vइषुः vअसना असनायै प्रक्षेप्तुं vन भवति vश्रिये विजयार्थम्। त्वद्विरहाद्युद्धस्य बुद्धाघष्यनिधानात्। तथा vरंहिः वेगवानहं शत्रुसकाशात् vगोषाः तेषां शत्रूणां गवां संभक्ता vन अभवम्। तथा vशतसाः शतानामपरिमितानां शत्रुधनानां संभक्ता नाभवम्। किंच vअवीरे वीरवर्जिते vक्रतौ राजकर्मणि सति vन vवि vदविद्युतत् न विद्योतते मत्सामर्थ्यम्। किंच vधुनयः कम्पयितारोऽस्मदीया भटाः vउरा उरौ। 'सुपां सुलुक्°' इति सप्तम्था डादेशः। विस्तीर्णे संग्रामे vमायुम्। मीयते प्रक्षिप्यत इति मायुः शब्दः। 'कृवापाजि°' इत्यादिनोण्। सिंहनादं vन vचितयन्त न बुध्यन्ते। 'चिती संज्ञाने'। अस्माण्णिचि संज्ञापूर्वकस्य विधेरनित्यत्वाल्ल- घूपधगुणाभावः। छान्दसो लङ्।।

हि० अ०— विरह-व्याकुल पुरूरवा उर्वशी से कहता है— अब मैं शत्रुओं पर विजय प्राप्त करने के लिए तरकस से तीर निकालने में असमर्थ हो गया हूँ। मैं शत्रुओं की गौओं और उनके प्रभूत धन को बलपूर्वक हर लाने में सक्षम नहीं रहा। अब यह पुरूरवा शौर्य-विहीन राजकर्म में पूर्ववत् शोभावान् नहीं दीखता, और न ही शत्रुओं को कम्पा देने वाले उसके योद्धा अपने हृदय में उसके सिंह-गर्जन को पूर्ववत् सुन पाते हैं।। ३।।

४. सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात्।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन।। ४।।

पद-पाठः सा। वसु। दधती। श्वशुराय। वयः। उषः। यदि। वष्टि। अन्तिऽगृहात्।
अस्तं। ननक्षे। यस्मिन्। चाकन्। दिवा। नक्तम्। श्नथिता। वैतसेन।।

अन्वयः— उषः! सा श्वशुराय वसु वयः दधती यदि वष्टि, अन्तिगृहात् अस्तं ननक्षे, यस्मिन् चाकन् दिवा नक्तं वैतसेन श्नथिता।

भा०— अस्याम् ऋचि उर्वशी स्वाशयं उशसम्-न तु पुरूरवसम्-अभिलक्ष्य स्व-रति-क्रीडानन्दं निर्दिशति। एतद्विधिना सा परोक्ष-रूपेण उत्तरति न तु साक्षाद्रूपेण— उषः! सा श्वशुराय वासकं अन्नं च प्रयच्छन्ती— तस्य सेवां शुश्रूषां कुर्वती इत्यभिप्रायः यदा कामयते पतिगृह-निकटवर्ति-श्वशुरगृहात् आत्मीयं गृहम्, व्याप्नोति, यस्मिन् गृहे तां कामयमानः पतिः आस्ते। तत्र च सा अहनि रात्रौ च पत्युः वैतसेन दण्डेन श्नथिता भवति।।४।।

पद-व्याख्या—इदमुत्तरं चोर्वशीवाक्यम्। आद्येन पुरात्मना कृतमुषसे निवेदयति। हे vउषः vसा इयमुर्वशी vवसु वासकं vवयः अन्नं vश्वशुराय भर्तुः पुरूरवसः पित्रे vदधती प्रयच्छन्ती तत्र गृहे स्थिता vयदि पतिं vवष्टि कामयते तदा vअन्तिगृहात्। स्वभर्तृभोगगृहान्तिके यत् श्वशुरस्य भोजनगृहं तदन्तिगृहम्। तस्माद्गृहात्सोर्वशी vअस्तं पतिगृहं vननक्षे व्याप्नोति। vयस्मिन् गृहे vचाकन् कामयत उर्वशी। सा चोर्वशी vदिवा vनक्तम् अहनि रात्रौ च vवैतसेन। 'शेपो वैतस इति पुंस्प्रजननस्य' (निरु० ३.२१) इति निरुक्तम्। पुंस्प्रजननेन vश्नथिता ताडिता च भवति। एवमुर्वश्यात्मानं परोक्षेण निर्दिदेश।।

हि० अ०— इस ऋचा में उर्वशी अपने और पुरूरवा के बीच यौन सम्बन्ध के विषय में पुरूरवा से साक्षात् न कहकर अन्य पुरुष का प्रयोग करते हुए उषा के माध्यम से उसे कहती है, मानो वह उर्वशी की अन्तरंग सखी हो— "हे उषः! यह उर्वशी श्वशुर-गृह में ठहरी हुई श्वशुर की वस्त्र, अन्न आदि द्वारा सेवा करती रहती है, और जब-जब उसने पति को चाहा तो वह श्वशुर-गृह से निकटवर्ती पति-गृह में आ जाती, जहां उसकी कामना करता उसका पति होता। वहां दिन-रात वह उसके दण्ड से ताडित होती रहती।।४।।

५. **त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि।**
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१स्तदासीः।।५।।

पद-पाठः त्रिः। स्म। मा। अह्नः। श्नथयः। वैतसेन। उत। स्म। मे। अव्यत्यै। पृणासि।
पुरूरवः। अनु। ते। केतम्। आयं। राजा। मे। वीर। तन्वः। तत्। आसीः।।

अन्वयः— पुरूरवा! मा अह्नः त्रिः वैतसेन श्नथयः स्म। उत अव्यत्यै मे पृणासि। ते केतम् अन्वायम्। वीर! तत् तन्वः राजा आसीः।

भा०— अस्मिन् मन्त्रे उर्वशी पुरूरवसं सम्बोध्य कथयति— हे पुरूरवः! त्वं माम् एकस्मिन्नेव दिवसे दण्डेन त्रिवारम् अताडयः, मैथुन-कार्यरतोऽभव इत्याशयः। अपि च सपत्नी-रहितायै मह्यं कामं पूरयसि स्म। एतत्सन्तुष्टि-प्राप्त्यर्थमेव अहं तव गृहं त्वदनु आगच्छम। हे वीर! तदा त्वं मम शरीरस्य स्वामी आसीः।।५।।

पद-व्याख्या—अनेन पुरूरवसमेव संबोध्योक्तवती। हे पुरूरवः तवं vमा माम् vअह्नः अहनि vवैतसेन दण्डेन पुंव्यञ्जनेन vत्रिः त्रिवारम्। 'द्वित्रिचतुर्भ्यः सुच्' (पा०सू०

५.४.१८)। vश्नथयः vस्म। अश्नथयः अताडयः। 'कृत्वोऽर्थप्रयोगे°' (पा°सू° २.३. ६४) इति कालवाचिनोऽहःशब्दादधिकरणे षष्ठी। vउत अपि च। vस्म इति पूरणः। vअव्यत्यै। सपत्नीभिः सह पर्यायेण पतिमागच्छति सा व्यती। न तादृश्यव्यती। तस्यै vमे मह्यं vपृणासि पूरथसि। एवं बुद्धया हे vपुरूरवः vते तव vकेतं गृहम् vअनु vआयम् अन्वगमं पूर्वम्। हे vवीर vराजा त्वं च vमे मम vतन्वः शरीरस्य vतत् तदा vआसीः अभवः। सुखयितेति शेषः परमप्येवं मन्तव्यं किमिति कातरो भवसीत्युवाच।।५।।

हि° अ°— इस मन्त्र में उर्वशी पुरूरवा को सम्बोधित करते हुए रतिकर्म-विषयक चर्चा करती है— हे पुरूरवा! तुम एक दिन में वैतस से तीन बार मुझे ताड़ित करते थे— मेरे साथ मैथुन-कर्म में रत रहते थे। मेरी कोई सपत्नी भी नहीं होती थी सन्तुष्टि को प्राप्त करने के लिए ही तो मैं तुम्हारे घर चली आयी थी। हे वीर राजा! तुम तो मेरे स्वामी हो तुमने मुझे शारीरिक सुख दिया, अथवा मेरे शरीर से शारीरिक सुख प्राप्त किया।।५।।

६. या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रन्थिनी चरण्युः।
ता अञ्जयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त।।६।।

पद-पाठः या। सुऽजूर्णिः। श्रेणिः। सुम्नेऽआपिः। ह्रदेऽचक्षुः। न। ग्रंथिनी। चरण्युः।
ताः। अंजयः। अरुणयः। न सस्रुः। श्रिये। गावः। न। धेनवः। अनवंत।।

अन्वयः— या सुजूर्णिः श्रेणिः सुम्नआपिः ह्रदेचक्षुः ग्रन्थिनी चरण्युः। ताः अञ्जयः अरुणयः न सस्रुः। धेनवः गावः स्व-वत्सस्य श्रिये न अनवन्त।

भा°— पुरूरवा वदति — या सुजूर्णि-श्रेणि-सुम्नआपि-ह्रदेचक्षु इति नामधेयाभिः सह ग्रथिता सती आजगन्थ, यद्वा त्वं सुजूर्णिः श्रेणि-सुम्नआपि- ह्रदेचक्षुर्-ग्रन्थिनी इति नामधेयामिः चतसृभिः अप्सरोभिः सह— आजगन्थ, ता आभरणोपेताः अरुणवर्णाः न गच्छन्ति, नवप्रसूताः गावः आश्रयार्थं न किञ्चिदपि शब्दं कुर्वन्ति।।६।।

पद-व्याख्या—पुरूरवसो वाक्यम्। vvया vसुजूर्णिः सुजवा एतन्नामिकास्ति तथा या vश्रेणिः या vसुम्नआपिः या vह्रदेचक्षुः। नकारः समुच्चये। ताभिश्चतसृभिरालि-भूताभिर्मानिनीभिः सहिता vग्रन्थिनी ग्रन्थनवती संदर्भवती vचरण्युः चरणशीलोर्वश्याजगाम। यद्वा। ग्रन्थिनीत्येतत्सखिभूताप्सरोनामधेयम्। या सुजूर्णिः सुजवोर्वशी सा ताभिः सह जगाम। vताः अप्सरसः vअञ्जयः आभरणोपेताः vअरुणयः अरुणवर्णाः vन vसस्रुः पूर्ववन्न गच्छन्ति। vश्रिये श्रयणाय vधेनवः नवप्रसूताः vगावो vन गाव इव। आश्रयार्थं यथा गावः vअनवन्त शब्दायन्ते तथा न शब्दयन्तीति व्यतिरेके दृष्टान्तः।।

हि° अ°— पुरूरवा कहता है— तू सुजूर्णि, श्रेणि, सुम्नआपि और ह्रदेचक्षु नामक अप्सराओं के साथ संलग्न अथवा संयुक्त होकर आयी थी, अथवा तू सुजूर्णि अर्थात्

वेगवती— श्रेणि, सुम्नआपि, ह्रदेचक्षु और ग्रन्थिनी नामक चार अप्सराओं के साथ— इस भूलोक में आयी थी। आभरणों से सज्जित एवं अरुण वर्ण वाली वे तेरी चारों सखियां तो द्युलोक को नहीं जातीं, पर तू जाने को आतुर है। यह तो ऐसे है जैसे अन्य गाएं तो अपने-अपने बछड़ों को आश्रय देने के लिए दूर से रंभाती आती हैं, पर] नवप्रसूता गाएं अपने-अपने बछड़ों को आश्रय देने के लिए कुछ भी शब्द नहीं करतीं।।६।।

७. **समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्य१ः स्वगूर्ताः।**

महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः।।७।।

पद-पाठः सम्।अस्मिन्।जायमाने।आसत।ग्नाः। उत।ईम्।अवर्धन्।नद्यः।स्वऽगूर्ताः।

महे। यत् त्वा। पुरूरवः। रणाय। अवर्धयन्। दस्युऽहत्याय। देवाः।।

अन्वयः— अस्मिन् जायमाने ग्नाः समासत। उत ईम् स्वगूर्ताः नद्यः अवर्धन्। हे पुरूरवः! यत् महे रणाय दस्यु-हत्याय देवाः त्वा अवर्धयन्।

भा०— उर्वशी कथयति— अस्मिन् जायमाने, भूतले ख्यातिं प्राप्ते सति इत्यभिप्रायः, अप्सरसो देववेश्याश्च आकृष्टाः अभवन्। अथवा अस्मिन् जायमाने, यज्ञार्थं प्रवर्धमाने प्रवृत्ते वा सति, राजपत्न्यः संगता अभवन्। अपि च एनं पुरूरवसं स्वयं-गामिन्यो नद्यः अवर्धयन्। हे पुरुरवः! यदा त्वं महते संग्रामाय दस्यु-हननाय वा देवाः त्वाम् अवर्धयन्।।७।।

पद-व्याख्या—अनयैताभिः सह संसर्गस्त्वयानुभूत इत्युर्वशी वदति। vअस्मिन् पुरूरवसि vजायमाने सति vग्नाः अप्सरसो देववेश्या अपि vसम् vआसत सगता अभवन्। अथवा जायमाने यज्ञार्थं प्रवर्धमाने सति ग्ना देवपत्न्योऽपि समासत समभवन्। vउत अपि च vईम् एनं पुरूरवसं vस्वगूर्ताः स्वयंगामिन्यः vनद्यः तासामाश्रयभूता अवर्धयन्। किंच हे vपुरूरवः vयत् यस्मात् vत्वा त्वां vमहे महते vरणाय रमणीयाय संग्रामाथ vदस्युहत्याय दस्युहननाय vदेवाः vत्वाम् vअवर्धयन्।।

हि० अ०— पुरूरवा ने उपर्युक्त चारों अप्सराओं के साथ संसर्ग किया था— इस आशय को उर्वशी इस मन्त्र में कहती है— इस के उत्पन्न होने अर्थात् भूलोक में ख्याति प्राप्त कर लेने पर, अप्सराएं और देववेश्याएं इसके प्रति आकृष्ट हुईं, अथवा इस के यज्ञादि में प्रवृत्त हो जाने पर राजपत्नियां इसके संग आ बैठीं। इसके अतिरिक्त, स्वयंगामिनी नदियों ने इसे प्रवृद्ध किया। हे पुरूरवा! जब-जब तुमने बड़े भारी संग्राम के लिए अथवा राक्षसों के विनाश के लिए, देवताओं ने तुम्हारी रक्षा की।।७।।

८. **सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे।**

अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः।।८।।

पद-पाठः सचा। यत्। आसु। जहतीषु। अत्कं। अमानुषीषु। मानुषः। निऽसेवे।
अप स्म। मत् तरसंती। न। भुज्युः। ताः। अत्रसन्। रथऽस्पृशः। न। अश्वाः।।

अन्वयः— यत् सचा मानुषः अत्कं जहतीषु आसु। अमानुषीषु निषेवे स्म, ता मत् अप अत्रसन्, न भुज्युः तरसन्ती, न रथस्पृशः अश्वाः।

भा०— पुरूरवाः उर्वश्यादिभिः सह रतिकर्मविषयक-सम्बन्धं स्मरन् अन्यपुरुष-माध्यमेन कथयति— यदा यदा सहायभूतः मानुषः पुरूरवाः रूपम् परित्यजन्तीषु आसु देवताभूतासु अभिमुखं गच्छति स्म, तदा तदा ताः मत्तः अपसृत्य गच्छन्ति स्म। यथा भोज्यसाधनभूता मृगी व्याघ्राद् भीता पलायते, अथवा यथा रथे नियुक्ताः अश्वा धावन्ति।।८।।

पद-व्याख्या—इदमादित्रीण्यैळवाक्यानि। तत्रादितो द्वाभ्यामुर्वशीमन्याश्च सह स्तौति। √यत् यदा √सचा सहायभूतः पुरूरवाः √अत्कं स्वकीयं रूपम्। अत्क इति रूपनाम। √जहतीषु परित्यजन्तीषु √अमानुषीषु देवताभूतास्वप्सरःसु √मानुषः सन् √निषेवे अभिमुखं गच्छति तदानीं √ताः अप्सरसः √मत् मत्तः √अप अपसृत्य √अत्रसन्। त्रसतिर्गतिकर्मा। गच्छन्ति। पलायने दृष्टान्तः। √तरसन्ती √भुज्युः √न। तरसननाम मृगः। तस्य स्त्री भुज्युर्भोगसाधनभूता स्त्री मृगी। सा यथा व्याधाद्भीता पलायते। किंच √रथस्पृशो √नाश्वाः रथे नियुक्ता अश्वा इव। यथा ते पलायन्ते तद्वत्पलायन्त इति। उर्वश्यानेकाभिरस्माभिः सह भोगमनुभुक्तवानसीत्युक्तः प्रत्याचष्टे।।

हि० अ०— इस मन्त्र में पुरूरवा— उर्वशी आदि अप्सराओं के साथ रति-कर्म- विषयक सम्बन्ध को स्मरण करता हुआ— 'अन्य पुरुष' के माध्यम से कहता है— जब जब यह पुरूरवा नामक मनुष्य उर्वशी आदि अप्सराओं की ओर, जो कि अपने वास्तविक रूप को छोड़कर मानवी रूप में थीं, रतिकर्म के लिए आगे बढ़ता तो वे सभी मुझ से छिटक कर दूर भाग जातीं— ऐसे, जैसे भोज्य-रूप मृगी डरी हुई भाग जाती है, अथवा जैसे रथ में जुड़े हुए अश्व भाग रहे होते हैं।।८।।

९. यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते।
ता आतयो न तन्वः शुंभत स्वा अश्वासो न क्रीळयो दंदशानाः।। ९।।

पद-पाठः यत्। आसु। मर्तः। अमृतासु। निऽस्पृक्। सम्। क्षोणीभिः। क्रतुऽभिः। न। पृंक्ते।
ताः। आतयः। न। तन्वः। शुंभत। स्वाः। अश्वासः। न। क्रीळयः। दंदशानाः।।

अन्वयः— यत् मर्तः आसु अमृतासु निस्पृक् क्षोणीभिः क्रतुभिः न संपृंक्ते, ताः आतयः स्वाः तन्वः न शुंभत। न क्रीळयः दंदशानाः अश्वासः।

भा०— पूर्वमन्त्रवत् अस्मिन् मन्त्रेऽपि पुरूरवा अप्सरोभिः सह रति-सम्बन्धं स्मरन् अन्यपुरुषमाध्यमेन कथयति— यदा यदा मानुषः पुरूरवा आसु अपसरःसु निःशेषेण स्पृशन्

आलापै: कर्मभिश्च सम्पर्क करोति, ता: कारण्डवा: गृहपत्न्य: वा इव स्वकीयानि शरीराणि न प्रकाशयन्ति स्म यथा चापल्येन धावन्त: अश्वा: चर्वन्ति: भक्षयन्त रथिकाय स्वरूपं न दर्शयन्ति।।९।।

पद-व्याख्या—vयत् यदा vआसु vअमृतासु अप्सर:सु vमर्त: मनुष्य: पुरूरवा: vनिस्पृक् नि:शेषेण स्पृशन् vक्षोणीभि: वाग्भि: vऋतुभिर्न कर्मभिश्च vसं vपृङ्क्ते संपर्कं करोति। नकार: समुच्चयार्थ:। vता: अप्सरस: vआतय: आतिभूतास्तदानीं vस्वा: vतन्त्र: आत्मीयानि रूपाणि vन vशुम्भत न प्रकाशयन्ति। vअश्वासो vन अश्वा इव vक्रीळय: संक्रीडमाना: vदन्दशाना: दन्दशूका जिह्वाभिरात्मीया: सृक्का भक्षयन्त:। ते यथा चापल्येन धावन्त: स्वरूपं न प्रयच्छन्ति रथिकाय तद्वदिति दु:खाद्ब्रूते।।

हि० अ०— पिछले मन्त्र के समान इस मन्त्र में भी पुरूरवा अप्सराओं के साथ अपने रति-सम्बन्ध का वर्णन अन्य पुरुष के माध्यम से करता है— जब भी कभी इस मानुष ने इन अप्सराओं को नि:शेषभाव से स्पर्श करते हुए आलापों और [रति-प्रेरक] कृत्यों से सम्पर्क किया, उन सभी अप्सराओं ने बतख़ों अथवा गृहपत्नियों के समान अपने-अपने शरीर को उसके सामने इस प्रकार प्रकट नहीं किया, अथवा उसे उनका शरीर इस प्रकार दिखायी न दिया, जिस प्रकार तेज़ी से भागते हुए तथा दाँतों से चबाते हुए से घोड़ों का मुख रथिक को दिखायी नहीं देता।।९।।

१०. विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि।
जनिष्टो अपो नर्य: सुजात: प्रोर्वशी तिरत दीर्घमायु:।।१०।।

पद-पाठ: विऽद्युत्। न। या। पतन्ती। दविद्योत्। भरन्ती। मे। अप्या। काम्यानि।
जनिष्टो इति। अप:। नर्य:। सुऽजात:। प्र। उर्वशी। तिरत। दीर्घं। आयु:।। १०।।

अन्वय:— या उर्वशी विद्युत् न पतन्ती दविद्योत्, मे अप्या काम्यानि भरन्ती। अप: नर्य: सुजात: जनिष्ठ: सा मम आयु: दीर्घं प्रतिरत।

भा०— पुरूरवा उर्वशी-विषये कथयति— या उर्वशी विद्युद् इव गच्छन्ती दीव्यन्ती इत्याशय: द्योतते स्म, सा मे व्याप्तानि अभिमतानि सम्पादयन्ती अवर्तत। व्याप्त: सक्षम इत्यभिप्राय: नरेभ्यश्च हितकारी सुपुत्र उत्पद्यते सा मम आयु: दीर्घं प्रवर्धयति।।१०।।

पद-व्याख्या—अनयोर्वशीं स्तौति। vया उर्वशी vविद्युन्न विद्युदिव vपतन्ती गच्छन्ती vदविद्योत् द्योतते। किं कुर्वती। vअव्या। अप इत्यन्तरिक्षनाम। तत्संबन्धीनि व्याप्तानि वा काम्यानि अस्मदभिमतान्युदकानि वा vमे मह्यं vभरन्ती संपादयन्ती। यदा आगतायास्तस्या: सकाशात् vअप: व्याप्त: कर्मसु कर्मवान् वा vनर्थ: नरेभ्यो हित:

vसुजातः सुजननः पुत्रः vजनिष्टो अजनिष्ट उत्पद्यते तदानीं मम vउर्वशी vदीर्घमायुः vप्र vतिरत प्रवर्धयति। 'प्रजामनु प्र जायसे तदु ते मर्त्यामृतम्' (तै०ब्रा० १.५.५.६) इति हि मन्त्रः।।२।।

हि० अ०— पुरूरवा उर्वशी के सम्बन्ध में कहता है— जो उर्वशी बिजली के समान चमकती-दमकती डोलती फिरती थी, वह मेरे लिए अनेक अभीष्ट को सम्पादित करती रहती थी। जब उससे व्याप्त तथा मानवों के लिए हितकारी पुत्र का जन्म हुआ तो मेरी आयु बढ़ गयी।।१०।।

११. **जज्ञिष इत्था गोपीथ्याय हि दुधाथ तत्पुरूरवो म ओजः।**
अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि।।११।।

पद-पाठः जज्ञिषे। इत्था। गोऽपीथ्याय। हि। दधाथ। तत्। पुरूरवः। मे। ओजः।
अशासं। त्वा। विदुषी। सस्मिन्। अहन्। न। मे। आ। अशृणोः। किम्। अभुक्। वदासि।।

अन्वयः— पुरूरवः! इत्था गो-पीथ्याय जज्ञिषे। मे ओजः दधाथ। त्वा विदुषी अशासम् सस्मिन्नहन्। मे आशृणोः। अभुक्। किम् वदासि।

भा०— उर्वशी पुरूरवसं प्रति कथयति— हे पुरूरवः! इत्थं त्वं भू-रक्षणाय, जातोऽसि। त्वं मे ओजः दधाथ— त्वं ममोदरे स्वापत्यं धारितवान् इत्यभिप्रायः। त्वाम् अहं विदुषी शिक्षितवत्यस्मि सर्वेषु भावि-दिवसेषु [किं कर्तव्यम्। किन्तु] त्वं मां न श्रृणोषि। अभोक्ता जातः— प्रजानां पालन-धर्मे विरतोऽभव इत्यभिप्रायः व्यर्थप्रलापं किमर्थं करोषि।।११।।

पद-व्याख्या—vइत्था इत्थं vगोपीध्याय। गौः पृथिवी। पीथं पालनम्। स्वार्थिकस्तद्धितः। भूमे रक्षणाय vजज्ञिषे vहि जातोऽसि खलु पुत्ररूपेण। 'आत्मा वै पुत्रनामा' इति श्रुतेः। पुनस्तदेवाह। हे vपुरूरवः vमे ममोदरे मथि vओजः अपत्योत्पादनसामर्थ्यं vदधाथ मथि निहितवानसि। vतत् तथास्तु। अथापि स्थातव्यमिति चेत् तत्राह। अहं vविदुषी भावि कार्यं जानती vसस्मिन्नहन् सर्वस्मिन्नहनि त्वया कर्त्तव्यं vत्वा त्वाम् vअशासं शिक्षितवत्यस्मि। त्वं vमे मम वचनं vन vअशृणोः न श्रृणोषि। vकिं त्वम् vअभुक् अभोक्तापालयिता प्रतिज्ञातार्थमपालयन् vवदासि हये जाय इत्यादिकरूपं प्रलापम्। वदेर्लेट्याडागमः। दिवसे त्रिवारं यभस्व एडकद्वयमस्काकं पुत्रत्वेन परिकल्पय अपत्योत्पादनपर्यन्तं वसामि नग्नं त्वां यदाद्राक्षं तदा गच्छामीत्येवंरूपो मिथःसमयः 'उर्वशी हाप्सराः पुरूरवसमैळं चकमे त ह विन्दमानोवाच त्रिः स्म माह्नो वैतसेन दण्डेन' (श०ब्रा० ११.५.१) इत्यादि वाजसनेय- कमुदाहृतम्।।

हि० अ०— उर्वशी पुरूरवा के प्रति कहती है— हे पुरूरवा! इस प्रकार तुम मेरे द्वारा

पुत्र-प्राप्ति से भू-रक्षण के लिए समर्थ हो गए हो। तू ने मुझे ओज दिया। इन दिनों में जानती हूँ और तुम्हें परामर्श देती हूँ, पर तुम मेरी एक नहीं सुनते। तुम व्यर्थ प्रलाप करते हो।। ११।।

१२. कुदा सूनुः पितरं जात ईच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्।

को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत्।। १२।।

पद-पाठः कुदा। सूनुः। पितरं। जातः। इच्छात्। चक्रन्। न। अश्रु। वर्तयत्। विऽजानन्।

कः। दंपती इति दंऽपती। सऽमनसा। वि। यूयोत्। अधं। यत्। अग्निः। श्वशुरेषु। दीदयत्।।

अन्वय— कदा जातः पितरम् इच्छात्। कदा विजानन् चक्रन् अश्रु वर्तयत्। कः समनसा दम्पती वियूयोत्। अध यद् अग्निः श्वशुरेषु दीदयत्।।१२।।

भा०— पुरूरवा वदति— पुत्रः कदा उत्पन्नः सन् पितरम् अभिलषति? विजानन् क्रन्दमानः अश्रु कः समनस्कौ दम्पती विश्लेषयेत्— आवयोः विश्लेष-कारणं भवेत् इत्यभिप्रायः। सम्प्रति अग्निः वर्तते श्वशुर-गृहे — मम मातृ-पितृगृहे, यद्वा तव गर्भे इत्यपि अभिप्रेतः — देदीप्यते।। १२।।

पद-व्याख्या— इदं पुरूरवसो वाक्यम्। √कदा कस्मिन् काले √सूनुः तवोदरजातः सन् √पितरं माम् √इच्छात् इच्छेत्। 'इषु इच्छायाम्'। लेटि शपि 'इषुगमियमां छः' इति छादेशः। 'लेटोऽडाटौ' इत्यडागमः। कदा वा √विजानन् पितरं मामधिगच्छन् √चक्रन् क्रन्दमानः √नाश्रु √वर्तयत्। नेति चार्थे। किंच √कः किंविधः सन् सूनुः √समनसा समनसौ समनस्कौ √दंपती जायापती त्वां मां च √वि √यूथोत् विश्लेषयेत्। 'यु मिश्रणामिश्रणयोः'। थौतेश्छान्दसः शपः श्लुः। तुजादित्वादभ्यासस्य दीर्घः। √अध अधुना √यत् यदा √अग्निः तव हृदयस्थितस्तेजोरूपो गर्भः √श्वशुरेषु √दीदयत् दीप्यते। दीदयतिर्दीप्तिकर्मेति नैरुक्तो धातुः।।

हि० अ०— पुरूरवा कहता है— पुत्र कब उत्पन्न होकर पिता की, अर्थात् पितृ-रूप में, इच्छा करेगा। कब मुझे जानता हुआ रोता हुआ, अश्रु आकर बैठेगा। कौन होगा जो हम जैसे समनस्क दम्पती को पृथक्-पृथक् कर दे। अब जो यह अग्नि है, वह तेरे श्वशुर-गृह में, अर्थात् मेरे माता-पिता के घर में, अथवा तेरे गर्भ में दीप्त हो रहा है।। १२।।

१३. प्रति ब्रवाणि वुर्तयते अश्रु चक्रन्न क्रन्ददाध्यै शिवायै।

प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः।। १३।।

पद-पाठः प्रति। ब्रवाणि। वर्तयते। अश्रु। चक्रन्। न। क्रंदत्। आऽध्यै। शिवायै।

प्र। तत्। ते। हिनव। यत्। ते। अस्मे इति। परां। इहि। अस्तं। नहि। मूर। मा। आपः।।

अन्वय— प्रति ब्रवाणि। अश्रु चक्रन्, शिवायै आध्ये न क्रन्दत्। यत् ते अस्मे तत् ते

प्रहिनव। अस्तं परेहि। मूर! न हि मा आपः।

भा०— उर्वश्या उत्तरम्— प्रति वदामि, अश्रुपूर्णनेत्रः रुदन् कल्याणे समुप- स्थिते सति नासौ क्रन्दिष्यति। यः तव मयि तं तुभ्यमेव दास्यामि। स्वगृहं गच्छ। मुग्ध न मां प्राप्तुं समर्थोऽसि।।१३।।

पद-व्याख्या—इदमुर्वशीवाक्यम्। हे पुरूरवः त्वां vप्रति vब्रवाणि प्रतिवच्मि। त्वदपत्थम् vअश्रु वाष्पं vवर्तयते वर्तयिष्यति। vआध्वे आध्याते वस्तुनि vशिवायै शिवे कल्याणे समुपस्थिते vते तुभ्यं vहिनव प्रहिणोमि vयत् अपत्यं vते तव संबन्धि vअस्मै अस्मासु निहितम्। त्वं vपरेह्यस्तम्। अस्तमिति गृहनाम। स्वगृहं प्रतिगच्छ। हे vमूर मूढ vमा मां vनहि vआपः न प्राप्नोषि। हिनवेत्यत्र हिनोतेः 'छन्दसि लुङ्लङ्लिटः' इति भविष्यदर्थे लङि मिपोऽमादेशः। गुणः। अन्त्यलोपश्छान्दसः। बहुलवचनादडभावः। आपः। 'आप्लृव्यापतौ'। लिटि 'तिङां तिङो भवन्ति' इति थलो णल्।।

हि० अ०— उर्वशी का उत्तर— मैं तुझे कहती हूं कि, अश्रुपूर्ण नेत्रों से रोता हुआ आ बैठेगा, और उसे सुख मिलेगा और वह क्रन्दन नहीं करेगा। जो मेरे में है उसे मैं तुझे दूँगी। अपने घर चले जाओ। मुग्ध मुझे पाने में समर्थ नहीं हो।।१३।।

१४. सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः।।१४।।

पद-पाठः सुऽदेवः। अद्य। प्रऽपतेत्। अनावृत्। पराऽवतं। परमां। गंतवै। ऊं इति।
अध। शयीत। निःऽऋतेः। उपऽस्थे। अध। एनम्। वृकाः। रभसासः। अद्युः।।

अन्वय— सुदेवः अद्य प्रपतेत्। उ अनावृत् परमां परावतं गन्तवा। अध निर्ऋतेः उपस्थे शयीत। अधा एनं रभसासो वृकाः अद्युः।।

भा०— अत्यन्तं परिदूनः खिन्नश्च पुरूरवा वदति— सुदेवः अद्य धावेत् यद्वा पतेत्। अथवा अनावृतः सन् काञ्चित् सुदूरं दिशं, दूरादपि दूरदेशं वा गन्तुं महाप्रस्थानं कुर्यात्। अथवा पृथिव्याः तले शयनं कुर्यात्, वेगवन्तः वृकाः भक्षयन्तु।।१४।।

पद-व्याख्या—अथ परिदूनः पुरूरवा उवाच। vसुदेवः त्वया सह सुक्रीडः पतिः vअद्य vप्रपतेत्। अत्रैव प्रपततु। अथवा vअनावृत् अनावृत्तः सन् vपरमां vपरावतं दूरादपि दूरदेशं vगन्तवै गन्तुं महाप्रस्थानगमनं कुर्यात्। vअध अथवा यत्रकुत्रापि गन्तुमसमर्थः vनिर्ऋतेः पृथिव्याः vउपस्थे vशयीत शयनं कुर्यात्। यद्वा। निर्ऋतिः पापदेवता। तस्या उपस्थे उत्संगे संनिधौ म्रियतामित्यर्थः। vअध अथवा vएनं vवृकाः आरण्याः श्वानः vरभसासः व्रकवन्तः vअद्युः भक्षयन्तु। अत्र वाजसनेयकं— 'सुदेवोऽद्योद्वा बध्नीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैव तदुवाच' (श०ब्रा० ११.५.१.८) इति।।

हि० अ०— अत्यन्त दुःखी और खिन्नचित्त पुरूरवा कहता है— तुम्हारा पति, जिसने आमोद प्राप्त किया है तथा जो हर रूप में दीप्यमान है, आज गिर जाए, अथवा अनावृत्त नग्न अर्थात् बहुविध-वैभव-जन्य-शोभा से रहित होकर किसी सुदूर दिशा की ओर प्रस्थान कर जाए। अथवा पृथ्वी-तल पर सो जाए और वेगवान् भेड़िये आकर खा जाएं।। १४।।

१५. पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन्।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता।।१५।।

पद-पाठः पुरूरवः। मा। मृथाः। मा। प्रं। पप्तः। मा। त्वा। वृकासः। अशिवासः। ऊं इति। क्षन्। न। वै। स्त्रैणानि। सख्यानि। संति। सालावृकाणां। हृदयानि। एता।।

अन्वयः— पुरूरवः। मा मृथाः। मा प्रपप्तः। मा त्वा अशिवासः वृकासः उ क्षन्। वै स्त्रैणानि सख्यानि न सन्ति। एता सालावृकाणाम् हृदयानि।

भा०— क्षुब्ध-पुरूरवसः उपर्युक्त-खिन्न-वचनात् नितराम् अप्रभाविता उर्वशी तं कथयति— हे पुरूरवः! मा मृत्युं प्राप्नुहि। मा च धाव, यद्वा मा प्रविश। मा च त्वाम् अशुभाः वृका एव भक्षयन्तु। नारी-विषयक-मैत्र्यः न भवन्ति — नार्यो न मित्राणि भवितुम् अर्हन्ति इत्यभिप्रायः, एतासां हृदयानि तु 'शाला-वृक' इत्याख्य-भयंकर-जन्तूनां हृदयानि इव क्रूराणि कठोराणि च सन्ति।। १५।।

पद-व्याख्या—तमितरा प्रत्युवाच। हे vपुरूरवः त्वं vमा vमृथाः मृतिं मा प्राप्नुहि। म्रियतेर्लुङि थासि 'ह्रस्वादङ्गात्' इति सिचो लोपः। तथा vमा vप्र vपप्तः अत्रैव पतनं मा कार्षीः। पतेर्लुङि लृदिश्वात् 'पुषादि॰' इत्यादिना च्लेरङ्। 'पतः पुम्' इति पुम्। तथा vत्वा त्वाम् vअशिवासः अशुभाः vवृकासः वृकाः vमा vउ vक्षन्। उ इत्येवकारार्थे। अक्षन्। माभ्यवहारयन्तु। किमित्येवमस्मदुपर्याग्रहं करोषि। मा कार्षीरित्यर्थः। अदेर्लुङि 'लुङ्सनोर्घस्लृ' (पा०सू० २.४.३७) इति घस्लादेशः। 'मन्त्रे घस॰' इति च्लेर्लुक्। 'गमहन॰' इत्यादिनोपधालोपः। 'शासिवसि॰' इत्यादिना पत्वम्। 'खरि च' इति चर्त्वम्। बाहुलकादडभावः। अथ स्वरनेहस्यासारतामाह। vस्त्रैणानि स्त्रीणां कृतानि vसंख्यानि vन vवै vसन्ति। न सन्ति खलु। अभावे कारणमाह। vएता एतानि सख्यानि vसालावृकाणां vहृदयानि तेषां हृदयानि यथा वत्सादीनां विश्वासापन्नानां घातुकानि तद्वत्। अत्र वाजसनेयकं-'मैतदादृथा न वै स्त्रैणँ सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच' (श०ब्रा० ११.५.१.९) इति।।३।।

हि० अ०— क्षुब्ध पुरूरवा के उपर्युक्त खिन्न वचन से नितान्त अप्रभावित उर्वशी उसे कहती है— हे पुरूरवा! मृत्यु को मत प्राप्त करो, न भागो अथवा न गिरो और न ही तुझे भयंकर भेड़िये ही खाएं। नारियां कभी किसी की मित्र नहीं होतीं, इनके हृदय तो भेड़िये के हृदय के समान होते हैं।।१५।।

१६. यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्त्रः।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि।।१६।।

पद-पाठः यत्। विऽरूपा। अचरं। मर्त्येषु। अवसं। रात्रीः। शरदः। चतस्त्रः।
घृतस्य।स्तोकं।सकृत्।अह्नः।आश्नां। तात्।एव।इदम्।ततृपाणा।चरामि।।

अन्वय— विरूपा मर्त्येषु अचरम्। चतस्त्रः शरदः रात्रीः अवसम्। अह्नः सकृद् घृतस्य स्तोकम् आश्नाम् ताद् एव इदं तातृपाणा चरामि।

भा०— उर्वशी कथयति— विरूपा अहं मनुष्येषु अचरम्। चतुर्वर्ष-पर्यन्तम् अवसम्। प्रतिदिनं च एकवारम् एव स्तोकमात्रं घृतम् अभक्षयम् तेनैव सन्तुष्टा सती सम्प्रति अहं गच्छामि।।१६।।

पद-व्याख्या—√यत् यदा √विरूपा मनुष्यसंपर्काद्विगतसहजभूत देवरूपा पत्यानुकूल्येन नानारूपा वा √मर्त्येषु मनुष्येषु √अचरं तदानीं √रात्रीः प्ररमयित्रीः √चतस्त्रः √शरदः √अवसं न्यवसम्। अत्यन्तसंयोगे द्वितीया। तदानीं √घृतस्य √स्तोकं √सकृदह्न √आश्नाम्। √तादेव तेनैव स्तोकेनाहम् √इदं संप्रति √तातृपाणा तृप्ता सती √चरामि।।

हि० अ०— मैं विरूप होकर मनुष्यों में विचरण करती रही। चार बरस तक रही। प्रतिदिन केवल एक बार थोड़ा-सा घी खाती रही, अर्थात् मुझे स्वर्ग-तुल्य ऐश्वर्य की साधन-सामग्री यहां उपलब्ध न हो सकी, फिर भी उसी से सन्तुष्ट होती रही, किन्तु अब मैं जाती हूँ।।१६।।

१७. अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे।।१७।।

पद-पाठः अंतरिक्षऽप्रां। रजसः। विऽमानीं। उप। शिक्षामि। उर्वशीं। वसिष्ठः।
उप।त्वा।रातिः।सुऽकृतस्य।तिष्ठात्। नि। वर्तस्व। हृदयं। तप्यते। मे।।

अन्वय— वसिष्ठः सुकृतस्य रातिः अन्तरिक्ष-प्रां, रजसो विमानीम् उर्वशीम् उपशिक्षामि, उप त्वा तिष्ठात, मे हृदयं तप्यते, निवर्तस्व।

भा०— पुरूरवा वदति— वसिष्ठः शोभनकर्मणश्च दाता, यद्वा शोभन-कर्म-रूप-प्रणयातिरेकस्य प्रदाता तां अन्तरिक्षं पूरयन्तीम्, उदकस्य च निर्मात्रीम् उपशिक्षामि परामर्शं ददामि इति यावत्, यत् त्वम् मम पार्श्वे तिष्ठ, मे हृदयं तप्यते — दग्धम् अस्ति।प्रत्यागच्छ।।१७।।

पद-व्याख्या—√अन्तरिक्षप्रां स्वतेजसान्तरिक्षस्य पूरयित्रीं तथा √रजसः रञ्जकस्योदकस्य √विमानीं निर्मात्रीम् √उर्वशीं √वसिष्ठः समानानां मध्येऽतिशयेन वासयिताहम् √उप √शिक्षामि वशं नयामि। √सुकृतस्य शोभनकर्मणः √रातिः दाता पुरूरवाः √त्वा त्वाम् √उप √तिष्ठात् उपतिष्ठतु। √मे √हृदयं √तप्यते। अतो √नि √वर्तस्व। एवं राजोवाच।।

हि० अ०— पुरूरवा कहता है— मैं वसिष्ठ तथा शोभन कर्मों को देने वाला, अथवा शोभन-कर्म-रूप प्रणयातिरेक का प्रदाता तुझ उर्वशी को— जिसने अन्तरिक्ष को भर रखा है, अर्थात् जो गर्भवती है, तथा जो उदक की निर्मात्री है — यह परामर्श देता हूँ, कि तुम मेरे पास रहो, मेरा हृदय दग्ध हो रहा है।घर लौट चलो।।१७।।

१८. इति॑ त्वा दे॒वा इ॒म आ॑हुरैळ॒ यथे॑मे॒तद्भव॑सि मृ॒त्युब॑न्धुः।
प्र॒जा ते॑ दे॒वान्ह॒विषा॑ यजाति स्व॒र्ग उ॒ त्वमपि॑ मादयासे।।१८।।

पद-पाठः इति॑।त्वा॒।दे॒वाः इ॒मे।आ॒हु॒ः।ऐ॒ळ॒। यथा॑।ई॒म्।ए॒तत्।भव॑सि।मृ॒त्युऽब॑न्धुः।
प्र॒ऽजा।ते॒।दे॒वान्।ह॒विषा॑।य॒जा॒ति॒।स्व॒ःऽर्गे।ऊ॒ं इति॑।त्वं।अपि॑।मा॒द॒या॒से॒।।

अन्वय— इमे देवाः त्वा इति आहुः ऐळ! यथेम् एतद् मृत्युबन्धुः भवसि ते प्रजा देवान् हविषा यजाति। त्वमपि स्वर्ग उ मादयासे।

भा०— उर्वशी प्रस्थानात् पूर्वं पुरूरवसं सान्त्वयन्ती कथयति— इमे देवाः त्वाम् एतत् कथयन्ति, हे ऐळ! यतः त्वं मृत्यु-बन्धुः असि, यथाकालं म्रियसे इति भावः, अतः तव प्रजा देवान् हविषा यक्ष्यन्ति। त्वमपि च स्वर्गे एव बहुविधामोदान् प्राप्स्यसि।।१८।।

पद-व्याख्या—हे vएल पुरूरवः vत्वा त्वाम् vइमे vइमे vदेवाः vइति vआहुः। vमृत्युबन्धुः मृत्योः बन्धकः मृत्योर्बन्धुभूतो वा मृत्युवशमप्राप्नुवंस्त्वं vयथे यथा vएतद्भवसि भविष्यसि vप्रजा प्रकर्षेण जायमानस्त्वं vते तव संबन्धिनो यष्टव्यान् vदेवान् vहविषा vयजासि यजसि। vस्वर्ग vउ स्वर्ग एव vत्वमपि vमादयासे मादयसेऽस्माभिः सह। एवमाहुरित्यर्थः। यस्मादेवं करोपि तरमादभिलाषं हित्वा सुखी भवेति सेयं पुरूरवसं प्रत्युवाय।।४।।

अथ 'प्र ते महे' इति त्रयोदशर्चं षष्ठं सूक्तम्। बरुर्नामाङ्गिरस ऋषिः इन्द्रस्य पुत्रः सर्वहरिर्वा नाम। द्वादशीत्रयोदश्यौ त्रिष्टभौ शिष्टा एकादश जगत्यः। इन्द्रस्याश्वौ हरी। तयोरत्र स्तूयमानत्वात्तद्देवताकमिदम्। तथा चानुक्रान्तं–'प्र ते सप्तोना बरुः सर्वहरिर्वैन्द्रो हरिस्तुतिर्द्वित्रिष्टुबन्तम्' इति। अतिरात्रे तृतीये पर्याये ब्राह्मणाच्छंसिन एतत्सूक्तम्। सूत्रितं च–'प्र ते मह ऊती शचीवस्तव वीर्येणेति याज्या' (आश्व०श्रौ० ६.४) इति। षोडशिशस्त्रेऽप्याद्यस्तृचः शंसनीयः। सूत्रितं च–'प्र ते महे विदथे शंसिषं हरी इति तिस्रो जगत्यः' (आश्व०श्रौ० ६.२) इति।।

हि० अ०— उर्वशी प्रस्थान करने से पूर्व पुरूरवा को सान्त्वना देती हुई कहती है— ये देवगण तुम्हें यह कहते हैं, हे ऐळ! क्योंकि तुम मृत्यु-बन्धु हो, अर्थात् यथासमय तुम्हारी मृत्यु होनी है, अतः तुम्हारी प्रजा अर्थात् तुम्हारे पुत्र देवों के लिए हवि देते हुए यज्ञ करेंगे, और तुम भी स्वर्ग में नानाविध आमोदों को प्राप्त करोगे।।१८।।

सरमा-पणि संवाद-सूक्त

सायण:-'किमिच्छन्ती' इत्येकादशर्चे नवमं सूक्तं त्रैष्टुभम् ऐन्द्रपुरोहितस्य बृहस्पतेर्गोषु बलनाम्नोऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पतिप्रेरितेनेन्द्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता। सा च महतीं नदीमुत्तीर्य वलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श। अथ तस्मिनन्तरे पणय इदं वृत्तान्तमवगच्छन्त एनां मित्रीकर्तुं संवादमकुर्वन्। तत्र प्रथमातृतीयाद्या अयुजोऽन्त्यावर्जिताः पणीनां वाक्यानि। अत्र त ऋषयः सरमा देवता। द्वितीयाचतुर्थ्याद्या युज एकादशी च षट् सरमाया वाक्यानि। अतस्तासु सर्षिः पणयो देवता। तथा चानुक्रान्तं-'किमिच्छन्ती पणिभिरसुरैर्निगूळ्हा गा अन्वेष्टुं सरमां देवशुनिमिन्द्रेण प्रहितामयुग्भिः पणयो मित्रीयन्तः प्रोचुः सा तान्युग्मान्त्याभिरनिच्छन्ती प्रत्याचष्टे इति। गतो विनियोगः॥

१. **किमि॒च्छन्त॑ स॒रमा॒ प्रेदमा॑नड् दु॒रे ह्यध्वा॒ जगु॑रिः परा॒चैः।**

कास्मेहि॑ति॒ः का परि॑तक्म्यासीत्कु॒थं र॒साया॑ अतर॒ः पया॑सि॥१॥

पद-पाठः किम्। इ॒च्छन्ती॑। स॒रमा॑। प्र। इ॒दम्। आ॒न॒ट्। दू॒रे। हि। अध्वा॑। जगु॑रिः। प॒रा॒चैः॥ का। अ॒स्मेऽहि॑तिः। का। परि॑ऽतक्म्या। आ॒सी॒त्। कु॒थम्। र॒साया॑ः। अ॒त॒रः। पया॑सि॥

अन्वय-सरमा किम् इच्छन्ती इदं प्र आनट्। पराचैः जगुरिः अध्वा दूरे हि। का अस्मेहितिः, का परितक्म्या आसीत्? कथं (च) रसायाः पयांसिः अतरः?

सा०भा०-अनयागच्छन्ती सरमां दृष्ट्वा पणयो वदन्ति। सरमा शरणशीलैतन्नामिका देवशुनी किमिच्छन्ती किं प्रार्थयमाना सती इदं अस्मदीयं स्थानं प्र आनट् प्राप्नोत्। आङ्पूर्वो नशि व्याप्तिकर्मा। तस्य लुङि 'मन्त्रे घस' इत्यादिना च्लेर्लुक्। छन्दस्यपि दृश्यत इत्याडागमः। पराचैः पराञ्चि पराङ्मुखान्यावृत्तिवर्जितानि यानि गमनानि तैः जगुरिः उद्गूर्णः। महता प्रयत्नेनापि गन्तुं न शक्यत इत्यर्थः। 'गॄ निगरणे'। 'आदृगमहन' इत्यादिना किन्प्रत्ययः। 'बहुलं छन्दसि' (पा०सू० ७.१.१०३) इत्युत्वम्। तादृशोऽयम् अध्वा दूरे हि विप्रकृष्टः खलु। यद्वा। पराचैः पराञ्चैर्जगुरिरित्यर्थं गन्त्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति। दूरेऽयमध्वा यदृच्छया गन्तुं न शक्यते। अतो वयमेतां पृच्छामः। हे सरमे का कीदृशी अस्मेहितिः। कोऽस्मास्वर्थहितिः। कोऽस्मासु त्वदपेक्षितार्थो निहितः। यद्वा। अस्मासु कोऽर्थो गतः दधातेर्हिनोतेर्वा क्तिनी रूपम्। आगच्छन्त्यास्तव का कीदृशी परितक्म्या रात्रिः आसीत्। यद्वा। तकतिर्गत्यर्थः। परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत। कथं च रसायाः शब्दायमानाया अन्तरिक्षनद्या योजनशतविस्तीर्णायाः पयांसि उदकानि अतरः तीर्णवत्यसि। एतद्वद। 'अत्र किमिच्छन्ती सरमेदं प्रानट्' (निरु० ११.२५) इत्यादिकं निरुक्तं द्रष्टव्यम्॥

शब्दा०-किम्=क्या, **इच्छन्ती**=इच्छा करती हुई, **सरमा**=सरमा नाम की देवशुनी, जिसे इन्द्र ने दूती बनाकर पणियों के पास भेजा था, **इदम्**=यहाँ,

प्रआनट्=आई है, **दूरे**=दूर, **हि**=क्योंकि, **अध्वा**=मार्ग, **जगुरिः**=उभड़ा हुआ, **पराचैः**=गमनागमन से रहित, **का**=कौन सा, **अस्मेहितिः**=हममें तुम्हारा अभिप्रेत अर्थ निहित है, **का**=कैसी, **परितक्म्या**=यात्रा, **आसीत्**=थी, **कथम्**=किस प्रकार, **रसायाः**=रसा नामक नदी के, **अतरः**=पार किया, **पयांसि**=जल को।

हि०अ०—सरमा क्या इच्छा करती हुई इस स्थान पर पहुँची है; क्योंकि मार्ग बहुत दूर, उभड़ा हुआ तथा गमनागमन से रहित था। हममें तुम्हारा कौन-सा अभिप्रेत अर्थ निहित है? तुम्हारी यात्रा कैसी थी? रसा के जल को तुमने कैसे पार किया?

२. इन्द्रस्य दूतीरिषिता चरामि महइच्छन्ती पणयो निधीन्वः।
अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि॥२॥

पद-पाठः इन्द्रस्य। दूतीः। इषिता। चरामि। महः। इच्छन्ती। पणयः। निऽधीन्। वः॥ अतिऽस्कदः। भियसा। तत्। नः। आवत्। तथा। रसायाः॥ अतरम्। पयांसि॥२॥

अन्वयः—(हे) पणयः, इन्द्रस्य दूतीः (तेन एव) इषिता (अहं) वः महः निधीन् इच्छन्ती चरामि। अतिस्कदः भियसा तत् नः आवत्। तथा रसायाः पयांसि अतरम्॥२॥

सा०भा०—अनया तान् सरमा प्रत्युवाच। हे पणयः एतन्नामका असुराः इन्द्रस्य दूतीः। 'सुपां सुलुक्' इति प्रथमैकवचनस्य सुश्छान्दसः। अहम् इषिता तेनैव प्रेषिता सती चरामि। युष्मदीयं स्थानमागच्छामि। किमर्थम्। वः युष्मदीयान् युष्मदीये पर्वतेऽधिष्ठापितान् महः महतः निधीन् बृहस्पतेर्गोनिधीन् इच्छन्ती कामयमाना सती चरामि। किंच अतिष्कदः। 'स्कन्दिर्गतिशोषणयोः'। भावे क्विप्। अतिष्कन्दनादतिक्रमणाज्जातेन भियसा भयेन तत् नदीजलं नः। पूजायां बहुवचनम्। **माम्** आवत् अरक्षत्। तथा तेन प्रकारेण रसायाः नद्याः पयांसि उदकानि अतरं तीर्णवत्यस्मि॥

शब्दा०—**इन्द्रस्य**=इन्द्र की, **दूतीः**=संदेशवाहिका के रूप में, **इषिता**=भेजी गई, **चरामि**=विचरण कर रही हूँ, **महः**=महान्, **इच्छन्ती**=इच्छा करती हुई, **पणयः**=हे पणियो, **निधीन्**=खजाने को, **वः**=तुम्हारे, **अतिष्कदः**=कूदकर पार कर जाने के, **भियसा**=डर से, **तत्**=उस रसा के जल ने, **नः**=हमारी, **आवत्**=रक्षा की, **तथा**=इस प्रकार, **रसायाः**=रसा के, **अतरम्**=पार किया, **पयांसि**=जल को।

हि०अ०—इन्द्र की दूती, उसके द्वारा भेजी गई मैं, हे पणियो, तुम लोगों के प्रभूत धन की इच्छा करती हुई घूम रही हूँ। (मेरे) कूदने के भय से उस (रसा के जल) ने मेरी सहायता की; इस प्रकार रसा के जल को मैंने पार किया।

३. कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्।
आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति॥३॥

पद-पाठः कीदृङ्। इन्द्रः। सरमे। का। दृशीका। यस्य। इदम्। दूतीः। असरः। पराकात्।। आ। च। गच्छात्। मित्रम्। एन। दधाम। अर्थ। गवाम्। गोऽपतिः। नः। भवाति।।३।।

अन्वय–(हे) सरमे, कीदृङ् इन्द्रः, का दृशीका, यस्य दूतीः (त्वम्) पराकात् इदम् असरः। आ च गच्छात् (वयम्) एन मित्रं दधाम। अथ नः गवां गोपतिः भवाति।।३।।

सा०भा०–तेषां वाक्यम्। हे सरमे तव स्वामी इन्द्रः कीदृक्। कियत्पराक्रमवान्। का दृशीका। तस्य कीदृशी दृष्टिः। दृष्टिरूपा सेना कियती। यस्य दूतीः दूती त्वम् इदम् अस्मदीयं स्थानं पराकात् अतिदूरात् असरः आगमः। इति तामुक्त्वा इदानीं ते परस्परमाहुः। एषा सरमा आ गच्छात् च आगच्छतु च। गमेर्लेट्यागमः। स्वामी भवाति भवतु। न ह्येकस्या गोः किंतु बहुनां गवां स्वामी भवतु। वृत्त्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते।।

शब्दा०–**कीदृङ्**=कैसा, **इन्द्रः**=इन्द्र, **सरमे**=हे सरमा, **का**=कैसी, **दृशीका**=दृष्टि, **यस्य**=जिसकी, **इदम्**=यहाँ, **दूतीः**=दूती, **असरः**=आई हो, **पराकात्**=बहुत दूर से, **च**=अगर, **आगच्छात्**=आवे, **मित्रम्**=मित्र, **एन**=उसको, **दधाम**=बनावें, **अथ**=तब, **गवाम्**=गायों का, **गोपतिः**=गायों का स्वामी, **नः**=हमारी, **भवाति**=होगा।

हि०अ०–हे सरमा इन्द्र कैसा है? उसकी दृष्टि कैसी है, जिसकी दूती (तुम) दूर से यहाँ आई हो? अगर वह आवे, हम उसे मित्र बनावेंगे; तब वह हमारी गायों का संरक्षक होगा।

४. नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात्।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे।।४।।

पद-पाठः न। अहम्। तम्। वेद। दभ्यम्। दभत् सः। यस्य। इदम्। दूतीः। असरम्। पराकात्।। न। तम्। गूहन्ति। स्रवतः। गभीराः। हताः। इन्द्रेण। पणयः। शयध्वे।।४।।

अन्वयः–अहं तं दभ्यं न वेद (अपितु) सः दभत्, यस्य दूतीः (अहं) पराकात् इदम् असरम्। स्रवतः गभीराः तं न गूहन्ति। (हे) पणयः, हताः (यूयं) शयध्वे।

सा०भा०–सरमा वदति। हे पणयः तम् इन्द्रं दभ्यं हन्तव्यमिति न वेद न जानामि। दभेः अचो यत्। कथम्। सः इन्द्रः दमत् सर्वान् जनान् दमति हिनस्त्येव। दभेर्लेटिरूपम् वाक्यभेदादनिघातः। यस्य दूतीः दूती अहम् इदं युष्मदीयं स्थानं पराकात् अतिदूराद्देशात् असरं प्राप्ताभूवम्। इन्द्र हिंसितव्यो न भवतीत्यत्र युक्तिमाह। स्रवतः। स्रवर्ण स्रवः। तमाचरन्ति। आचारार्थे क्विप्। तुगागमः। जसिरूपम्। स्रवणशीलाः गभीराः

गम्भीराः नद्यः तम् इन्द्रं न गूहन्ति न संवृण्वन्ति। नाच्छादयन्ति। किंत्वा- विष्कुर्वन्ति। वयं यस्य महिम्ना समुद्रं प्रतिसरामः। तस्मादहिंस्य इत्येनं प्रकटीकुर्वन्ति। वयं यस्य महिस्ना समुद्रं प्रतिसरामः। तस्मादहिंस्य इत्येनं प्रकटीकुर्वन्ति। 'गुहू संवरणे'। भौवादिक तरमाद्धे पणयः यूयम् इन्द्रेण तादृशपराक्रमेण हताः सन्तः शयध्वे। 'शीङ्स्वप्ने'। 'बहुलं छन्दसि' इति शपो लुगभावः।।

शब्दा०—**न**=नहीं, **अहम्**=मैं, **तम्**=उसको, **वेद**=जानती हूँ, **दभ्यम्**=कष्ट पहुँचाया जाने वाला, **दभत्**=कष्ट पहुँचाता है, **सः**=वह, **यस्य**=जिसकी, **इदम्**=यहाँ, **दूतीः**=दूती, **असरम्**=आई हूँ, **पराकात्**=बहुत दूर से, **न**=नहीं, **तम्**=उसको, **गूहन्ति**=छिपा सकती है, **स्त्रवतः**=बहती हुई, **गभीराः**=गहरी जल वाली नदियाँ, **हताः**=मारा जाकर, **इन्द्रेण**=इन्द्र के द्वारा, **पणयः**=हे पणियो, **शयध्वे**=पड़ जावोगे।

हि०अ०—मैं उसको कष्ट पहुँचाया जाने वाला नहीं समझती; (अपितु) वह (शत्रुओं को) कष्ट देता है, जिसकी दूती मैं बहुत दूर से यहाँ आई हूँ। बहती हुई गहरी जल वाली नदियाँ उसको छिपा नहीं सकतीं; इन्द्र द्वारा मारा जाकर तुम लोग, हे पणियो, (पृथ्वी पर) पड़ जावोगे।

५. **इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्त्सुभगे पतन्ती।**
कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा।।५।।

पद-पाठः इमाः। गावः। सरमे। याः। ऐच्छः। परि। दिवः। अन्तान्। सुऽभगे। पतन्ती।। कः। ते। एनाः। अव। सृजात्। अयुध्वी। उत। अस्माकम्। आयुधा। सन्ति। तिग्मा।।५।।

अन्वय—(हे) सुभगे सरमे, दिवः अन्तान् परि पतन्ती इमाः गावः, याः (त्वम्) ऐच्छः, एनाः ते कः अयुध्वी अव सृजात्। उत अस्माकम् आयुधा तिग्मा सन्ति।।५।।

सा०भा०—क्रुद्धाः पणयः प्रत्यूचुः। हे सुभगे शोभनसौभाग्यवति हे सरमे दिवः द्युलोकस्य अन्तान् पर्यन्तान् परि पतन्ती कुत्र गावस्तिष्ठन्तीति परितो गच्छन्ती त्वम् इमाः परिदृश्यमानाः या गावः। सुब्व्यत्ययः। गाः ऐच्छः कामयसे ताः एनाः गाः ते त्वदीयः कः अयुध्वी अयुद्ध्वा अव सृजात्। अस्मात् पर्वतादवसृजेत्। विनिर्गमयेत्। सृजेलेंटि रूपम्। अयुध्वी। युधेः क्त्वाप्रत्यये 'स्नात्व्यादयश्च' इति निपातितः। नञ्समासत्वाल्ल्यबादेशाभावः। नञः प्रकृतिस्वरत्वम्। उत अपि च अस्माकं तिग्मा तीक्ष्णानि आयुधा आयुधानि सन्ति। तस्मादस्मामिर्युद्धमकृत्वा को वा गा आहरति।।

शब्दा०—**इमाः**=इन, **गावः**=गायों को, **सरमे**=हे सरमा, **याः**=जिनकी, **ऐच्छः**=इच्छा की है, **दिवः**=आकाश, **अन्तान्**=छोर तक, **सुभगे**=हे कल्याणकारी, **परिपतन्ती**=चारों तरफ घूमती हुई, **कः**=कौन, **ते**=तुममें, **एनाः**=इनको, **अवसृजात्**=मुक्त कर सकता है, **अयुध्वी**=बिना युद्ध किये, **उत**=और, **अस्माकम्**=हमारे, **आयुधा**=शस्त्र,

सन्ति=हैं, **तिग्मा**=तीक्ष्ण।

हि०अ०–हे सरमा, आकाश की छोर तक चारों तरफ घूमती हुई इन गायों को, जिनकी तुमने इच्छा की है, हे सौभाग्यवती, तुममें से कौन मुक्त कर सकता है? और हमारे शस्त्र भी तीक्ष्ण हैं।

६. असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः।
अधृष्टो व एतवा अस्तु पन्थाबृहस्पतिर्व उभया न मृळात॥६॥

पद-पाठः असेन्या। वः। पणयः। वचांसि। अनिषव्याः। तन्वः। सन्तु। पापीः॥
अधृष्टः। वः। एतवै। अस्तु। पन्थाः। बृहस्पतिः। वः। उभया। न। मृळात्॥६॥

अन्वयः–(हे) पणयः, वः वचांसि असेन्या। (युष्माकं) पापीः तत्त्वः अनिषव्याः सन्तु; वः पन्थाः एतवै अघृष्टः अस्तु; (किन्तु) बृहस्पतिः वः उभया न मृळात्॥६॥

सा०भा०–सा तान्निराह–हे पणयः वः युष्माकं वचांसि पूर्वोक्तानि वचनानि असेन्या असेन्यानि। सेनार्हाणि न भवन्ति। सेनाशब्दात् तदर्हतीत्यर्थे 'छन्दसि च' इति यत्प्रत्ययः। नञ् समासः। 'ययतोश्चातदर्थे' (पा०सू० ६.२.१५६) इत्युत्तरपदान्तोदात्तत्वम्। तथा तन्वः युष्मदीयानि शरीराणि अनिषव्याः इष्वर्हाणि न सन्तु पराक्रमराहित्येन। पूर्ववत् प्रत्ययः। 'ओर्गुणः' (पा०सू० ६.४.१४६) इति गुणः। स्वरश्च तादृक्। यतः पापीः पापयुक्तानि खलु। 'छन्दसीवनिपौ' इतीप्रत्ययः। जसः सुः। किंच वः युष्मदीयः पन्थाः मार्गः एतवै। गन्तुम् अधृष्टः असमर्थः अस्तु। 'इण् गतौ' इत्यस्य तुमर्थे तवैप्रत्ययः। 'तवै चान्तश्च युगपत्' (पा०सू० ६.२.५१) इति धातोः प्रत्ययस्य च युगपदुदात्तत्वम्। तत्र हेतुमाह। वः युष्मदीयान् उभवा उभयविधान् पूर्वोक्तास्तन्वो देहान् बृहस्पतिः इन्द्रप्रेरितः न मृळात् न सुखयेत्। किन्तु बाधेत। 'मृड सुखने'। लेट्यागमः॥

शब्दा०–असेन्या=शस्त्र के आघात से सुरक्षित, **वः**=तुम्हारे, **पणयः**=हे पणियो, **वचांसि**=वचन, **अनिषव्याः**=बाणों के निशान से सुरक्षित, **तन्वः**=शरीर, **सन्तु**=हो सकते हैं, **पापीः**=पापाचरण करने वाले, **अघृष्टः**=अगम्य, **वः**=तुम्हारे पास, **एतवै**=जाने के लिये, **अस्तु**=हो सकता है, **पन्थाः**=मार्ग, **बृहस्पतिः**=बृहस्पति देवता, **वः**=तुम लोगों पर, **उभया**=दोनों प्रकार से, **न**=नहीं, **मृळात्**=दया करेंगे।

हि०अ०–हे पणियो, तुम्हारे वचन शस्त्र के आघात से सुरक्षित, तथा पापी शरीर बाणों के निशान से बचने वाले हो सकते हैं; तुम्हारे पास पहुँचने के लिए मार्ग अगम्य हो सकता है; किन्तु किसी (भी) प्रकार से बृहस्पति दया नहीं करेंगे।

७. अयं निधिः सरमे अद्रिबुध्नोगोभिरश्वेभिर्वसुभिर्न्यृष्टः।
रक्षन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ॥७॥

पद-पाठः अयम्। निऽधिः। सरमे। अद्रिऽबुध्नः। गोभिः। अश्वेभिः। वसुऽभिः। निऽऋष्टः।। रक्षन्ति। तम्। पणयः। ये। सुऽगोपाः। रेकु। पदम्। अलकम्। आ। जगन्थ।।७।।

अन्वय–(हे) सरमे, गोभिः अश्वेभिः वसुभिः न्यृष्टः अयं निधिः अद्रिबुध्नः। तं (निधिं) पणयः, ये सुगोपाः (सन्ति), रक्षन्ति। (त्वं) रेकु पदम् अलकम् आ जगन्थ।

सा०भा०–ते पुनराहुः। हे सरमे अयं निधिः अस्मदीयः कोशः अद्रिबुध्नः। 'बन्ध बन्धने'। 'बन्धेर्ब्रधिबुधी च' (उ०सू० ३.५) इति नप्रत्ययो बुध इत्यादेशः अद्रिबन्धको यस्य तादृशः। तथा आहुतैः गोमिरश्वेमिः अश्वैश्च वसुभिः आत्मीयैर्धनैश्च न्यृष्टः नितरां प्राप्तो भवति। 'ऋषी गतौ'। क्त प्रत्यये 'श्वीदितो निष्ठायाम्' इतीट्प्रतिषेधः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सुगोपाः 'गुपू रक्षणे'। आयप्रत्ययान्तात् क्विपि अतोलोपयलोपौ। सुष्ठु गोपायितारः ये पणयः तेऽसुराः तं निधिं रक्षन्ति पालयन्ति। रेकु। 'रेकृ शङ्कायाम्' औणदिक उप्रत्ययः। शङ्कितं गोभिः शब्दायमानं पदम् अस्माभिः पालितं स्थानम् अलकं व्यर्थमेव आ जगन्य आगतवत्यसि। गमेर्लिटि रूपम्।।

शब्दा०–**अयम्**=यह, **निधि**=खजाना, **सरमे**=हे सरमा, **अद्रिबुघ्नः**=पर्वतों से ढका हुआ है, **गोभिः**=गायों से, **अश्वेभिः**=अश्वों से, **वसुभिः**=संपदाओं से, **न्यृष्टः**=भरा हुआ है, **रक्षन्ति**=रक्षा करते हैं, **तम्**=उसको, **पणयः**=पणि, **ये**=जो, **सुगोपाः**=कुशल रक्षक, **रेकु**=रिक्त, **पदम्**=स्थान पर, **अलकम्**=व्यर्थ में, **आ जगन्थ**=आई हो।

हि०अ०–हे सरमा, गायों, अश्वों तथा संपदाओं से भरा हुआ यह खजाना पर्वतों से ढका हुआ है। पणि, जो कुशल रक्षक है, इसकी रक्षा करते हैं; तुम व्यर्थ में इस खाली स्थान पर आई हो।

८. **एह गमन्नृषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः।**
त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित्।।८।।

पद-पाठः आ। इह। गमन्। ऋषयः। सोमऽशिताः। अयास्यः। अङ्गिरसः। नवऽग्वाः।। ते। एतम्। ऊर्वम्। वि। भजन्त। गोनाम्। अथ। एतत्। वचः। पणयः। वमन्। इत्।।८।।

अन्वयः–सोमशिताः अयास्यः अङ्गिरसः नवग्वाः ऋषयः इह आ गमन्। ते एतं गोनाम् ऊर्वे वि भजन्त। अतः एतत् वचः पणयः वमन् इत्।

सा०भा०–सरमा पुनः प्रत्युवाच। हे पणयः सोमशिताः सोमेन तीक्ष्णीकृताः सोमपानेन मत्ताः। 'शिञ् निशाने'। कर्मणि क्तप्रत्ययः। 'तृतीयाकर्मणि इति पूर्वपदप्रकृतिरवरत्वम्। तादृशाः नवग्वाः नवगतयः। यद्वा। अङ्गिरसां सत्रमासीनानां मध्ये केचन नवसु माः सूदतिष्ठन् ते नवग्वाः। अनेन दशग्वा अप्युपलक्ष्यते। उभयविधास्ते

अङ्गिरसः ऋषयः तेषां प्रथमः अयास्यः एतन्नामा च ते एते इह युष्मदीये स्थाने आ गमन् आगच्छेयुः। गमेः 'छन्दसि लुङ्लङ्लिटः' इति सार्वकालिको लुङ्। ऌदित्त्वाच्च्लेरङ्। आगत्य च ते गोनाम्। 'गोः पादान्ते' इति छन्दसि नुडागमः। गवाम् ऊर्वं तं समूहं वि भजन्त विभागं कुर्युः। अत्रापि पूर्ववत् सार्वकालिको लुङ्। अथ अनन्तरं पणयः यूयम् एतद्वचः पूर्व यत् व्यर्थमागतासीति यद्वाक्यमवोचत तद्वाक्यं तदा वमन्नित् वमन्तः परित्यजन्तः एव भवथ । 'वमु उद्गिरणे'। शतरि 'सुपां सुलुक्' इति जसो लुक्। नुमागमः। संयोगान्तस्य लोपः। यद्वा। लङिरूपम्। स्वरश्छान्दसः।

शब्दा०–**इह**=यहाँ, **आ गमन्**=आयेंगे, **ऋषयः**=ऋषि, **सोमशिताः**=सोमपान से उत्तेजित, **अयास्यः**=अयास्य नामक ऋषि, **अङ्गिरसः**=अङ्गिरस नामक ऋषि, **नवग्वाः**=नवग्वा नाम के ऋषि, **ते**=वे, **एतम्**=इस, **ऊर्वम्**=विशाल समूह को, **वि भजन्त**=बांट लेंगे, **अथ**=तब, **एतत्**=इस, **वचः**=वचन को, **पणयः**=पणियों को, **वमन्**=उगलना पड़ेगा, **इत्**=निश्चित अर्थ का वाचक निपात।

हि०अ०–सोमपान से उत्तेजित अयास्य, अङ्गिरस्, तथा नवग्वा आदि ऋषि यहाँ आयेंगे। वे गायों के इस विशाल समूह को बांट लेंगे। तब पणियों को अपने इस वचन को उगलना पड़ेगा।

९. एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम॥९॥

पद-पाठः एव। च। त्वम्। सरमे। आऽजगन्थ। प्रऽबाधिता। सहसा। दैव्येन॥
स्वसारम्। त्वा। कृणवै। मा। पुनः। गाः। अप। ते। गवाम्। सुऽभगे। भजाम॥९॥

अन्वयः–(हे) सरमे, दैव्येन सहसा प्रबाधिता एव त्वं च आजगन्थ, त्वा स्वसारं कृणवै, पुनः मा गाः। (हे) सुभगे गवां ते अप भजाम।

सा०भा०–तथैवमुक्ते सति पणयः प्रणयवाक्यमाहुः। हे सरमे त्वं दैव्येन देवसंबन्धिना सहसा बलेन प्रबाधिता यथा तथा बलपुरं प्राप्य तत्र स्थिता गा दृष्ट्वा पुनरागच्छेति तेन प्रपीडिता त्वम् एवं चेत् आजगन्थ आगतवत्यसि। चशब्दश्चेदर्थे। 'निपातैर्यद्यदिहन्त' इति तिङो निघाताभावः। गमेर्लिटि थलि रूपम् 'सह सुपा' इत्यत्र सहेति योगविभागात् समासः। 'तिङि चोदात्तवति' इति गतेर्निघातः लित्स्वरः। तर्हि त्वा त्वां स्वसारं भगिनीं कृणवै करवै। समूहा पेक्षयैकवचनम्। त्वं तु पुनः मा गाः। इन्द्रादीन् मा गच्छ। अपि तर्हि हे सुभगे सरमे ते त्वदीयानां गवां समूहं पर्वतादपगमय्य भजाम। त्वं च वयं च विभजाम विभागं करवामेत्यर्थः।

शब्दा०–**एव**=इस प्रकार, **च**=अगर, **त्वम्**=तुम, **सरमे**=हे सरमा, **आजगन्थ**=आई हो, **प्रबाधिता**=पीड़ित की गई, **सहसा**=शक्ति से, **दैव्येन**=देवताओं की, **स्वसारम्**=बहन, **त्वा**=तुमको, **कृणवै**=बनाते हैं, **मा**=मत, **पुनः**=फिर, **गाः**=जावो, **ते**=तुमको, **गवाम्**=गायों का, **सुभगे**=हे सौभाग्यवती, **अव भजाम**=अलग हिस्सा देंगे।

हि०अ०–इस प्रकार, हे सरमा, अगर तुम देवताओं की शक्ति से पीड़ित की गई आई हो, तो हम तुम्हें बहन बनाते हैं, फिर मत जावो। हम, हे सौभाग्यवती, तुम्हें गायों का अलग हिस्सा देंगे।

१०. नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुरङ्गिरसश्च घोराः।
गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः॥१०॥

पद-पाठः न। अहम्। वेद। भ्रातृऽत्वम्। नो इति। स्वसृऽत्वम्। इन्द्रः। विदुः। अङ्गिरसः। च। घोराः॥ गोऽकामाः। मे। अच्छदयन्। यत्। आयम्। अप। अतः। इत। पणयः। वरीयः॥१०॥

अन्वयः–अहं भ्रातृत्वं न वेद; नो स्वसृत्वम्; इन्द्रः घोराः अङ्गिरसश्च विदुः। यत् (अहम्) आयम्, (ते) मे गोकामाः अच्छदयन्। अतः (हे) पणयः, वरीयः अप इत।

सा०भा०–सा तान् प्रत्याचष्टे। हे पणयः अहं भ्रातृत्वं न वेद न जानामि। तथा स्वसृत्वं च नो वेद नैव जानामि। के जानन्ति तामाह। इन्द्रः घोराः शत्रूणां भयंकराः अङ्गिरसश्च विदुः जानन्ति। किंच अस्मात् स्थानादहं यत् यदा आयम् इन्द्रादीन् प्राप्नवम्। 'अय पय गतौ'। लङि रूपम्। तदा मे मदीयाः गोकामाः युष्माभिरपहृता गाः कामयमाना इन्द्रादयः अच्छदयन्। युष्मदीयं स्थान- माच्छादयन्ति। 'छद अपवारणे'। अतः कारणाद् हे पणयः वरीयः उरुतरं गवां वृन्दं परित्यज्य अप इत अन्यत्स्थानं प्रति गच्छत। यद्वा। वरीयः प्रभूतमतिदूरं देशं गच्छत। इत। 'इण गतौ'। लोटि रूपम्। वरीयः उरुशब्दा दीयसुनि 'प्रियस्थिर' इत्यादिना वरादेशः।

शब्दा०–**न**=नहीं, **अहम्**=मैं, **वेद**=जानती हूँ, **भ्रातृत्वम्**=भाईपना, **न**=न तो, **स्वसृत्वम्**=बहनपना, **इन्द्रः**=इन्द्र, **विदुः**=जानते हैं, **अङ्गिरसः**=अङ्गिरस, **च**=और, **घोराः**=भयंकर, **गोकामाः**=गायों की इच्छा करने वाले, **मे**=मुझको, **अच्छदयन्**=मालूम पड़े, **यत्**=जब, **आयम्**=आई, **अप**=अलग, **अतः**=इसलिये, **इत**=चले जावो, **पणयः**=हे पणियो, **वरीयः**=किसी विस्तृत स्थान पर।

हि०अ०–मैं न तो भाईपना जानती हूँ, न बहनपना; इन्द्र तथा भयानक अङ्गिरस इसको जानते हैं। जब मैं आई, वे गायों की इच्छा करने वाले मालूम पड़े। अतः हे पणियों, (इसकी अपेक्षा) किसी विस्तृत स्थान पर चले जावो।

११. दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन।
बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः॥११॥

पद-पाठः दूरम्। इत। पणयः। वरीयः। उत्। गावः। यन्तु। मिनतीः। ऋतेन॥ बृहस्पतिः। याः। अविन्दत्। निऽगूळ्हाः। सोमः। ग्रावाणः। ऋषयः। च। विप्राः॥११॥

अन्वय–(हे) पणयः (यूयं) वरीयः दूरम इत। गावः ऋतेन मिनतीः उत् यन्तु; निगूळ्हाः याः (गाः) बृहस्पतिः अविन्दत् सोमः ग्रावाणः विप्राः ऋषयः च (अविन्दन्)।

सा०भा०–हे पणयः यूयं वरीयः उरुतरं दूरं दूरदेशम् इत गच्छत। युष्माभिरपहृताः गावः ऋतेन सत्येन मिनतीः मिनत्यो द्वारस्य पिधायकं पर्वतं हिंसत्यो विदारयन्त्यः उत् यन्तु तस्मादुद्गच्छन्तु। यद्वा। मिनतीः। व्यत्ययेन कर्मणि शतृ। मीयमाना युष्माभिर्बाध्यमानास्ता गावः सुब्व्यत्ययः। गा ऋतेन स्तुतिभिर्गन्तव्येनेन्द्रेण सहायेन बृहस्पत्यादय उद्यन्तु पर्वतादुद्गमयन्तु। निगूढाः नितरां स्थापिताः याः गाः बृहस्पति अविन्दत् लप्स्यते तथा सोमः तदभिषवकारिणः ग्रावाणः च विप्राः मेधाविनः ऋषयः अङ्गिरसः च लप्स्यन्ते। 'विद्लृ लाभे'। तौदादिकः तस्मात् 'छन्दसि लुङ्लङ्लिटः' इति भविष्यदर्थे लङ्। 'शे मुचादीनाम्' इति नुमागमः ॥

शब्दा०–दूरम्=दूर, इतं=चले जावो, पणयः=हे पणियो, ववरीयः=विस्तृत स्थान पर, गावः=गायें, उत् यन्तु=बाहर निकलें, मिनती=चट्टानों को तोड़ती हुई, ऋतेन=सत्य नियम के अनुकूल, बृहस्पतिः=बृहस्पति ने, याः=जिनको, अविन्दत्=ढूढ़ निकाल है, निगूळहाः=छिपी हुई, सोमः=सोम ने, ग्रावाणः=पत्थरों ने, ऋषयः=ऋषियों ने, च=और, विप्राः=बुद्धिमान्।

हि० अ०–हे पणियो, (इसकी अपेक्षा) किसी विस्तृत स्थान पर चले जावो। छिपी हुई गायें, जिनको बृहस्पति ने पता लगाया है, (जिनको) सोम ने, पत्थरो ने, तथा बुद्धिमान् ऋषियों ने (पता लगाया है, चट्टानों के आवरण को) तोड़ती हुई, सत्य के नियम के अनुकूल बाहर निकलें।

(ख) अथर्ववेद (शौनक-संहिता)

अथर्ववेद :

अथर्ववेद-संहिता का अध्ययन बहुत उपेक्षित रहा, इसे प्रायः जादू-टोने का ही वेद माना गया, त्रयी में इसका सन्निवेश न होने से इसे कम महत्व भी दिया गया, परन्तु मॉरिस ब्लूमफील्ड ने इस ओर ध्यान दिलाया कि अथर्ववेद-संहिता का अध्ययन

प्राचीन भारतीय जीवन की समग्रता की दृष्टि से बहुत उपयोगी है, क्योंकि जन्म से लेकर मृत्युपर्यन्त और मृत्यु के परे भी जीवन के बारे में जितनी विशदता और काव्यमयता के साथ इस संहिता में वर्णन है उतना अन्यत्र नहीं। यही नहीं, इसमें आत्मचिन्तन और ब्रह्मचिन्तन की धारा भी अन्य संहिताओं की अपेक्षा प्रखर है।

इस वेद की नव शाखयें बतलायी जाती हैं, १. पैप्पलाद, २. तौद या स्तौद (इसका नाम तौदायन, स्तोदायन भी मिलता है), ३. मौद या मौदायन, ४. शौनकीय, ५. जाजल, ६. जलद, ७. ब्रह्मवद, ८. देवदर्श, ९. चारण वैद्य।

इनमें केवल दो के पाठ आज मिलते हैं, एक शौनकीय संहिता, दूसरी संहिता जिसे कश्मीरी अथर्ववेद कहते हैं और जिसे पैप्पलाद-संहिता कहा जाता है, परन्तु निश्चय रूप से अभी तक प्रमाणित नहीं हो सका है कि यह कश्मीरी पाठ पैप्पलाद-संहिता का ही है। दोनों पाठों की तुलना करते समय स्पष्ट हो जाता है कि यों तो शौनकीय पाठ और पैप्पलाद पाठ में प्रथम चौदह काण्डों तक समानता है पर पैप्पलाद में शैनकीय संहिता के १५ वें काण्ड का कुछ अंश मात्र साम्य रखता है, १६-१७ वें काण्ड में भी अधिकांश में साम्य है पर २८-२९ काण्ड तो एकदम ही पैप्पलाद में नहीं है और २० वें काण्ड की सामग्री यत्र-तत्र सर्वत्र पैप्पलाद में विखरी हुई है।

इस वेद में कुल ७३० सूक्त हैं जिनमें लगभग दो सौ सूक्तों के ऋषि अथर्वा हैं। शेष सूक्त १२९ ऋषियों के योगदान हैं। इनमें भी ब्रह्मा तथा अंगिरा ऋषियों के सूक्त अधिक हैं। उनके बाद मेधातिथि, भृगु, भृग्वङ्गिरा, मधुछन्दा, विश्वामित्र के हैं। अथर्वा ऋषि के सूक्तों की प्रधानता के कारण सम्भवत: इस वेद का नाम अथर्व पड़ा। नामों के विषय मे बृहद्देवता की मान्यता है कि 'सभी नाम कर्म द्वारा उत्पन्न होते हैं।' इससे संशय उत्पन्न होता है कि अथर्वा व्यक्तिनाम है, सम्प्रदाय है, परम्परा है, या विषय है। उपर्युक्त स्रोत से ज्ञात होता है कि नाम निरर्थक नहीं होते। वे आवास, कर्म, रूप, मंगलत्व, वाच्, आशीष, स्वेच्छा, निकटवास तथा कुलत्व के आधार पर रखे जाते थें। 'अथर्वन्' बहुत प्राचीन शब्द है। इसका उल्लेख ऋग्वेद में भी है (अग्निर्जातो अथर्वणा। ऋ० १०.२१.५)। **ब्राह्मण** काल में अग्निपूजाकों को **अथर्वन्** कहते थे। **पुराणों** के समय पुरोहितों की संज्ञा अथर्वन् थी। इस प्रकार अथर्वनों की प्रशस्त दीर्घ परम्परा पुरस्सर हुई है।

अथर्ववेद का ब्राह्मण गोपथ है। उसमें ऋषि अथर्वा की उत्पति कथा दी गई है। कल्प के प्रारम्भ मे सृष्टि-विधान के लिए स्वयंभू ब्रह्म तप कर रहे थे। उग्र तप के फलस्वरूप उनके रोमकूपों से पसीने की धारा फूट निकली। उसमें उनका संकल्प रेतस् बह चला। आगे चलकर वह दो शाखाओं में विभक्त हो गया। रेतस् एक स्थान

पर ठहर गया। उष्णता से भुन जाने के कारण उससे भृग का जन्म हुआ। वे अपने जनक ब्रह्म को देखने-जानने के लिए उत्सुक हुए। उनके इस मनस्ताप को देखकर भविष्यवाणी हुई कि तुम अपने जनक ब्रह्म का अन्वेषण नीचे स्थित जलों में करो–

अथार्वाग् एनम् एतासु अप्सु अन्विच्छ।(अ० २१४)

इस वाणी का प्रथम शब्द अथार्वाग् (अथ+अर्वाग्) भृगु का दूसरा नाम हुआ। उसके बाद शेष जल से आप्लुत तपस्वी वरुणापर ब्रह्म के अंगों से रस द्रवित हुआ। उससे उत्पन्न ऋषि अंगिरस हुए। इन्हीं अथर्वा और अंगिरा में ब्रह्म अंतर्हित हो गया। तपोबल से इनके एक सौ बीस पुत्र हुए। ये सभी मन्त्र द्रष्टा थे। इनके मन्त्रों का बृहत्संग्रह अथर्वाङ्गिरस वेद अथवा ब्रह्मवेद कहलाया। गोपथ।

अथर्ववेद के कई नाम मिलते हैं अथर्वाङ्गिरस वेद, भृग्वंगिरस वेद, ब्रह्मवेद। अथर्वाङ्गिरस वेद में अथर्वन् शांति या पुष्टि अंश से और अंगिरस अभिचार या धोर अंश से सम्बद्ध माने गये हैं। कल्प-सूत्रों में प्रायः इस प्रकार के उल्लेख मिलते हैं। भृग्वंगिरस नाम लगता है आथर्वणों को भृगु मानने के फलस्वरूप आया है। जहां तक ब्रह्मदेव नाम का प्रश्न है यह नाम इस आधार पर आया कि यज्ञ में ऋत्विग् का वेद ऋग्वेद, उद्गाता का सामवेद, होता का यजुर्वेद तो ब्रह्मा का, जो एक प्रकार से चुपचाप समस्त कार्यों के साक्षी के रूप में बैठा रहता है, अथर्ववेद, परिशिष्ट से मान लिया गया। इसे मानने में वैसे उपपत्ति भी है, कर्म के साक्षी के रूप में आत्मचिन्तनपरायण अथर्ववेद के पुरोहित को रखना कर्मकाण्ड और ज्ञानकाण्ड में समन्वय स्थापित करने के लिए है। ऐसा प्रतीत होता है कि दो वैदिक विचारधारायें थीं, एक बाह्यानुष्ठान पर अधिक बल देने वाली, देवशक्तियों का आवाहन करनेवाली, कर्मकाण्ड का वितान करनेवाली, दूसरी थी आभ्यन्तर शाक्तियों पर अधिक बल देनेवाली, मानव जीवन की आकांक्षाओं को धर्मरूप में उभारने वाली और ज्ञान रहस्यान्वेषण और भावना की एकाग्रता का विकास करने वाली। दूसरी धारा सम्भवतः भृगुओं-अंगिरसों के नये व्रातों या समूहों द्वारा लायी गयी, ये अत्यन्त आक्रामक विचार वाले थे, इसलिए इन्हें प्रारम्भ में स्वीकृति नहीं मिली, पर कालान्तर में अपने विचारों की सप्राणता और समग्रता के कारण पूरी भारतीय संस्कृति पर छा गये। यहां यह उल्लेखनीय है कि आज के हिन्दू के अगणित विश्वास, अनुष्ठान और मान्यतायें बीज रूप में सबसे अधिक अथर्ववेद में हैं। प्रायः सभी संस्कारों के (गर्भाधान से लेकर अन्त्येष्टि तक) बीज अथर्ववेद में है, इसी वेद में सर्वप्रथम जन्मान्तरवाद की प्रस्थापना है, इसी में अनेक प्रकार के अनुसन्धानों (चिकित्सा, गृहनिर्माण, शस्त्रास्त्रनिर्माण आदि के क्षेत्रों में) के उल्लेख हैं तथा इसी में सबसे प्रभावकारी रूप में पृथिवी माता के प्रति गहरी भक्ति जगाने की बात है।

इस वेद का अध्यन कई दृष्टियों से किया जाना है, एक तो इस दृष्टि से कि अथर्ववेदीय परिकल्पना के धार्मिक जीवन का किस रूप में निरन्तर सातत्य हिन्दू जीवन में बना हुआ है, दूसरा इस दृष्टि से कि ब्राह्मणों, आरण्यकों और उपनिषदों के आत्मब्रह्म-चिन्तन के कौन से सूत्र अथर्ववेद में मिलते हैं और आगमों, पुराणों तथा तन्त्रों की उपासनाओं और उनमें वर्णित अनुष्ठानों के कौन से सूत्र यहां मिलते हैं, तीसरा इस दृष्टि से कि आधुनिक दृष्टि से सामान्य मनुष्य की आकांक्षा को किस तरह सहज और काव्यमय अभिव्यक्ति यहां मिलती है और चौथा शुद्ध रूप से भाषा की दृष्टि से किन अर्थो में अथर्ववेद की भाषा कहीं-कहीं ऋग्वेद से भी पुरानी लगती है, किन अर्थो में ब्राह्मणों की भाषा के बीज उसमें मिलते हैं और किन अर्थों में एकदम अलग दिखती है। एजर्टन ने ठीक ही कहा है कि अथर्ववेद के ऋषियों के चिन्तन का मुख्य उद्देश्य वस्तुओं की गहरी और भीतरी सचाई के ज्ञान के द्वारा व्यावहारिक जीवन को समृद्ध बनाना था, वे इस प्रकार के रहस्यान्वेषण से यह आशा करते कि अपने जीवन में सफल प्रयोग कर सकेंगे, (Philosophy in Atharva Veda, M. Bloomfield Felicitation Volume)

भूमि-सूक्तः (१२.१)

इसे पृथिवी सूक्त भी कहा जाता है। इस सूक्त में पृथिवी के स्वरूप का विशद वर्णन प्राप्त होता है। आचार्य सायण के अनुसार इसमें कई पौराणिक कथाओं को जक्षय करके भी वर्णन किया गया है। इनेक स्थलों में ऋषि ने पृथ्वी से वरों की प्रार्थना की है।

सम्प्रदाय के अनुसार इस सूक्त का अनेक प्रकार का विनियोग होता है। यथा-"सत्यं बृहत्" अनुवाकका वास्तोष्पत्यगण में पाठ है।

आग्रहायणी कर्म में रात्रि के समय अभ्यातान तक करके तीन चरुओं को राँधे फिर इस अनुवाक से अग्नि के पीछे गड्ढे में दर्भों को बिछाकर एक चरुको एक बार कुछ अवशिष्ट न रख कर होम दें दे। फिर इस अनुवाक से दूसरे चरु को सम्पातित और अभिमन्त्रित करके प्राशन करे। तीसरे चरु को "सत्यं बृहत्" आदि पहली सात ऋचाओं से और "भूमे मातः" (६३) नामक आठवीं ऋचा से तीन बार आहुति दे। तात्पर्य यह है आठ ऋचाओं की आवृत्ति करके तीन बार होम करे। अग्नि के पीछे दर्भों पर तृणमय फैली हुई चटाई को बिछाकर "विमृग्वरीम्" इस उन्तीसवीं ऋचा से उपवेशन करे। "यास्ते शिवाः" (९।२।२५) से संवेशन करे। "यच्छयानः" इस ३४वीं

ऋचा से पर्यावर्तन करे। "सत्यं बृहत्" आदि नौ ऋचाओं से "शन्तिवा" इस उनसठवीं ऋचा से और "उदायुषा" आदि तीसरे काण्ड के इकतीसवें सूक्त की दशवीं और ग्यारहवीं ऋचा से प्रातः काल के समय उठे। "उद्वयम्" इस सातवें काण्ड के पचपनवें सूक्त की सातवीं ऋचा से चले। "उदीराणा:" इस अट्ठाईसवीं ऋचा से पूर्व उत्तर वा बाहर से जावे। "यावत् ते" इस तैंतीसवीं ऋचा से भूमि को देखे। यह आग्रहायणी कर्म हुआ।

पुष्टि को चाहने वाला उन्नत स्थान पर चढ़कर "यावत् ते" इस चौंतीसवीं ऋचा से देखें।

इस अनुवाक से जलपूर्ण पात्र को सम्पातित करके अग्नि के सामने युक्त सीर का प्रोक्षण करे।

इस अनुवाक से कृषि कर्म होता है। इसका "सीरा युञ्जन्ति" इस तीसरे काण्ड के सत्रहवें सूक्त में विस्तृत वर्णन है।

पुत्र धन आदि सब फलों की प्राप्ति के लिये "यस्यां सदो हविर्धाने" आदि अड़तीसवीं, उन्तालीसवीं, और चालीसवीं इन तीन ऋचाओं से घृत की आहुति दे।

व्रीहि यव आदि अन्न की कामना रखने वाला "यस्यामन्नम्" इस बयालीसवीं ऋचा से पृथ्वी का उपस्थान करे।

मणि सुवर्ण आदि को चाहने वाला "निधिं बिभ्रतीम्" इन चौबालीसवीं और पैंतालीसवीं ऋचाओं से पृथ्वी का उपस्थान करे।

मणि वा सुवर्ण को पाकर भी इन दोनों ऋचाओं से उपस्थान करे।

पुष्टि को चाहने वाला वृष्टि के समय में "यस्यां कृष्णम्" इस बावनवीं ऋचा से नवीन जल को अभिमन्त्रित करके आचमन और स्नान करे।

इसी बात को कौशिक ने कहा है कि–"सत्यं बृहत् इत्याग्रहायण्याम्। पश्चाद् अग्नेर्गर्भेषु खदायां सर्वहुतम्। द्वितीयं सम्पातवन्तं अश्नाति तृतीयस्यादितः सप्तभिर्भूमे मातरिति त्रिर्जुहोति। पश्चाद् अग्नेर्दर्भेषु कशिप्वास्तीर्य विमृग्वरीम् इत्युपविशति। यास्ते शिवा इति संविशति। यच्छयान इति पर्यावर्तते। नवभिः शन्तिवेति दशम्योदायुषेत्युपोत्तिष्ठति। उद्वयम् इत्युत्क्रामति। उदीराणा इति त्रीणि पदानि प्राङ्षोदङ् वा बाह्येनोपनिष्क्रम्य यावत् त इति वीक्षते। उन्नताच्च। पुरस्ताद् अग्नेः सीरं युक्तं उदपात्रेण सम्पातवताऽवसिञ्चति। आयोजनायां अप्ययः। यस्यां सदो हविर्धाने इति जुहोति वरो म आगमिष्यतीति। यस्यामन्नमुपतिष्ठते। निधिं बिभ्रतीति मणिं हिरण्यकामः। एवं विद्वान् यस्यां कृष्णम् इति वार्षकृतस्याचमति। शिरस्यानयते" इति (कौशिकसूत्र ३/७) वरो वरणीयो मम भवेदित्यर्थः।

ग्राम नगर आदि की रक्षा के लिये इस अनुवाक से चार पुरोडाशों को अश्मोत्तर कर ग्राम आदि के कोनों में गाढ़ देवे।

ग्राम नगर आदि की रक्षा करने के लिये एक-एक पुरोडाश के पाषाण को ऊपर करके दोनों को संपात वाले करे फिर ग्राम आदि के कानों में गाढ़ देय। सर्वत्र प्रत्येक् द्रव्य पर सूक्त की आवृत्ति करनी चाहिये।

अग्निभवन के सन्तापरहित स्थान में लेटकर इस अनुवाक को जपे। सर्वत्र कर्मों का विकल्प है।

इसी बात को कौशिक सूत्र में कहा है कि–"भौमस्य दृतिकर्माणि। पुरोडाशान् अश्मोत्तरान् अन्तः स्त्रक्तिषु निदधाति। उभयान्तसम्पातवतः। सभाभागधानेषु च। असन्तापे ज्योतिरायतनस्यैकतोऽन्यं शयानो भौमं जपति" इति (कौशिकसूत्र ५।२)।।

भूकम्प होने पर इस अनुवाक का होम में विनियोग होता है। "अथ यतैतद् भूमिचलो भवति। जहाँ पर यह भूकम्प होता है" इस बात का आरम्भ करके कौशिक ने कहा है, कि–"सत्यं बृहद इत्येतेनानुवाकेन जुहुयात् सा तत्र प्रायश्चित्तिः। सत्यं बृहत् इस अनुवाक से आहुति देय, यही उसका प्रायश्चित है।" (कौशिकसूत्र १३।६)।।

सोमयज्ञ के दीक्षित नियमों में मूत्र वा पुरीष की शुद्धि के लिये लोष्टदान में इसका विनियोग होता है। इसी बात को वैतान सूत्र में कहा है, कि–"सत्यं बृहद् इति लोष्टं आदाय।" इति (वैतान सूत्र ३।२)।।

"पार्थिवीं भूमिकामस्य। भूमि की कामना वाले के लिये पार्थिवी शान्ति को करे" इस नक्षत्रकल्प १७ से विहित पार्थिवी महाशान्ति में इस अनुवाक का विनियोग होता है। इसी बात को नक्षत्रकल्प में कहा है, कि–"सत्यं बृहत् इत्यनुवाकः पार्थिव्यास्" इति (नक्षत्रकल्प १८)।।

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।।१।।

पद-पाठः सत्यम्। बृहत्। ऋतम्। उग्रम्। दीक्षा। तपः। ब्रह्म। यज्ञः। पृथिवीम्। धारयन्ति। सा। नः। भूतस्य। भव्यस्य। पत्नी। उरुम्। लोकम्। पृथिवी। नः। कृणोतु।।१।।

सत्य, बृहत् जल, दीक्षा, उग्र तप, ब्रह्म और यज्ञ ये पृथिवी को धारण करते हैं अर्थात् इनके आधार पर पृथिवी टिकी रहती है, ऐसी यह उत्पन्न हुए और उत्पन्न होने वाले प्राणियों का पालन करने वाली पृथ्वी देवी हमको विस्तीर्ण स्थान दें।।१।।

असंबाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः।।२।।

पद-पाठः असम्ऽबाधम्। मध्यतः। मानवानाम्। यस्याः। उत्ऽवतः। प्रऽवतः। समम्। बहु। नानाऽवीर्याः। ओषधीः। या। बिभर्ति। पृथिवी। नः। प्रथताम्। राध्यताम्। नः।।२।।

जिस पृथ्वी के मनुष्यों के मध्य में असम्बाधरूप से बहुत से नीचे को ढलकाव वाले ऊपर को चढ़ाई वाले और सम इस प्रकार के बहुत से स्थान हैं और जो पृथिवी अनेक प्रकार की शक्तियों से सम्पन्न औषधियों को धारण करती है वह पृथिवी हमारे लिये विस्तीर्ण मात्रा में प्राप्त हो और हमारे कृषि आदि मनोरथों को सिद्ध करे।।२।।

यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।

यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु।।३।।

पद-पाठः यस्याम्। समुद्रः। उत। सिन्धुः। आपः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः। यस्याम्। इदम् जिन्वति। प्राणत्। एजत्। सा। नः। भूमिः। पूर्वऽपेये। दधातु।।३।।

जिस पृथिवी में समुद्र है, नदियें हैं, जल हैं, और जिसमें खेती तथा अन्न होता है और जिसमें यह चेष्टाशील प्राण वाला जगत् तृप्त होता है वह पृथ्वी हमको जिस स्थल में फलरूपी रस का पहले पान हो सकता है उस स्थल में स्थापित करे।।३।।

यस्याश्चतस्त्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः।

या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्ने दधातु।।४।।

पद-पाठः यस्याः। चतस्रः। प्रऽदिशः। पृथिव्याः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः। या। बिभर्ति। बहुऽधा। प्राणत्। एजत्। सा। नः। भूमिः। गोषु। अपि। अन्ने। दधातु।।४।।

जिस पृथिवी में पूर्व पश्चिम उत्तर दक्षिणरूप चार श्रेष्ठ दिशायें हैं और जिसमें खेती और अन्न होता है और जो चेष्टाशील प्राणवाले जगत् को अनेक प्रकार से धारण करती है वह भूमि देवी हमको गौ और अन्न में स्थापित करे।।४।।

यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।

गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु।।५।।

पद-पाठः यस्याम्। पूर्वे। पूर्वऽजनाः। विचक्रिरे। यस्याम्। देवाः। असुरान्। अभिअवर्तयन्। गवाम्। अश्वानाम्। वयसः। च। विऽस्था। भगम्। वर्चः। पृथिवी। नः। दधातु।।५।।

जिस पृथ्वी में परम प्राचीन पूर्व पुरुषों ने अनेक प्रकार के कर्म किये हैं और जिसमें देवताओं ने असुरों के सन्मुख युद्ध किया है जो पृथ्वी गौ अश्व और पक्षियों के अनेक प्रकार से रहने का स्थान है अर्थात् जिसमें गौ अश्व और पक्षी अनेक रीति से रहते हैं, वह पृथ्वी हमको धन और तेज देवे।।५।।

विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्र ऋषभा द्रविणे नो दधातु॥६॥

पद-पाठः विश्वम्ऽभरा। वसुऽधानी। प्रतिऽस्था। हिरण्यऽवक्षाः। जगतः। निऽवेशनी। वैश्वानरम्। बिभ्रती। भूमिः। अग्निम्। इन्द्रऽऋषभा। द्रविणे। नः। दधातु॥६॥

विश्वभर का भरण करने वाली, धन को धारण करने वाली प्राणियों की स्थिति की हेतु है, सुवर्ण को (खानरूप में) वक्षःस्थल में धारण करने वाली है, जगत् को बसाने वाली है, वैश्वानर अग्नि को धारण करने वाली है ऐसी वृषभरूप इन्द्र को धारण करने वाली पृथ्वी हमको धन प्रदान करे॥६॥

यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथवीमप्रमादम्।
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा॥७॥

पद-पाठः याम्। रक्षन्ति। अस्वप्नाः। विश्वऽदानीम्। देवाः। भूमिम्। पृथिवीम्। अप्रऽमादम्। सा। नः। मधु। प्रियम्। दुहाम्। अथो इति। उक्षतु। वर्चसा॥७॥

शयन न करने वाले देवता जिस पृथ्वी की सावधानी से सदा रक्षा करते हैं, वह हमको मधुर और प्रिय (अन्नादि) को देवे फिर वर्चः से सम्पन्न करे॥७॥

यार्णवेधिं सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः।
यस्या हृदयं परमे व्योमन्त्सत्येनावृतममृतं पृथिव्याः।
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे॥८॥

पद-पाठः या। अर्णवे। अधि। सलिलम्। अग्रे। आसीत्। याम्। मायाभिः। अनुऽअचरन्। मनीषिणः। यस्याः। हृदयम्। परमे। विऽओमन्। सत्येन। आऽवृतम्। अमृतम्। पृथिव्याः। सा। नः। भूमिः। त्विषिम्। बलम्। राष्ट्रे। दधातु। उत्ऽतमे॥८॥

जो पहले समुद्र में थी और विद्वान् पुरुष शक्तियों से जिस पर विचरण करते हैं और जिस पृथ्वी का अमृतमय हृदय परमवयोम में प्रतिष्ठित है, वह भूमि हमको उत्तम राष्ट्र में स्थापित करे तथा दीप्ति और बल प्रदान करे॥८॥

यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।
सा नो भूमिर्भूरिधारा पयोदुहामथो उक्षतु वर्चसा॥९॥

पद-पाठः यस्याम्। आपः। परिऽचराः। समानीः। अहोरात्रे इति। अप्रऽमादम्। क्षरन्ति। सा। नः। भूमिः। भूरिऽधारा। पयः। दुहाम्। अथो इति। उक्षतु। वर्चसा॥९॥

जिसमें चारों ओर विचरण करने वाले जल दिन रात में एक-सी रीति से सावधानतापूर्वक बहते रहते हैं, ऐसी भूरिधारा भूमि हम को दुग्ध के समान सारभूत

फल को देवे और हमको वर्च से सम्पन्न करे॥९॥

यामश्विनावमिमातां विष्णुर्यस्यो विचक्रमे।

इन्द्रो यां चक्र आत्मनेनमित्रां शचीपतिः।

सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः॥१०॥

पद-पाठः याम्। अश्विनौ। अमिमाताम्। विष्णुः। यस्याम्। विऽचक्रमे। इन्द्रः। याम्। चक्रे। आत्मने। अनमित्राम्। शचीऽपतिः। सा। नः। भूमिः। वि। सृजताम्। माता। पुत्राय। मे। पयः॥१०॥

अश्विनीकुमारों ने जिसका निर्माण किया है और विष्णु ने जिस पर विक्रमण किया है और इन्द्र ने जिसको शत्रुरहित करके अपने वश में किया था ऐसी भूमि, माता जैसे पुत्र को दूध पिलाती है इस प्रकार मेरे लिये दुग्ध के समान सारभूत फल को देवे॥१०(१)॥

गिरयस्ते पर्वता हिमवन्तोरण्यं ते पृथिवि स्योनमस्तु।

बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।

अजीतोहतो अक्षतोध्यष्ठां पृथिवीमहम्॥११॥

पद-पाठः गिरयः। ते। पर्वताः। हिमऽवन्तः। अरण्यम्। ते। पृथिवि। स्योनम्। अस्तु। बभ्रुम्। कृष्णाम्। रोहिणीम्। विश्वऽरूपाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। इन्द्रऽगुप्ताम्। अजीतः। अहतः। अक्षतः। अधि। अस्याम्। पृथिवीम्। अहम्॥११॥

हे पृथिवी देवि! तेरे पर्वत, छोटे-छोटे पर्वत, हिमाचल के स्थान, और वन हमारे लिये सुखदायक हों, मैं बभ्रु, कृष्ण, लाल (आदि) अनेक रूपों वाली, इन्द्रगुप्ता ध्रुवा भूमि पर, अक्षत अजित और अहत रहता हुआ अधिष्ठित रहूँ॥११॥

यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः।

तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः।

पर्जन्यः पिता स उ नः पिपर्तु॥१२॥

पद-पाठः यत्। ते। मध्यम्। पृथिवि। यत्। च। नभ्यम्। याः। ते। ऊर्जः। तन्वः। सम्ऽबभूवुः। तासु। नः। धेहि। आभि। नः। पवस्व। माता। भूमिः। पुत्रः। अहम्। पृथिव्याः। पर्जन्यः। पिता। सः। ऊं इति। नः। पिपर्त्तु॥१२॥

हे पृथ्वी! जो तेरा मध्यभाग है जो तेरा नाभिभाग है और तेरे शरीर से जो पुष्टिप्रद पदार्थ प्रकट होते हैं, तुम उसमें मुझको स्थापित करो, हमको पवित्र करो, भूमि माता है और मैं उसका पुत्र हूँ और पर्जन्य-मेघ-मेरा पिता है, वह हमारा पालन करे॥१२॥

यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।
यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्राः आहुत्याः पुरस्तात्।
सा नो भूमिर्वर्धयद् वर्धमाना॥१३॥

पद-पाठः यस्याम्॥ वेदिम्। परिऽगृह्णन्ति। भूम्याम्। यस्याम्। यज्ञम्। तन्वते। विश्वऽकर्माणः। यस्याम्। मीयन्ते। स्वरवः। पृथिव्याम्। ऊर्ध्वाः। शुक्राः। आऽहुत्याः। पुरस्तात्। सा। नः। भूमिः। वर्धयत्। वर्धमाना॥१३॥

जिस भूमि में वेदि को बनाते हैं और संपूर्ण प्रकार के कर्मों को करने वाले जिसमें यज्ञ को करते हैं और आहुति देने से पहले जिस भूमि पर दमकते हुए यज्ञस्तम्भ खड़े किये जाते हैं ऐसी बढ़ती हुई भूमि हमको बढ़ावे॥१३॥

यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन।
तं नो भूमे रन्धय पूर्वकृत्वरि॥१४॥

पद-पाठः यः। नः। द्वेषत्। पृथिवि। यः। पृतन्यात्। यः। अभिऽदासात्। मनसा। यः। वधेन। तम्। नः। भूमे। रन्धय। पूर्वऽकृत्वरि॥१४॥

हे पृथिवी देवि! जो हमसे द्वेष करे, जो हमारे लिये सेना को एकत्रित करे, जो मन में हमारा वध करने का विचार कर हमको क्षीण करना चाहे, हे पूर्वकृत्वरि भूमे! उसको आप हमारे लिये मार डालिये॥१४॥

त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः।
तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति॥१५॥

पद-पाठः त्वत्। जाताः। त्वयि। चरन्ति। मर्त्याः। त्वम्। बिभर्षि। द्विऽपदः। त्वम्। चतुःऽपदः। तव। इमे। पृथिवि। पञ्च। मानवाः। येभ्यः। ज्योतिः। अमृतम्। मर्त्येभ्यः। उत्ऽयन्। सूर्यः। रश्मिऽभिः। आऽतनोति॥१५॥

हे पृथ्वी देवि! आपके ऊपर उत्पन्न हुए मनुष्य आप पर ही विचरण करते हैं, तुम दो पैर वाले मनुष्य आदि का और चार पैर वाले घोड़े आदि का भरण करती हो जिनके लिये उदय होते हुए सूर्यदेव अपनी किरणों से ज्योति और आमरणसाधन पदार्थसमूहों को देते हैं वे पाँच जन भी आपके ही हैं॥१५॥

ता नः प्रजाः सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम्॥१६॥

पद-पाठः ताः। नः। प्रऽजाः। सम्। दुह्रताम्। समऽअग्राः। वाचः। मधु। पृथिवि। धेहि। मह्यम्॥१६॥

सूर्य की किरणें हमारे लिये प्रजाओं को, सब प्रकार की वाणियों को दुहें और हे पृथिवी! आप मुझको मधुमय पदार्थ दीजिये॥१६॥

विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्।
शिवां स्योनामनु चरेम विश्वहा॥१७॥

पद-पाठः विश्वऽस्वम्। मातरम्। ओषधीनाम्। ध्रुवाम्। भूमिम्॥ पृथिवीम्। धर्मणा। धृताम्। शिवाम्। स्योनाम्। अनु। चरेम। विश्वहा॥१७॥

हम विश्व की धनरूप, औषधियों की उत्पादिका, धर्म से धृत, ध्रुवा शिवा सुखदायिनी पृथ्वी पर सर्वत्र गमन करते हुए विचरण करें॥१७॥

महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे महांस्त्वेन्द्रो रक्षत्यप्रमादम्।
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन॥१८॥

पद-पाठः महत्। सधऽस्थम्। महती। बभूविथ। महान्। वेगः। एजथुः। वेपथुः। ते। महान्। त्वा। इन्द्रः। रक्षति। अप्रऽमादम्। सा। नः। भूमे। प्र। रोचय। हिरण्यस्यऽइव। सम्ऽदृशि। मा। नः। द्विक्षत। कः। चन॥१८॥

हे भूमे! तू बड़ी भारी आवासभूमि है, तेरा वेग और कम्पन महान् है, और महान् (पूजनीय) इन्द्र सावधानी से तेरी रक्षा करते हैं ऐसी हे पृथ्वी! तू हमको इस प्रकार सबका रुचिकर बना जिस प्रकार सुवर्ण सब दृष्टि में रोचक होता है, कोई हमसे द्वेष न करे॥१८॥

अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु।
अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः॥१९॥

पद-पाठः अग्निः। भूम्याम्। ओषधीषु। अग्निम्। आपः। बिभ्रति। अग्निः। अश्मऽसु। अग्निः। अन्तः। पुरुषेषु। गोषु। अश्वेषु। अग्नयः॥१९॥

(वाष्परूप) अग्नि भूमि में है, जल (बिजली के रूप में) अग्नि को धारण करता है और पत्थरों में अग्नि है, पुरुषों के भीतर (जठराग्निरूप में) अग्नि है, तथा गौ और घोड़ों के भीतर भी अग्नियां हैं॥१९॥

अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम्।
अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम्॥२०॥

पद-पाठः अग्निः। दिवः। आ। तपति। अग्नेः। देवस्य। उरु। अन्तरिक्षम्। अग्निम्। मर्तासः। इन्धते। हव्यऽवाहम्। घृतऽप्रियम्॥२०॥

अग्निदेव (सूर्य रूप में) स्वर्ग में तपते हैं, यह विशाल अन्तरिक्ष भी अग्नि देवता वाला है, मरणधर्मी प्राणी घृतप्रिय हव्यवाह अग्नि को ही प्रज्वलित किया करते हैं।।२०।।

अग्निवासाः पृथिव्य सितज्ञूः स्त्विषीमन्तं संशितं मा कृणोतु।।२१।।

पद-पाठः अग्निऽवासाः। पृथिवी। असितऽज्ञूः। त्विषिऽमन्तम्। सम्ऽशितम्। मा। कृणोतु।।

अग्नि का जिसमें वास है ऐसी असित (धूम) को जानने वाली पृथिवी मुझ को दीप्ति वाला और तीक्ष्ण करे।

भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम्।

भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः।

सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु।।२२।।

पद-पाठः भूम्याम्। देवेभ्यः।। ददति। यज्ञम्। हव्यम्। अरम्ऽकृतम्। भूम्याम्। मनुष्याः। जीवन्ति। स्वधया। अन्नेन। मर्त्याः। सा। नः। भूमिः। प्राणम्। आयुः। दधातु। जरत्ऽअष्टिम्। मा। पृथिवी। कृणोतु।।२२।।

मनुष्य भूमि पर अलंकृत यज्ञ में देवताओं के निमित्त हव्य दिया करते हैं, और भूमि में ही मरणधर्मी प्राणी अन्न और जल से जीवित रहा करते हैं, ऐसी यह भूमि हम को प्राण और आयु धारण करे और यह पृथ्वी देवी मुझको बुढ़ापे तक रहने वाला करे।।२२।।

यस्ते गन्धः पृथिवि संबभूव यं बिभ्रत्योषधयो यमापः।

यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन।।२३।।

पद-पाठः यः। ते। गन्धः। पृथिवि। सम्ऽबभूव। यम्। बिभ्रति। ओषधयः। यम्। आपः। यम्। गन्धर्वाः। अप्सरसः। च। भेजिरे। तेन। मा। सुरभिम्। कृणु। मा। नः। द्विक्षत। कः। चन।।२३।।

हे पृथिवि! जो तेरा गन्ध है, जिस गंध को औषधि और जल धारण करते हैं गंधर्व और अप्सरायें भी तेरे उसी गंध का सेवन करते हैं, उससे तूझ को सुगन्धित कर, मुझसे कोई द्वेष न करे।।२३।।

तृतीयम् घटकम्

ब्राह्मण-उपनिषत्साहित्यम्

(क-१) ऐतरेय ब्राह्मण-अध्याय ३३

शुनःशेप आख्यानम्:

इस ब्राह्मण का प्रस्तुत प्रकरण (३३/३) राजकृत्यों से सम्बद्ध राजसूय यज्ञ का अङ्ग है। तेंतीसवें अध्याय में प्रसिद्ध शुनःशेप आख्यान आता है। उसी आख्यान के प्रसङ्ग में हरिश्चन्द्र की प्रस्तुत कथा दी गई है। सायण ने इस कथा का फल बहुपुत्रलाभ बताया है। इक्ष्वाकु वंश का राजा हरिश्चन्द्र सन्तानहीन था। महर्षि नारद ने उसे पुत्र-प्राप्ति का यह उपाय बताया कि तुम राजा वरुण से प्रार्थना करो और उसे कहो कि मेरा जो पुत्र होगा, उससे मैं तुम्हारा यजन करूँगा। उसका रोहित नामक पुत्र हुआ। स्वाभाविक रूप से वरुण ने उसे पुत्र द्वारा यजन के लिये कहा। परन्तु हरिश्चन्द्र उसे यह कहकर टालता रहा कि अभी इसके दाँत निकले दो दाँत टूटने दो, फिर दाँत निकलने दो। अन्त में उसने कहा कि क्षत्रिय को पुत्र धनुष्, बाण कवच इत्यादि से युक्त होने पर ही यज्ञ-याग्य होता है। यह होने पर अर्थात् रोहित के धनुविद्या से युक्त होने पर पिता ने उसे सारी बात बताई। यह सुनकर रोहित धनुष-बाण लेकर वन में पहुँचा और एक वर्ष तक वहाँ रहा।

इधर हरिश्चन्द्र के जलोदार रोग हो गयां। वरुण द्वारा उत्पन्न किये गये इस रोग का समाचार बन में रोहित को मिला तो वह वन से गाँव की ओर चला। परन्तु इन्द्र ने उसे रोका। इस प्रकार पाँच वर्ष तक इन्द्र द्वारा रोके जाने पर छठे वर्ष वन में चलते हुए उसे अजीगर्त नामक ऋषि मिला। रोहित अवपने आपको वरुण से छुड़ाने के लिये सौ गौओं के बदले में अजीगर्त के पुत्र शुनःशेप को ले आया।

अस कथा का आशय यह प्रतीत होता है कि यदि हरिश्चन्द्र कुछ प्रयत्न करता और अकर्तण्य बैठकर वरुण को वाहानों से टालता न रहता, तो वह अवश्य ही अपने पुत्र को बचाकर भी वरुण को सन्तुष्ट कर देता। उसकी अकर्मण्यता के कारण ही

उसे भयानक जलोदर रोग हो गया। उधर अपनी रक्षा में निरत वन में सञ्चरणशील रोहित अपनी रक्षा का उपाय ढूँढने में सफल हो गया। इसीलिये बार-बार इन्द्र रोहित को उपदेश देता है—चरैवेति अर्थात् चलते ही रहो, क्योंकि इन्द्र अर्थात् ईश्वर चलने वाले अर्थात् कर्मशील व्यक्ति का मित्र है।

प्रथमः खण्डः

हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस, तस्य ह शतं जाया बभूवुस्तासु पुत्रं न लेभे, तस्य ह पर्वतनारदौ गृह ऊषतुः, स ह नारदं पप्रच्छ॥१॥

हरिश्चन्द्रो नाम राजर्षि, 'प्रस्कण्वहरिश्चन्द्रावृषी- इति पाणिनिना सूत्रितत्वात्। स च वेधसो नृपतेः पुत्रः, इक्ष्वाकुवंशोद्भवो राजा 'अपुत्रः' पुत्रहीनः 'आस'। स च शत-संख्यानां जायानां मध्ये कस्यांचिदपि जायायां पुत्रं न लेभे। तस्य राज्ञो गृहे पर्वत-नारदनामानौ यावृषी, तौ निवासं चक्रतुः। तयोर्मध्ये नारदमृषिमेतया गाथया राजा पप्रच्छ॥

हिन्दी अनुवाद : इक्ष्वाकुवंशी वेधस राजा का पुत्र हरिश्चन्द्र सन्तानहीन था। उसकी सौ रानियां होते हुए भी उनसे कोई पुत्र नहीं हुआ। (एक बार पर्वत और ऋषि ने उस राजा हरिश्चन्द्र के घर निवास किया, उन दोनों में से राजा हरिश्चन्द्र ने नारद ऋषि से एक गाथा के माध्यम से पूछा,

यं न्विमं पुत्रमिच्छन्ति, ये विजानन्ति, ये च न।
किंस्विद् पुत्रेण विन्दते, तन्म आचक्ष्व नारदेति॥२॥

'ये' देवमनुष्यादयो 'विजानन्ति' विवेकज्ञानयुक्ताः। 'ये' च पश्वादयो 'न विजानन्ति' विवेकज्ञानरहिताः। ते सर्वेऽपि 'नु' क्षिप्रं 'यमिमं' पुत्रमिच्छन्ति, तेन पुत्रेण 'किंस्विद्विन्दते' किनाम फलं पिता लभते? हे नारद! 'मे' मह्यं 'तत्' फलमाचक्ष्व 'इति' राज्ञः प्रश्नः॥

हिन्दी अनुवाद : कि : हे देवर्षि नारद! ये जो ज्ञानवान् देवता और मानव योनि के तथा विवेक ज्ञान से रहित पशु-पक्षी आदि हैं वे सब पुत्र को ही चाहते हैं अर्थात् पुत्र की ही इच्छा करते हैं। पुत्र प्राप्ति से पिता को क्या फल मिलता है? हे नारद उस फल को कहो यह राजा ने प्रश्न किया।

स एकया पृष्टो दशभिः प्रत्युवाच॥

'सः' नारदः 'एकया' गाथया पृष्टः सन् 'दशभिः' गाथाभिः प्रत्युत्तरमुक्तवान्॥

हिन्दी अनुवाद : उस नारद ऋषि ने एक गाथा से पूछे गये प्रश्न का दश

गाथाओं के द्वारा उत्तर दिया।

ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति।
पिता पृत्रस्य जातस्य, पश्येच्चेज्जीवतो मुखम्।।३।।

उत्पन्नस्य सुखेन जीवतः पुत्रस्य मुखं पिता यदि पश्येत्, तदानीम् 'अस्मिन्' पुत्रे स्वकीयमृणं लौकिकं वैदिकं च 'संनयति' सम्यगवस्थापयति। लौकिकस्यावस्थापनात् पुत्रपौत्रादिभिर्ऋणं प्रत्यर्पणीयमिति स्मृतिकारा आहुः। वैदकं तु 'त्रिभिर्ऋणवा जायते' इत्यादिश्रुत्युक्तं पूर्वमेवोदाहृतम्। तस्य च पुत्रावस्थापनं संप्रत्तिनामकेन कर्मणा संपद्यते। तच्च कर्म वाजसनेयिभिरान्नातम्–'अथातः संप्रत्तिः यदा प्रैष्यन् मन्यते, अथ पुत्रमाह, त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति। स पुत्रः प्रत्याह– अहं ब्रह्म अहं यज्ञोऽहं लोकः। 'ब्रह्म' मया कर्तव्यं वेदाध्ययनं, मयाऽनुष्ठेया यज्ञाश्च मया संपाद्या उत्तमा लोकाश्चेत्येतत्सर्वं पुत्रेण त्वयैव संपादनीयमिति पितृवाक्यस्यार्थः। सर्वमहं संपादयिष्यामीति पुत्रवाक्यस्यार्थः। अत्रापि आरण्यककाण्डे संक्षिप्य संदर्शयिष्यते–'सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते' इति। एवमृणं पुत्रे समर्पयति। तथैव 'अमृतत्वं' मरणरहितं मुक्तिपदं च गच्छति। पुत्रार्पितलौकिक-वैदकिभारस्याविध्नेन तत्त्वज्ञानसंपादनात्।।

हिन्दी अनुवाद : उत्पन्न हुए पुत्र को सुख पूर्वक जीवित पुत्र के मुख को यदि पिता देख लेता है तो वह अपने (लौकिक और वैदिक) सभी ऋणों को उसमें भली भाँति स्थापित कर देता है और पिता उऋण होकर 'अमृतत्व' अर्थात् मरण रहित मुक्ति पद को प्राप्त करता है। पुत्रार्ति लौकिक और वैदिक भार के विध्न से विभुक्त होकर तत्व ज्ञान सम्पादन से वह अमर हो जाता है। स्मृतिकारों ने भी कहा है कि मानव को अपने पुत्रा पौत्रदि पर लौकिक ऋणों को प्रत्यर्पण कर देना चाहिए (वेदाध्ययन, यज्ञसंपादन तथा और उत्तम लोकों का सम्पादन वैदिक ऋणों के अन्तर्गत आता है।

यावन्तः पृथिव्यां भोगा, यावन्तो जातवेदसि।
यावन्तो अप्सु प्राणिनां, भूयान्पुत्रे पितुस्ततः।।४।।

पृथिव्यां भोगाः सस्यनिवासादयः। 'जातवेदसि' अग्नौ भोगा दहनपचनादयः। 'अप्सु' भोगाः स्नानपानादयः। प्राणिनामेते सर्वे भोगा यावन्तः सन्ति। ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो 'भूयान्' अभ्यधिकः पितुः पुत्रे भोगो विद्यते, अत्यन्तसुखहेतुत्वात्।। तथा च आहुः–'पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयो' इति।

हिन्दी अनुवाद : इस पृथ्वी के जितने भी भोग हैं, और जितने भोग अग्नि के हैं, और जितने भोग जल से सम्बन्धित हैं, पिता के लिए इन सब भोगों से श्रेष्ठ पुत्र का भोग है। अर्थात् पृथ्वी, जाल और अग्नि के भोगों से पुत्र का भोग अत्यन्त

सुख का हेतु होने के कारण सर्वश्रेष्ठ है।

शश्वत् पुत्रेण पितरोऽत्यायन् बहुलं तमः।
आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी।।५।।

'पितरः' जनकाः, उत्पन्नेन पुत्रेण 'शश्वत्' सर्वदा लोकद्वयेऽपि 'बहुलम्' अभ्यधिकं 'तमः' ऐहिकमामुष्मिकं च दुःखम् 'अत्यायन्' अतिक्रामन्ति। तथा च बौध ायन आह–'पुदिति नरकस्याऽऽख्या, दुःखं च नरकं विदुः। पुत्तस्त्राणात्ततः पुत्रमिहेच्छन्ति परत्र च'।।"

किं च 'हि' यस्मात्कारणात् पितुः पुत्र उत्पन्न इत्युक्ते सति पिता स्वस्मात् स्वयमेव 'जज्ञे' उत्पन्न इत्युक्तं भवति। ततः पिता यथा 'स्वयं' स्वकीयं दुःखं विनाशयति, तथा पुत्रोऽप्येतद्दुःखं विनाशयतीति द्रष्टव्यम्। तस्मात् 'सः' पुत्रः 'इरावती' अन्नयुक्ता 'अतितारिणी' नदीसमुद्रादेरतितरणहेतुर्नौरिति शेषः। यथा नौर्दुर्घटं नद्यादिकं तारयति एवं पुत्रोऽप्यैहिकमामुष्मिकं च दुःखं तारयतीत्यर्थः।।

हिन्दी अनुवाद : और भी कहा है:–

पुत्रोत्पत्ति और विपत्तियों में दूसरा सुख दुःख नहीं है अर्थात् पुत्रोत्पति सुख और पुत्राविपत्ति ही दुःख है।

पिता उत्पन्न हुए पुत्र से सर्वदा दोनों लोकों में अत्यधिक अन्धकार अर्थात् ऐहिक और पारलौकिक दुःख को पार करता है।

(बौधायन ने भी कहा है कि 'पुत्' यह नरक का नाम है और दुःख को ही नरक कहा गया है। इस 'पुत्' नामक नरक से पार उतारने वाला होने के कारण ही पुत्र कहा गया है इसलिए इस लोक में सब पुत्र की ही इच्छा करते हैं) पिता अपने आप से स्वयं को ही अत्पन्न करता है। वह पुत्र इरावती, अर्थात् अन्नादि से युक्त अतितारिणी, भली प्राकर पार उतारने वाली नदी के समान है। जिस प्रकार नौका आदि नदी आदि से पार उतारती है उसी प्रकार पुत्र भी ऐहिक और आमुष्मिक दुःखों से पार उतारता है।

किं नु मलं, किमजिनं, किमु श्मश्रूणि, किं तपः।
पुत्रं ब्राह्मण इच्छध्वं, स वै लोकोऽवदावदः।।६।।

अत्र मलाजिनश्मश्रुतपाशब्दैराश्रमचतुष्टयं विवक्षितम्। मलरूपाभ्यां शुक्रशोणिताभ्यां संयोगात् 'मल' शब्देन गार्हस्थ्यं विवक्षितम्। कृष्णाजिनसंयोगादजिन- शब्देन ब्रह्मचर्यं विवक्षितम्। क्षौरकर्मराहित्याच्छ्मश्रुशब्देन वानप्रस्थ्यं विवक्षितम्। इन्द्रियनियमसद्भावात् तपःशब्देन पारिव्राज्यं विवक्षितम्। 'मलं' गार्हस्थ्यं 'किं नु' किं नाम सुखं करिष्यति?

न किंचिदित्यर्थः। एवमुत्तरत्रापि योज्यम्। हे 'ब्राह्मणः' विप्राः, विप्रक्षत्रियाद्याः सर्वे यूयं सुखहेतुत्वात् पुत्रमिच्छध्वम्। 'स वै' स एव पुत्रः 'अवदावदो लोक। वदितुमयोग्यानि निन्दावाक्यान्यवदाः तैर्वाक्यैर्नोद्यते न कथ्यत इत्यवदावदः। एवं प्रघट्टेन तेन कथ्यत इति–'अवदावदः' दोषराहित्यान्निन्दानर्ह इत्यर्थः। तादृशो 'लोकः' भोगहेतुः पुत्रः। तस्मादाश्रमेभ्योऽप्याधिक्येन पुत्रेच्छा कर्तव्या। यद्यपि हरिश्चन्द्र एवात्र प्रष्टा, तथाऽपि तेन सह ऋषीणां बहूनां सभायामवस्थानात् ब्राह्मण इति संबोधनम्।।

हिन्दी अनुवाद : चारों आश्रमों के कर्त्तव्यपालन रूप फल से भी अधिक पुत्र प्राप्ती को मानता हुआ कहता है कि, क्या 'मल' अर्थात् शुक्रशोणित आदि के संयोग के कारण गृहस्थ को मल कहा गया है, 'अजिन' भृगचन। आदि के संयोग से ब्रह्मचर्य आश्रम को कहा है, (याोपवी, दण्ड, भृगचर्म, शिखा आदि ब्रह्मचारी के चिन्ह हैं) 'शमश्रणि' से वानप्रस्थ आश्रम और 'तपः' से सन्यास आश्रम विवक्षित है। कहा है कि क्या गृहस्थ, क्या वानप्रस्थ, क्या ब्रह्मचार्य और क्या सन्यास आश्रम से सुख मिल सकता है, जो सुख प्राप्ती पुत्र प्राप्त होने के बाद है वह चारों आश्रमों के प्राप्त होने से भी नहीं प्राप्त होती अतः है ब्रह्मणो-विद्वानो पुत्र की कामना करो वही किसी प्रकार की निन्दा आदि से रहित है।

अन्नं ह प्राणः, शरणं ह वासो, रूप हिरण्यं, पशवो विवाहाः।
सखा ह जाया, कृपणं ह दुहिता, ज्योतिर्ह पुत्रः परमे व्योमन्।।७।।

अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः। तथा हि शरीरे प्राणावस्थितिहेतुत्वादन्नमेव प्राणः। वासः शीतोपद्रवाद् रक्षकत्वेन 'शरणं' गृहसमानम्। 'हिरण्यं' कर्णाभरणादिकं दृष्टिप्रियत्वाद् रूपसंपादकम्। 'पशवः' गवाश्वदयो विवाहविशेषेण निर्वाहकाः। जाया भोगे सहकारित्वात् 'सखा ह' सखिस्वरूपैव। एवमेते सुखहेतुत्वेन प्रसिद्धा अपि तात्कालिकमल्पमेव सुखं प्रयच्छन्ति। 'दुहिता ह' पुत्री इति 'कृपणं' 'केवल-दुःखकारित्वाद् दैन्यहेतुः। तथा च स्मर्यते–

"संभवे स्वजनदुःखकारिका संप्रदानसमयेऽर्थहारिका।
यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितुः।।"

'पुत्रो ह' पुत्रस्तु ज्योतिःस्वरूपं, तमोनिवारकत्वेन प्रकाशरूपत्वेन स हि पितरं 'परमे व्योमन्' उत्कृष्टे आकाशे परमब्रह्मस्वरूपेऽवस्थापयति। 'आकाशस्तल्लिङ्गात्' इत्यनने व्याससूत्रेण आकाशव्योमादिशब्दानां ब्रह्मपरत्वं निर्णीतम्। पुत्रस्य च ब्रह्मज्ञानहेतुत्वं पूर्वमेवामृतत्वं च गच्छतीप्यत्र प्रतिपादितम्।।

हिन्दी अनुवाद : अन्नादि को लोक में सुख का हेतु माना जाता है पुत्र की अन्य, सुखों के साधनों से तुलना करके श्रेष्ठ बतलाया गया है। शरीर में प्राणों की स्थिति का हेतु मानते हुए अन्न को ही प्राण कहा गया है, शीत, ग्रीष्म आदि से रक्षा करने के कारण वस्त्रों काक गृह रूप शरण माना है, और सुवर्ण को सौन्दर्य का संपादक, गौ अश्व आदि पशुओं को विवाह के समान आनन्द एवं सुख का आधार कहा है परन्तु दुहिता (पुत्री) को दु:ख प्रदान करने वाली दीनता का कारण माना है परन्तु पुत्र को अन्धकार का निवारक ज्योति के समान सुख कारी कहा है क्योंकि पुत्र ही पिता को परम व्योम में स्थापित करता है अर्थात् मुक्ति दिलाता है।

पतिर्जायां प्रविशति, गर्भो भूत्वा स मातरम्।
तस्यां नुर्नवो भूत्वा, दशमे मासि जायते॥८॥

पत्युराकारद्वयमस्ति,–वर्तमानपुरुषाकार एक:, रेतोरूपेण गर्भाकारो द्वितीय:। जायाया अप्याकारद्वयमस्ति,–पतिरूपमाकारं प्रति जाया भवति। गर्भरूपमाकारं प्रति माता भवति। अत: 'स:' तादृश: पति:, स्वयं रेतोरूपेण गर्भो भूत्वा, पूर्वमवस्थितां जायां भविष्यदाकारेण मातरं सतीं प्रविशति। 'तस्यां' मातरि 'पुनर्नवो भूत्वा' पूर्वमन्यस्यां मातर्युत्पन्नो जरठ:। इदानीं पुर्नूतनबालो भूत्वा 'तस्याम्' इदानींतन्यामस्यां मातरि गर्भपाके सति दशमे मास्युत्पद्यते। तस्मात् पुत्र: स्वस्माद् अन्यो न भवति॥

हिन्दी अनुवाद : पुत्र किस प्रकार सुख का कारक है और अधिक स्पष्ट करते हुए कहा गया है कि–पति स्त्री के दो रूपो को प्राप्त करता है–प्रथम जाया (पत्नी) के रूप में तथा दूसरा वह अपनी पत्नी में अपने रेतस अर्थात् वीर्य के रूप में उसके मातृ रूप गर्भ में प्रवेश करता है और पुन: वह दशवें महीने में अपने बालक रूप नये स्वरूप में उत्पन्न होता अत: वह पुत्र के रूप में अपने आप को ही उत्पन्न करता है।

तज्जाया जाया भवति, यदस्यां जायते पुन:।
आभूतिरेषा भूतिर्बीजमेतन्निधीयते॥९॥

'यद्' यस्मात्कारणाद् 'अस्यां' गर्भधाारिण्याम् 'अयं' पिता पुत्ररूपेण पुनर्जायते, 'तत्' तस्मात्कारणात् लोकप्रसिद्धा या जायाऽस्ति, सा जायतेऽस्यामिति व्युत्पत्या जायाशब्दवाच्या भवति। किं चैषा भूत्याभूतिशब्दाभ्यामभिधीयते। भवत्यस्यां पुत्ररूपेण पतिरित्येषा 'भूति' शब्दावाच्या, रेतोरूपेणाऽऽगत्यास्यां पुत्ररूपेण भवति 'आभूति' शब्दावाच्या। 'एतत्' एतस्यां स्त्रियां 'बीजं' रेतोरूपं 'निधीयते' प्रक्षिप्यते तस्मादुक्ता: शब्दा उपपद्यन्ते॥

हिन्दी अनुवाद : इसी को और अधिक स्पष्ट करते हुए कहा गया है कि : पिता गर्भ धारण करने वाली अपनी पत्नी के माध्यम से पुत्र रूप में पुनः उत्पन्न होता है। इस कारण स्त्री को 'जाया' कहा जाता है कि वह इसी से उत्पन्न होता इस लिए इसे जाया कहते हैं यह व्युत्पत्ति है और इसे रूप में इसमें (उत्पन्न) होता है इसलिए इसे 'भूति' और रेतस् रूप में आकर इसमें पुत्र रूप में (उत्पन्न) होता है इसलिए 'आभूति' कहा जाता है।

देवाश्चैतामृषयश्च, तेजः समभरन् महत्।
देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः॥१०॥

'एताम्' एतस्यां शोषिति देवात्र महर्षयञ्च स्वकीयं 'महत्तेजः' रेतोरूपं सारं 'समभरन्' पुत्रोत्पादनाय संपादितवन्तः। स्वयमेव संपाद्य तातो मनुष्यानित्यब्रुवन्–हे मनुष्याः। येयमिदानीं जायारूपेण वर्तते, सेयं पुनः 'वः' युष्माकं पुत्ररूपे जन्मनि जननी भवति॥

हिन्दी अनुवाद : देवताओं और महर्षियों ने इस (पत्नी) में अपने महान तेज को रेतस् (वीर्य) रूप में इस (पत्नी) में पुत्र उत्पादन के लिए संपादित किया। तब उन देवताओं और प्राचीन ऋषियों ने मनुष्यों से कहा कि हे मनुष्यों! जो यह (स्त्री) अब तुम्कहारी पत्नी के रूप में है यही तुम्हारे पुत्र को उत्पन्न करने के कारण 'जननी' कहलाएगी।

नापुत्रस्य लोकोऽस्तीति, तत्सर्वे पशवो विदुः।
तस्मान्तु पुत्रो मातरं, स्वसारं चाधिरोहति॥११॥ इति।

'लोको' लोकजन्यं सुखम्, अपुत्रस्य नास्ति। न हि पुत्रदर्शनने यत्सुखं तदन्यदर्शनने क्वचिदपि दृश्यते। 'इति' यदस्ति तत् 'सर्वे' गोमहिष्यादयो जानन्ति यस्माद्, तस्मादेव कारणात्पशुजातौ जातः 'पुत्रः' वत्सः स्वकीयां मातरं भगिनीं या पुत्रोत्पादनार्थमधिरोंति॥

हिन्दी अनुवाद : बिना पुत्र वाले को लिए लोक नहीं है अर्थात् लोक जन्य सुख, अथवा परलोक नहीं है और जो पुत्र दर्शन का सुख है वह अपुत्र कभी नहीं देखता, इस तथ्य को सभी पशु–गो, महिषि आदि भी जानते हैं इसीलिए पशुजाति में उत्पन्न हुआ पुत्र अपनी माता और बहन को भी पुत्रोत्पत्ति के लिए धारण करता है अर्थात् पुत्र प्राप्ति के लिए वह किसी मर्यादा का पालन नहीं करता सबको छोड़ देता है।

एष पन्था उरुगायः सुशेवो, यं पुत्रिण आक्रमन्ते विशोकाः।
तं पश्यन्ति पशवो वयांसि च, तस्मात्ते मात्राऽपि मिथुनीभवन्ति॥१२॥

'पुत्रिणः' पुत्रवन्तो देवमनुष्यादयो 'विशोकाः' शोकरहिताः सन्तो 'यं' पन्थानं सुखानुभवरूपं मार्गम् 'आक्रमन्ते' प्राप्नुवन्ति, 'एष पन्थाः' पुत्रसुखानुभवरूपो मार्गः 'उरुगायः', उरुभिर्महद्भिः शास्त्रज्ञै राजामात्यादिमिश्च गीयते। तथा "सुशेवः" सुष्ठु सेवितुं योग्यः सुखाधिक्यस्य विद्यमानत्वात्। 'तं' पुत्रसुखानुभवरूपं 'पशवः' गरवादयो 'वयांसि' पक्षिणः 'पश्यन्ति' जानन्ति। तस्मात् 'ते' पशुपक्ष्यादयः पुत्रसुखाय 'मात्रा' सह मिथुनी भवन्ति, किं किमुतान्यथा स्त्रिया सहेत्यर्थः॥

हिन्दी अनुवाद : पुत्र वाले (पुत्रिणः) देवता और मनुष्यादि शो-रहित होते हुए जिस सुख का अनुभव करते हैं और सुखानुभव रूप मार्ग का अनुसरण करते हैं वह महान व्यक्तियों द्वारा (श्रेष्ठ) कहा गया है तथा वह सुखाधिक्य के कारण भलि-भाँति प्राप्त करने योग्य है। इस पुत्र सुखानु भूति को पक्षी भी जानते हैं, इसीलिए वे पुत्र की कामाना करने वाले पशु-पखी आदि पुत्र सुख की कामना करते हुए अपनी माता के साथ भी मैथुन करते हैं और अपनी स्त्रियों के साथ तो करते ही हैं।

इति हास्मा आख्याय॥१३॥

हिन्दी अनुवाद : इस प्रकार अनेक रूपों में ऋषि नारद ने राजा हरिश्चन्द्र को उत्तर दिया।

'इति ह' अनेनैव प्रकारेण 'अस्मै' तस्मै हरिश्चन्द्राय 'आख्याय' उत्तरममिधाय, अवस्थित इति शेषः॥

अथ द्वितीयः खण्डः

अथैनमुवाच–वरुणं राजानमुपधाव, पुत्रो मे जायतां तेन त्वा यजा इति॥१॥

'अथ' पुत्रेच्छानिमित्तकथनानन्तरम् 'एनं' पुत्रार्थिनं हरिश्चन्द्रं नारद उवाच–हे हरिश्चन्द्र, वरुणं राजानम् 'उपधाव' प्रार्थयस्व। येन प्रकारेण प्रार्थनीयः, सोऽमिधीयते। हे वरुण त्वत्प्रसादात् मे पुत्रो जायतां, ततस्तेन पुत्रेण 'त्वां यजै' त्वामुद्दिश्य यज्ञं करवाणीति॥

हिन्दी अनुवाद : इसके बाद ऋषि नारद ने राजा हरिश्चन्द्र से कहा कि तुम पुत्र कामना पूर्ति के लिए राजा वरुण के पास जाकर प्रार्थना करा कि : हे वरुण देव तुम्हारी कृपा से मुझे पुत्र उत्पन्न हो, तब उस पुत्र के द्वारा मैं तुम्हारे निमित्त यज्ञ करूंगा।

तथेति; स वरुणं राजानमुपससार, पुत्रो मे जायतां तेन त्वा यजा इति; तथेति; तस्य ह पुत्रो जज्ञे रोहितो नाम॥२॥

नारदोपदेशमङ्गीकृत्य हरिश्चन्द्रो वरुणम् 'उपससार' प्रार्थयामास। 'स:' वरुणोऽपि तथाऽस्त्विति तदीयपुत्रोत्पत्त्यै वरं दत्तवान्। तेन च वरेणोत्पन्नस्य 'रोहित:'–इत्येतन्नामाभूत्॥

हिन्दी अनुवाद : ठीक है ऐसा ही करता हूँ (तथोति) यह कह कर वह (राजा हरिश्चन्द्र) राज वरुण के पास गया, और उससे प्रार्थना की कि मुझे पुत्र उत्पन्न हों, उससे मैं तुम्हारा यजन करूंगा। वरुण ने भी 'तथेति' अर्थात् ऐसा ही हो यह कह कर उसे पुत्र प्राप्ती का वरदान दे दिया, और उस वरदान से हरिश्चन्द्र को पुत्र उत्पन्न हुआ जिसका रोहित नाम रखा गया।

तं होवाचाजनि वै ते पुत्रो यजस्व माऽनेनेति; स होवाच, यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति, निर्दशो न्वस्त्वथ त्वा यजा इति; तथेति॥३॥

'तं' हरिश्चन्द्रं वरुण उवाच–हे हरिश्चन्द्र, ते पुत्र: 'अजनि वै' उत्पन्न एव, अनेन पुत्रेण मामुद्दिश्य यागं कुर्विति। एवं वरुणेनोक्ते हरिश्चन्द्र: पुन: प्रत्युवाच। यागार्थ: पशुर्यदा निर्दशो भवति, तदा स पशु 'मेध्य:' यागयोग्यो भवति। निर्गतान्यशौचदिनानि दशसंख्याकानि यस्मात् पशो: सोऽयं 'निर्दश:'। तस्मादयं 'नु' क्षिप्रं निर्दशोऽस्तु, 'अथ' अनन्तरं त्वा प्रति अहं 'यजै' इत्येतद्वाक्यम्। वरुण: 'तथाऽस्तु'- इत्यङ्गीचकार॥

हिन्दी अनुवाद : पुत्रोत्पत्ति के बाद वरुण ने राजा हरिश्चन्द्र से कहा कि तुम्हारा पुत्र उत्पन्न हो गया है इस पुत्र से मेरा यज्ञ करा। वरुण के यह करने पर हरिश्चन्द्र ने कहा कि हे वरुण जिस प्रकार पशु याग के लिए निर्दश अर्थात् दश दिन की आयु प्राप्त कर लेता है तभी वह मेध्य अर्थात् यज्ञ के योग्य होता है। तब तक प्रसूति काल के दश अशौच दिन भी निकल जाते हैं यह निर्दश काल व्यतीत होने पर मैं तुम्हारा इनसे यजन करूंगा। वरुण ने कहा ठीक है।

स ह निर्दश आस तं होवाच निर्दशो न्वभूद्यजस्व माऽनेनेति; स होवाच, यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति; दन्ता न्वस्य जायन्तामथ त्वा यजा इति; तथेति॥४॥

दशदिनाशौचापगमे शुद्धत्वाद् यथा यागयोग्यत्वं, तथा दन्तोत्पन्नत्वादवयवसपूर्त्या यागयोग्यत्वमित्यभिप्राय:। स्पष्टमन्यत्॥

हिन्दी अनुवाद : वह (रोहित) निर्दश हो गया अर्थात् दस दिन का हो गया तब वरुण ने कहा कि अब तो रोहित निर्दश हो गया है अत: अब इससे यज्ञ करो।

तब हरिश्चन्द्र ने कहा कि पशुओं के जब दांत निकल आते है तभी वे मेध्य होते हैं इसीलिए इसके भी दांत निकल आएं तो इससे यज्ञ करूंगा। वरुण ने कहा ठीक है।

तस्य ह दन्ता जज्ञिरे; तं होवाचाज्ञत वा अस्य दन्ता यजस्व माऽनेनेति; स होवाच, यदा वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति; दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति, तथेति॥५॥

'अज्ञत वै' जाता एव। 'पद्यन्ते' पतन्ति। प्रथमोत्पन्नानां दन्तानामस्थायित्वेन मुख्यपश्ववयवत्वाभावात् तत्पाते सति पशोर्मेध्यत्वम्॥

हिन्दी अनुवाद : उस (रोहित) के दांत निकल आए, तब वरुण ने कहा कि इसे दांत जम गये हैं, इससे मेरा यज्ञ करो। हरिश्चन्द्र ने कहा कि जब पशु के (दूध के दांत टूट जाने पर) पुनः चुगते है तभी वे मेध्य होते हैं, इसके भी दांत पुनः जम जाए तभी इससे यजन करूंगा। वरुण ने कहा ठीक है।

तस्य ह दन्ताः पेदिरे; तं होवाचापत्सत वा अस्य दन्ता, यजस्व माऽनेनेति; स होवाच, यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति; दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति, तथेति॥६॥

'अपत्सत वै' पतिताः। पुनरुत्पन्नानां दन्तानां स्थिरत्वेन संपूर्णावयवत्वात् पशोर्मेध्यत्वम्॥

हिन्दी अनुवाद : उस (रोहित) के दांत पुनः उग गये, उस (हरिश्चन्द्र को वरुण ने कहा, इसके दांत गिर गये हैं अतः अब इससे यज्ञ करो वह (हरिश्चन्द्र) बोला कि जब पशुओं के दांत पुनः उग आते हैं तभी वो मेध्य होते हैं, इस (रोहित) के भी दांत पुनः उग आएं तभी यज्ञ करूंगा। वरुण ने कहा ठीक है।

तस्य ह दन्ताः पुनर्जज्ञिरे; तं होवाचाज्ञत वा अस्य पुनर्दन्ता, यजस्व माऽनेनेति; स होवाच, यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति; सन्नाहं नु प्राप्नोत्वथ त्वा यजा इति, तथेति॥७॥

'अज्ञत वै' जाता एव। पश्वन्तरस्य पुनर्दन्तोत्पत्तिमात्रेण मेध्यत्वेऽप्यस्य पशोः क्षत्रियत्वात् स्वजात्युचितधनुर्बाणकवचादिसन्नाहशीलित्वे सति जात्युचितव्यापारसंपूर्तौ मेध्यत्वम्, तस्मात् 'नु' क्षिप्रमेवासौ सन्नाहं प्राप्नोतु, अनन्तरमेव यजा इत्युत्तरं वरुणोऽङ्गीचकार॥

हिन्दी अनुवाद : उस रोहित के दांत पुनः उग गये तब वरुण ने हरिश्चन्द्र को कहा कि अब इसके दांत पुनः उग गये हैं अब इससे मेरा यज्ञ करो। वह बोला कि–जब क्षत्रिय बालक 'सन्नाह' को प्राप्त कर लेता है तभी वह मेध्य होता है अर्थात् धनुष बाण कवच आदि धारण करने लगता है तभी वह सन्नाह को प्राप्त करके मेध्य

होता है यह रोहित सन्नाह को प्राप्त कर ले तो इससे तुम्हारा यज्ञ करूंगा। वरुण ने कहा यह ठीक है।

स ह सन्नाहं प्रापत्, तं होवाच, सन्नाहं नु प्राप्नोद्यजस्व माऽनेनेति, स तथेत्युक्त्वा पुत्रमामन्त्रयामास; ततायं वै मह्यं त्वामददाद्धन्त त्वयाऽहमिमं यजा इति॥८॥

सन्नाहप्राप्तेरूर्ध्वं 'स:' हश्चिन्द्रो वरुणोक्तिमङ्गीकृत्य पुत्रमामन्त्र्यैवमुवाच। उपलालनार्थ पुत्रे पितृवाचि ततशब्दप्रयोग:। हे 'तत' हे पुत्र! 'अयम्' एव वरुणो मह्यं 'त्वां' पुत्रवरेण दत्तवान् 'हन्त' दुष्टोऽहम् 'इमं' वरुणं यत् त्वया पुत्रेण 'यजै' यागरूपां पूजां करवाणीति हरिश्चन्द्रस्योक्ति:॥

हिन्दी अनुवाद : वह (रोहित) सन्नाह को प्राप्त कर गया अर्थात् धनुविद्या में निपुण हो गया, तब वरुण ने हरिश्चन्द्र से कहा कि यह अब सन्नाह को प्राप्त कर चुका है अब इससे मेरा यज्ञ करो। उस राजा हरिश्चन्द्र ने तब अपने पुत्र रोहित को बुलाकर वरुण के कथन के अनुसार उसे कहा–"हे पुत्र इस वरुण ने ही तुम्हे मुझे पुत्र के वरदान रूप में प्रदान किया था, अत: मै दस वरुण कि लिए तुम्हारा यजन करूंगा।"

स ह नेत्युक्त्वा धनुरादायारण्यमुपातस्थयौ; स संवत्सरमरण्ये चचार।

'स ह' स खलु रोहिताख्य: पुत्र: पितुर्वाक्यं निषिध्य, स्वरक्षणार्थ धनु: स्वीकृत्यारण्यं प्रत्युपगतोऽमूत्। कस्मिश्चिदरण्ये नैरन्तर्येण 'स:' रोहित: संवत्सरं चचार॥

हिन्दी अनुवाद : वह रोहित पिता के वचन सुनकर उसे यजन करने की कह कर, अपने पिता के वचन को मना करता हुआ अपना धनुष लेकर जंगल में चला गया। वह एक वर्ष तक अपना बचाव करता हुआ अथवा अपनी मुक्ति का उपाय ढूंढता हुआ वन में विचारण करता रहा।

अथ तृतीय: खण्ड:

अथ हैक्ष्वाकं वरुणो जग्राह, तस्य होदरं जज्ञे तदु ह रोहित: शुश्राव सोऽरण्याद ग्राममेयाय, तमिन्द्र: पुरुषरूपेण पर्येत्योवाच–

नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम!
पापो नृषद्वरो जन, इन्द्र इच्चरत: सखा, चरैवेति॥१॥

'अथ' रोहितस्यारण्ये संवत्सरवासानन्तरमेव 'ऐक्ष्वाकम्' इक्ष्वाकुवंशोत्पन्न हरिश्चन्द्रं 'वरुण:' देवो रोगरूपेण जग्राह। वरुणेन गृहीतस्य हरिश्चन्द्रस्य 'उदरं जज्ञे' जलेन

पूरितमुच्छूनं महोदरनामकं रोगस्वरूपमुत्पन्नम्। 'तदु ह' तदपि सर्वमरण्ये स्थितो 'रोहितः' पुत्रो मनुष्यमुखाच्छुश्राव। श्रुत्वा च 'सः' रोहितः पितरं द्रष्टुमरण्याद् ग्रामं प्रत्याजगाम। आगच्छन्तं रोहितं मार्गमध्य इन्द्रः केनचिद्ब्राह्मणपुरुषरूपेण प्राप्येदमुक्तवान्-आ समन्ताच्छ्रान्तः, आश्रान्तः, सर्वत्र पर्यटनेन श्रान्तिं प्राप्त, तद्विपरीतोऽनाश्रान्त एकगैव निवास शीलः तादृशाम् तथाविधस्य श्रीः' बहुविधा संपन्नास्ति। यद्वा, नानेति पदच्छेदः। 'श्रान्ताय' सर्वत्र पर्यटनेन श्रान्तस्य 'नाना श्रीः' बहुविधा संपदस्ति 'इति' अनेन प्रकरेण रोहित! वयं नीतिकुशलानां पुरुषाणां मुख्याच्छुश्रुम। 'वरोजनः' विद्यादिभिः श्रेष्ठोऽपि पुरुषो 'नृषत्पापः' नृषु मनुष्येषु सीदतीति 'नृषत्'। श्रेष्ठोऽपि बन्धुगृहेषु सर्वदाऽवस्थित-स्तैरवज्ञातः 'पापः' तुच्छो भवेत्। अतस्तव पितृगृहे वासो न युक्तः। न चारण्ये चरतो मम सहायो नास्तीति शङ्कनीयम्। 'इन्द्र एव' परमेश्वर एव 'चरतः' तव सखा भविष्यति। तस्मात् 'चरैव' सर्वथाऽरण्ये चरस्वेत्येवमुवाच। एवं बहुष्वपि पर्यायेषु द्रष्टव्यम्।

हिन्दी अनुवाद : फिर इक्ष्वाकु वंशोत्पन्न (राजा हरिश्चन्द्र) को वरुण ने (रोग के रूप में) पकड़ लिया। उसका पेट उत्पन्न हो गया अर्थात् जलोदर-रोग के कारण पेट में पानी भरने से फूल गया। (वन में) रोहित ने वह (समाचार) सुना। वह वन सें गाँव को आया। (मार्ग में) इन्द्र ने पुरुष रूप में आकर उसे कहा-

अनथके व्यक्ति के लिये लक्ष्मी नहीं होती हे रोहित! ऐसा हमने सुना हुआ है। पापी, जनता में दुखी, श्रेष्ठ जन जो भी है इन्द्र बस चलने वालों का सखा होता है, चलते ही रहो॥

जो व्यक्ति कार्य करता-करता थक न जाये, वह सुख का अधिकारी नहीं होता। बहुत स्पष्ट रूप से इन शब्दों में श्रम की महिमा बताई गई है। चाहे व्यक्ति जन्म तथा वंश से कितना ही श्रेष्ठ क्यों न हो, यदि वह अकर्मण्य रहता है तो सामान्य जन में उसका सम्मान नहीं होता, वह दुःखी ही नहीं होता, अपितु अकर्मण्यता के कारण उसका शरीर भी क्षीण होता रहता है। वही मानो पापी है। इन्द्र अर्थात् परमेश्वर चलने वाले अर्थात् कार्यशील व्यक्ति का सखा, सहानुभूति रखने वाला मित्र होता है। जो व्यक्ति स्वयं कार्य नहीं करता, ईश्वर भी उसकी सहायता नहीं करता। तु० फारसी-हिम्मते मर्दां मददे खुदा, अंगेजी-गॉड हैल्प्स दोज हू दैमसैल्व्ज।

जज्ञे-√जन् लिट् प्र० पु० एक०, सा०, जलेन पूरितमुच्छूनं महोदर-नामक रोगस्वरूपमुत्पन्नम्। हॉग-ही वॉज एटैक्ड बाई ड्रॉप्सी।

नानाश्रान्ताय-सा० आ समन्तात् श्रान्त आश्रान्तः सर्वत्र पर्यअनेन शान्ति प्राप्तस्तद्विपरीतोऽनाश्रान्त एकत्रैव निवासशीलस्तादृशाय तथाविधस्य पुरुषस्य श्रीर्बहुविधा सम्पन्नास्ति। यद्वा नानेति पदच्छेदः। श्रान्ताय सर्वत्र पर्यटनेने श्रान्तस्य नाना श्रीर्बहुविधा।

सम्पदस्ति। हॉग–यात्रा न करने वाले को कोई सुख नहीं मिलता (देअर इज नो हैप्पिनैस फ़ॉर हिम हू इज नॉट ट्रैवल)।

नृषद्–सा०–नृषु सीदतीति नृषत्, श्रेष्ठोऽपि बन्धगृहेषु सर्वदावस्थितस्तैरवज्ञातः पापस्तुच्छो भवेत, अतस्तव पितृगृहे वासो न युक्तः। हॉग–मनुष्य-समाज में रहने वाला (लिविंग इन दि सोसाइटी ऑफ मॅन)। पा. धातुपाठ में षद्लृ (सद्) का अर्थ विशरण, गति, अवसादन (नाश) दिया है। परन्तु मैक्डॉनल ने इसका अर्थ 'बैठना' दिया है। (दे० वे० ग्रा० स्टू०, पृ० ४२६)

इन्द्रः– सा०-परमेश्वरः, हॉग-इन्द्र।

चरैवेति वै मा ब्राह्मणोऽवोचदिति ह द्वितीयं संवत्सरमरण्ये चचार; सोऽरण्याद् ग्राममेयाय; तमिन्द्रः पुरुषरूपमेण पर्येत्योवाच–

पुष्पिण्यौ चरतो जङ्घे, भूष्णुरात्मा फलग्रहिः।
शेरेऽस्य सर्वे पाप्मानः, श्रमेण प्रपथे हतश्चरैवेति॥२॥

ब्राह्मणरूपस्येन्द्रस्य वाक्यं श्रुत्वा ब्राह्मणोऽयमरण्ये चरैवेत्येवं मामुक्तवानिति मनसि ब्राह्मणवाक्ये महान्तमादरं कृत्वा पुनरप्येकं संवत्सरमरण्ये चरित्वा पश्चात् पितरं द्रष्टुं तमागच्छन्तं पुनरपीन्द्रो ब्राह्मणरूपेणाऽऽगत्यैवमुवाच। 'चरतः' पर्यटनं कुर्वतः पुरुषस्य 'जङ्घे' 'पुष्पिण्यौ' भवतः। यथा पुष्पयुक्तो वृक्षः शाखा लता वाऽथवा सुगन्धोपेता सेव्या भवति। एवं चरतो जङ्घे श्रमजयेन सेव्ये भवतः। तथैव 'आत्मा' मध्यदेहो 'भूष्णुः' वर्धिष्णुः 'फलग्रहिः' आरोग्यरूपफलयुक्तो भवति। यथा वर्धमानो वृक्षः कालेन फलानि गृहणति, एवं चरतः पुरुषः पुरुषस्य बीजादिदीपनादिपाटवेन मध्यदेह आरोग्यरूपं फलं गृहणति। तथैव 'अस्य' चरत; पुरुषस्य 'सर्वे पाप्मानः' सर्वपापानि 'प्रपथे' प्रकृष्टे तीर्थक्षेत्रादिमार्गे 'श्रमेण' तत्तद्देवतादिदर्शने तीर्थयात्रादिप्रयासेन 'हताः' विनाशिताः सन्तः 'शेरे' शेरते, शयाना इव भवन्ति। यथा शयानाः पुरुषाः स्वकार्य कृषिवाणिज्यादिकं कर्तुमशक्ताः, एवं पुण्येन विनष्टाः पाप्मानो नरकं दातुमसमर्था इत्यर्थः। तस्मात् सर्वेथाऽरण्ये चर, न पितुर्गृहेऽवतिष्ठस्व॥

हिन्दी अनुवाद : "निश्चय ही मुझे ब्रह्मण ने कहा है कि चलते ही रहो" यह सोचकर (रोहित) दूसरे वर्ष वन में चलता रहा। वह (फिर) वन से गाँव को आया। (मार्ग में) इन्द्र ने पुरुष के रूप में आकर उसको कहा–

चलने वाले की पिंडलियाँ पुष्प-प्रफुल्लित होती हैं। और वर्धमान आत्मा फल धारण करने वाला होता है। इसके सब पापकर्म (भी) सोये रहते है और जैसे श्रम से (वे सब) पथ में नष्ट हो गये हो अतः चलते ही रहो।

जो व्यक्ति चलता रहता है, कार्यशील रहता है, उसका स्वास्थ्य समृद्ध रहता है। और जिसका स्वास्थ्य समृद्ध हो वह निरन्तर वर्धमान तथा अभीष्ट-प्राप्ति या लक्ष्यप्राप्ति में समर्थ होता है। ऐसे व्यक्ति को किसी पापकर्म के विषय में सोचने का भी अवकाश नहीं होता। तु० अंग्रेजी-एन एम्प्टी माइंड इज ए डेविल्ज वकशॉप।

अवोचत्–√ ब्रू लुङ् प्र० पु० एक०।

पुष्पिण्यो–सा०-यथा पुष्पयुक्तों वृक्षः शाखा लता वाऽथवा सुगन्धोपेता सेव्या भवत्येवं चरतो जङ्घे श्रमजयेन सेव्ये भवतः। हॉग-पर्यटन करने वाले के पाँव पुष्पसदृश्य होते हैं (द फ़ीट ऑफ़ द वाँडरर आर लाइक द फ्लॉवर)

भूष्णुः–सा०, हॉग-वर्धिष्णुः (ग्रोइंग)।

आत्मा–सा०-मध्यदेहः, हॉग-सोल।

फलग्रहिः–सा०-आरोग्यरूपफलयुक्तो भवति। यथा वर्धमानो वृक्षः कालेन फलानि गृह्णात्येवं चरतः पुरुषस्य बीजादिदीपनादिपाटवेन मध्यदेह आरोग्यरूपं फलं गृह्णाजि। हॉ-फल पकाने वाली (रीपिंग् दि फ्रूट)

प्रपथे–सा०-प्रकृष्टे तीर्थक्षेत्रादिमार्गे श्रमेण तत्तद्देवतादिदर्शने तीर्थयात्रादि-प्रयासेन विनाशिताः। हॉग-घूमने में (इन् वाँडरिंग)।

शेरे–√ शी लट् प्र० पु० बहु०, शेरते के स्थान पर वैदिक रूप। यहाँ 'लोपस्त आत्मनेपदेषु' (पा० ७/१/४१) के अनुसार तकारलोप हुआ है। सा०-शयाना इव भवन्ति। यथा शयानाः पुरुषाः स्वकार्य कृषिवाणिज्यादिकं कर्तुमशक्ता एवं पुण्येन विनष्टाः पाप्मानो नरकं दातुमसमर्था इत्यर्थः। हॉग ने इसका अर्थ नहीं दिया प्रतीत होता (ऑल हिज सिन्ज आर डेस्ट्रॉय्ड)।

चरैवेति वै मा ब्राह्मणोऽवोचदिति ह तृतीयं संवत्सरमरण्ये चचार; सोऽरण्याद् ग्राममेयाय तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–

आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।
शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति॥३॥

'भग' सौभाग्यम् 'आसीनस्य' उपविष्टस्य 'आस्ते' तथैव तिष्ठति, न तु वर्धते। अभिवृद्धिहेतोरुद्योगस्याभावात्। 'तिष्ठतः' उपवेशनं परित्यज्योत्थापनं कुर्वतः पुरुषस्य भगः 'ऊर्ध्वः' अभिवृद्धेरुन्मुखस्तिष्ठति। कृषिवााणिज्याद्युद्योगस्य संभावि- तत्वात्। 'निपद्यमानस्य' भूमौ शयानस्य भगः 'शेते' निद्रां करोति, विद्यमानधन- रक्षादिचिन्ताया अप्यभावात् सर्वथैव विनश्यति। 'चरतः' तेषु तेषु देशेष्वर्जनाय पर्यटनं कुर्वतः पुरुषस्य 'भगः' सौभाग्यं 'चराति' दिने दिने वर्धते। तस्मात्त्वं चरैवेति, न त्वेकत्र तिष्ठ॥

हिन्दी अनुवाद : "निश्चय ही मुझे ब्रह्मण ने कहा है कि चलते ही रहो" यह सोचकर तीसरे वर्ष वन में चलता रहा। वह (फिर) वन से गाँव को आया। (मार्ग में) इन्द्र ने पुरुष के रूप में आकर उसको कहा-

बैठने वाले का भाग्य भी बैठा रहता है, और उठे हुए का भाग्य खड़ा रहता है। सोने वाले का (सदैव) सोया रहता है चलने वाले का भाग्य (यहाँ पर), चलता है अतः चलते ही रहो।

मनुष्य का भग्य उसके अपने हाथ में है। जैसा और जितना कार्य मनुष्य करता है, वैसा ही उसका भाग्य होता है। जो मनुष्य अकर्मण्य आलस्य में सोया रहता है, उसका भाग्य भी मानो सोता है। परन्तु कार्यशील व्यक्ति का भाग्य उसे उचित फल देने को तत्पर रहता है। तु०-जो जागत है सो पावत है, जो सावेत है सो खोवत है।

आस्ते-सा०-सौभाग्यं तथैव तिष्ठति, न तु वर्धते, अभिवृद्धिहेतोरुद्योगस्याभावात्।

तिष्ठति-सा० :अभिवृद्धंरुन्मुखस्तिष्ठति, कृषिवाणिज्याद्युद्योस्य सम्भा-विततत्वात्।

शेते-सा०-निद्रां करोति, विद्यमानधनरक्षादिचिन्ताया अप्यभावात् सर्वथैव विनश्यति।

चरतः-सा०-तेषु-तेषु देशेष्वर्जनार्थ पर्यटनं कुर्वतः पुरुषस्य।

चराति-√ चर् लट् प्र० पु० एक० चरति का वैदिक रूप। सा०-दिने दिने वर्धते।

चरैवेति वै मा ब्राह्मणोऽवोचदिति ह चतुर्थं संवत्सरमरण्ये चचार; सोऽरण्याद् ग्राममेयाय तमिन्द्रः पुरुषरूपेण पर्येत्योवाच-

कलिः शयानो भवति, संजिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति, कृतं संपद्यते चरंश्चरैवेति।।४।।

चतस्रः पुरुषस्यावस्थाः। निद्रा, तत्परित्यागः, उत्थानं, संचरणं चेति। ताश्चोत्त-- रोत्तरश्रेष्ठत्वात् कलि-द्वापर-त्रेता,कृतयुगैः समानाः। ततश्च सञ्चरणस्य सर्वोत्तमत्वाच्चरैवेति।

हिन्दी अनुवाद : "निश्चय ही मुझे ब्रह्मण ने कहा है कि चलते ही रहो" यह सोचकर चौथे वर्ष वन में चलता रहा। वह (फिर) वन से गाँव को आया। (मार्ग में) इन्द्र ने पुरुष के रूप में आकर उसको कहा-

कलियुग सोता हुआ होता है (और) निद्रात्याग करो तो पर द्वापर (हो जाता है)। उठता हुआ (मनुष्य) त्रेता होता है और चलता हुआ (निरन्तर) कृतयुग बन जाता है अतः चलते ही रहो।।

चारों युगों को मनुष्य की विभिन्न अवस्थाओं के परिणाम के प्रतीकरूप में प्रस्तुत किया गया है। जो मनुष्य सोया रहता है, वह कलियुग जैसा फल प्राप्त करता

है जिसमें दु:ख और कष्ट तथा पारस्परिक कलह अधिक है। आलस्य, असन्तोष अशान्ति इस युग की प्रमुख विशेषता है। परन्तु जो मनुष्य निद्रात्याग करके उठने को तैयार होता है अर्थात् कार्य में प्रवृत्त होने का विचार करता है उसे द्वापर जैसा फल प्राप्त होता है। द्वापर का अन्त महाभारत में हुआ था। महाभारत में उसका चित्र अंकित है। उससे पता चलता है कि यद्यपि दूषित प्रवृत्तियाँ प्रबल हैं, किन्तु अन्ततोगत्वा बहुत कुछ नाश होकर भी धर्म की विजय होती है। त्रेता का प्रतीक रामायण है। उठता हुआ अर्थात् कार्य में प्रवृत्ति आरम्भ करने वाला परन्तु पूर्ण न करने वाला भी न करने वाले से अच्छा है। वह त्रेता जैसा फल प्राप्त करता है। उसमें परस्पर स्नेह, धार्मिक भावना प्रबल होती है यद्यपि रावण वहाँ भी है। परन्तु चलने वाला तो कृतयुग का ही फल प्राप्त कर लेता है। कृतयुग पूर्ण शान्ति का सर्वोत्कृष्ट युग है इसमें पूर्ण धर्म का प्रचार होता है। सब जन अपना-अपना कार्य करके ईश्वर पर पूर्ण विश्वास करते हुए केवल अपने कर्म के फल की आकांक्षा करते हैं। किसी अन्य के धनादि की कामना नहीं करते।

सा०–चतस्त्र: पुरुषस्यावस्था:। निद्रा तत्परित्याग उत्थानं सञ्चाणं चेति।

ताश्चोत्तरोत्तरज्ञेष्ठत्वात् कलिद्वापरत्रेताकृतयुगै: सामना:। ततश्चरणस्य सर्वोत्तमत्वाच्चरैपेति।।

चरैवेति वै मा ब्राह्मणोऽवोचदिति ह पञ्चमं संवत्सरमरण्ये चचार; सोऽरण्याद् ग्राममेयाय, तमिन्द्र: पुरुषरूपेण पर्येत्योवाच–

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति।।५।।

'चरन्' एव पुरुष: क्वचिद्वृक्षाग्रे 'मधु' माक्षिकं लभते। 'क्वचित् 'स्वादु' मधुरमुदुम्बरादिफलविशेषं लभते। एतदुभयमुपलक्षणम्। तत्र विद्यमानं भोगविशेषं लभते। तत्र सूर्यो दृष्टान्त:। 'य:' सूर्य: सर्वत्र चरन्नपि 'न नन्द्रयते' कदाचिदप्यलसो न भवति। तस्य सूर्यस्य 'श्रेमाणं' श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य। तस्माच्चरैव।।

हिन्दी अनुवाद : "निश्चय ही मुझे ब्रह्मण ने कहा है कि चलते ही रहो" यह सोचकर पाँचवे वर्ष वन में चलता रहा। वह (फिर) वन से गाँव को आया। (मार्ग में) इन्द्र ने पुरुष के रूप में आकर उसको कहा–

चलता हुआ पुरुष निश्चय ही मधु पाता है, और चलता हुआ स्वादु उदुत्बर फल को पा जाता है, तुम सूरज की शोभा अतुलित आभा है, जो कभी भी आलस्य नहीं करता अत: चलते रहो।

मधु जीवन के माधुर्य, सुख का प्रतीक है। अन्यथा भी मधु का हमरी संस्कृति में विशेष महत्त्व है। अतिथिसत्कार की शास्त्रोक्त विधि में मधुमिश्रित 'मधुपर्क' को प्रमुख स्थान प्राप्त है। स्वास्थ्य की दृष्टि से भी मधु का महत्त्व कम नहीं। सम्भवतया इसीलिये नवजात शिशु को मधु चटाया जाज है। कार्यनिरत व्यक्ति ही मधु तथा तज्जन्य फल प्राप्त कर सकता है। उदुम्बर अर्थात् अंजीर का भी वेद में पर्याप्त यशोगान है। इसकी लकड़ी पवित्र मानी जाती थी और यज्ञ की समिधाओं के लिये उसका प्रचुर प्रयोग होता था। यहाँ यह सामान्य फल मात्र का प्रतीक है। मन्त्र के उत्तरार्ध में सतत् गतिशील सूर्य की उपमा देकर चलते रहने या कार्यशील रहने की उपयोगिता स्पष्ट की गई है। गतिशील सूर्य अनादि काल से इसी प्रकार देदीप्यमान है, उसमें कभी आलस्य नहीं आता। इसी प्रकार यदि कोई व्यक्ति तेजोमय और स्फूर्ति से युक्त जीवन चाहता है तो उसे निरन्तर गतिशील रतना चाहिये, निरन्तर क्रियाशील रहना चाहिये।

सा०–चरन्नेव पुरुषः क्वचिद् वृक्षाग्रे मधु माक्षिकं लभते। क्वचित् स्वादु मधु रमुदुम्बरादिफलविशेषं लभते। एतदुभयमुपलक्षणम्। तत्र-तत्र विद्यमानं भोगविशेषं लभते।

तत्र सूर्यो दृष्टान्तः। यः सूर्यं सर्वत्र चरन्नपि न तन्द्रयते कदाचिसदप्यलसो न भवति तस्य सूर्यस्य श्रेमाणं जगद्वन्द्यत्वं (हॉग–सौन्दर्य, शोभा–व्यूटी) पश्य। तस्माच्चरैव।

चरैवेति वै मा ब्राह्मणोऽवोचदिति ह षष्ठं संवत्सरमरण्ये चचार; सोऽजीगर्तं सौयवसिमृषिमशनया परीतमरण्य उपेयाय॥६॥

षशठे संवत्सरे पूर्ववदरण्यसंचारी 'स ह' रोहितः कंचिदृषिं तस्मिन्नरण्ये 'उपेयाय' प्राप्तवान्। कीदृशमृषिम्? अजीगर्तनामकं सूयवसस्य पुत्रम्, 'अशनया परीतम्' अन्नालाभेन क्षुत्पीडितम्॥

हिन्दी अनुवाद : "मुझे ब्रह्मण ने कहा कि चलते ही रहो" यह विचार करके वह छठे वर्ष फिर वन में विचरण करता रहा, तब उसने सुयवस के पुत्र अजीगर्त नामक ऋषि से अन्न के अभाव में भूख से पीड़ित पाया॥६॥

तस्य ह त्रयः पुत्रा आसुः, शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति; तं होवाच, ऋषेऽहं ते शतं ददाम्यहमेषामेकेनाऽऽत्मानं निष्क्रीणा इति; स ज्येष्ठं पुत्रं निगृह्णान उवाच, नन्विममिति; नो एवेममिति कनिष्ठं माता; तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे, तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय॥७॥

'तस्य' अजीगर्तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसु। 'तं' पुत्रवन्तमृषिं रोहितः उवाच– हे ऋषे, 'ते' तुभ्यमहं गवां शतं ददामि। (दत्त्वा चाहमेषां पुत्राणां मध्य एकेन केनचित्पुत्रेणाऽऽत्मानं मद्देहं वरुणान्निष्क्रीणै मूल्यं दत्त्वाऽऽत्मानं मोचयामीति।

एवमुक्तः सोऽजीगर्तो 'ज्येष्ठपुत्रं' शुनःपुच्छनामकं हस्तेन 'निगृह्णानः' स्वसमीपे समाकर्षन् रोहितं प्रत्येवमुवाच–तुभ्यमेकः पुत्रो दीयते, 'इमं नु' शुनःपुच्छं तु 'न' ददामि, मम प्रियत्वादीति। ततो माता कनिष्ठं हस्तेनं गृहीत्वैवमुवाच– 'इमं' शुनोलाङ्गूलं तु मम प्रियं 'नो एव' सर्वथा न ददामीति। ततः तौ उभौ मातापितरौ 'मध्यमे' पुत्रे शुनःशेपे दानं 'संपादयांचक्रतुः' अङ्गीकृतवन्तौ। ततः तस्य अजीगर्तस्य 'सः' रोहितो गवां शतं दत्त्वा 'तं' शुनःशेपम् आदायावस्थिता। ततः 'सः' रोहितः तेन शुनःशेपेन सहारण्यात् स्वकीयँ ग्रामं प्रत्याजगाम।।

हिन्दी अनुवाद : उस ऋषि के शुनःपुच्छ, शुनःशेप और शुनो लाङ्गुल नामक तीन पुत्र थे। रोहित ने उस ऋषि को कहा कि हे ऋषि मैं तुम्हे सौ गाय दूँगा और बदले में तुम मुढे अपने पुत्रों में एक पुत्र को दे दो, उसने अपने जेष्ठ पुत्र शुन॑पुच्छ को हाथ से पकड़ कर कहा कि मै अपने ज्येष्ठ पुत्र शुन॑पुच्छ को नहीं दूगां, यह मेरा प्रिय है, इसी प्रकार ऋषि पत्नी ने शुनः लाङ्गुल को पकड़ कर कहा कि यह मेरा कनिष्ठ पुत्र मुझे सबसे प्रिय है मैं इसे नहीं दूंगी। इस प्रकार ऋषि अजीगर्त ने अपने मध्यम पुत्र ?: शुन॑शेप को १०० गौओं के बदले में देने का वचन कर लिया। रोहित शुनःशेप के बदले में सौ गौवें देकर शुनःशेप को लेकर अरण्य से अपने गाँव की ओर आ गया।।७।।

स पितरमेत्योवाच,–तत हन्ताहमनेनाऽऽत्मानं निष्क्रकीणा इति; स वरुणं राजानमुपससारानेन त्वा यजा इति; तथेति, भूयान् वै ब्राह्मणः क्षत्त्रियादिति वरुण उवाच; तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच, तमेतमभिषेचनीये पुरुषं पशुमालेभे।।८।।

'सः' रोहितः पितरमागत्यैवमुवाच। हे 'तत' पितः' 'हन्त' आवयोर्हर्षः संपन्नः। अहम् 'अनने' शुनःशेपरूपेण मूल्येन 'आत्मानं' मद्देहं वरुणात् 'निष्क्रीणै' मूल्यं दत्त्वाऽऽत्मानं मोचयामीत्यर्थः। तथोक्ते 'सः' हरिश्चन्द्रो वरुणमुपेत्य 'अनने' शुनःशेपेन ब्राह्मणेन 'त्वा' त्वां यक्ष्यामीत्युक्तवान्। 'सः' वरुणोऽपि तथेत्यङ्गीकृत्यैवमुवाच– 'क्षत्त्रियात्' तव पुत्राद् रोहितादप्ययं ब्राह्मणो 'भूयान्' अभ्यधिक एव, मम प्रियः, इति उक्त्वा 'तस्मै' हरिश्चन्द्राय कर्तव्यत्वेन राजसूयमुपदिदेश च। 'सः' हरिश्चन्द्रो राजसूयं प्रक्रम्य तस्य मध्ये योऽयमभिषेचनीयाख्यः एकाहः सोमयागः, तस्मिन् 'तमेतं' शुनःशेषं परुषं पशुम् 'आलेभे' सवनीयपशुत्वेनाऽऽलब्धुं निश्चितवान्।।

हिन्दी अनुवाद : घर आकर रोहित ने पिता से कहा कि हे तात! प्रसन्नता की बात है कि मैने वरुण यज्ञ के लिए अपने बदले में इसे खरीद लिया है (आप

इससे वरुण का यजन करें) तब वह हरिश्चन्द्र अजिगर्त को लेकर वरुण के पास गया और बोला कि हे वरुण इसके द्वारा मैं तुम्हारा यजन करूँगा। वरुण ने कहा कि ठीक हैं, तुम्हारे क्षत्रिय पुत्र से मुझे यह ब्राह्मण पुत्र ज्यादा प्रिय है। तब वरुण ने राजा हरिश्चन्द्र से रासूय यज्ञ करने को कहा और उस यज्ञ में हरिश्चन्द्र ने यज्ञीय पशु के रूप में शुनःशेप को आलम्भन के लिए निश्चय किया।।८।।

अथ चतुर्थः खण्डः

तस्य ह विश्वामित्रो होताऽऽसीज्जमदग्निरध्वर्युर्वसिष्ठो बह्माऽयास्य उद्गाता; तस्मा उपाकृताय नियोक्तारं न विवदुः; स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति; तस्मा अपरं शतं ददुस्तं स निनियोज।।

विश्वमित्रादयो महर्षयः 'तस्य' हरिश्चन्द्रस्य यागे राजसूये, होत्रादयश्चत्वारो महर्त्विज आसन्। तत्र जमदग्निरध्वर्युरभिषेचनीये सोमयागे 'तं' शुनःशेपं सवनीय-पशुत्वेनोपाकृतवान्। बर्हिर्युक्तया प्लक्षशाखया मन्त्रपुरःसरं समुपस्पृश्य स्वीकारः 'उपाकरणम्'। तत ऊर्ध्वं यूपबन्धनं 'नियोजनं' तस्य क्रूरकर्मत्वादर्ध्युन नियोजने प्रवृत्तः। ततः 'उपकृताय तस्मै' उपाकरणेन संस्कृतस्य शुनःशेपस्य 'नियोक्तारं' यूपे बन्धनकर्तारं क्रूरं कंचिदपि पुरुषं 'न विविदुः' न लेभिरे। तदानीं सूयवसस्य पुत्रः, शुनःशेपस्य पिता 'सः' 'अर्जागर्तः' (उवाच) मह्यं पूर्वस्माच्छताद् 'अपर' गोशतं हे यजमानर्त्विजः, दत्त, ततोऽहम् 'एनं' शुनःशेपं यूपे 'नियोक्ष्यामि' रशनया कट्यां शिरसि पादयोर्बद्ध्वा रशानाग्रस्य यूपे बन्धनं 'नियोजनं' तदहं करिष्यामीति। 'तस्मै' अजीगर्तायापरं गोशतं ददुः। 'तं' च शुनःशेपं 'सः' अजीगर्तो 'निनियोज'। धातोर्द्विर्भावं परित्यज्योपसर्गस्य द्विर्भावश्छान्दसः।।

तस्मा उपकृताय नियुक्तायाऽऽप्रीताय पर्यग्निकृताय विशसितारं विविदुः; स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताहमेनं विशसिष्यामीति; तस्मा अपरं शतं ददुः; सोऽसिं निःशान एयाय।।

उपाकरणनियोजने पूर्वमुक्ते। आप्रीसंज्ञिताभिरेकादशभिः प्रयाज-याज्याभिर्यद् यजनं तद् 'आप्रीणनम्' दर्भरूपेणोल्मुकेन त्रिःप्रदक्षिणीकररणं तत् 'पर्यग्निकरणम्' तथाविधसंस्कार-चतुष्टययुक्ताय 'तस्मै' तस्य शुनःशेपस्य 'विशसितारं' हिंसितारं पुरुषं क्रूरात्मानं कंचिदपि पुरुषं न लेभिरे। ततोऽजीगर्तः पूर्ववदपरं गोशतं गृहीत्वा मारयितुम् 'असिं' खड्गं 'निःशानः' निशितं तीक्ष्णं कुर्वन्नेव 'एयाय' जगाम।।

अथ ह शुनःशेप ईक्षांचक्रेऽमानुषमिव वै मा विशसिष्यन्ति, हन्ताहं देवता उपधावामीति स प्रजापतिमेव प्रथमं देवतानामुपससार, कस्य नूनं कतमस्यामृतानामित्येतयर्चा।। इति।।

'अथ' पितुः पुत्रमारणोद्योगानन्तरं 'शुनःशेपः' पुत्रो मनस्येवं 'ईक्षांचक्रे' विचारितवान्। 'अन्यत्र पर्यग्निकृतं पुरुषमारण्यांश्चोत्सृजन्त्यहिंसायै' इतिश्रुतेः पर्यग्निकरणादूर्ध्वं मनुष्यं परित्यजन्ति। एते तु 'मा' माम् 'अमानुषमिव' मनुष्य- व्यतिरिक्तमजादिपशुमिव 'विशसिष्यन्ति' मारयिष्यन्ति। 'हन्त' हा कष्टमेतत्संपन्नम्। अहमितःपरं रक्षार्थ देवताः 'उपधावामि' भजामि 'इति' एतद् विचार्य देवानां मध्ये 'प्रथमं' मुख्यं प्रजापतिमेव 'कस्यनूनम्-इत्यृच 'उपससार' सेवितवान्।।

तं प्रापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा।। इति।

'तं' सेवकं शुनःशेपं प्रजापतिरेवमुक्तवान्। अग्निः सर्वेषां देवानां 'नेदिष्ठः' हविर्वहनेनातिसमीपवर्ती। अतस्तमेवोपास्स्वेत्युक्तः 'सः' शुनःशेपः 'अग्नेर्वयम्'-इत्यृचाऽग्निमुपासितवान्।।

तमग्निरुवाच, सविता वै प्रसवानामीशे तमेवोपधावेति; स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेन।।

'प्रसवानां' सर्वेषु कार्येषु प्रेरणारूपाणामनुज्ञानात् सविता 'ईशे' स्वामी भवति। तस्मात्तमेवोपधावेत्यग्निनोपदिष्टः 'अभित्वा' इति तृचेन सवितारमुपासितवान्।।

तं सवितोवाच, वरुणाय वै राज्ञे नियुक्तोऽसि, तमेवोपधावेति; स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशता।।

हे शुनःशेप वरुणार्थ त्वं यूपे बद्धोऽसि, अतो वरुणमुपास्स्वेति सवित्रोक्तः पूर्वस्मात् सवितृविषयात् तृचाद् उत्तराभिरेकत्रिंशत् संख्याकाभिर्ऋग्भिर्वरुणमुपासितवान्। 'नहि ते क्षत्रम्' इत्याद्याः सूक्तशेषभूता दशर्चो 'यच्चिद्धि ते विशः' इत्यादिकमेवविंशत्यृचं सूक्तम् इत्येवमेकत्रिशत् संख्या द्रष्टव्या।।

तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति; सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या।।

अयमग्निः सर्वेषां देवानां 'मुखं' मुखस्थानीयः। अग्निद्वारेणैव सर्वेर्देवैर्हविः स्वीकारात्। अत एव प्रीत्या हविर्वहनादतिशयेन सुहृदयः। 'सुहृदयतम्' 'तम्' अग्निं 'नु' क्षिप्रं स्तुहीति वरुणेनोक्तः पूर्वोक्ताभ्य ऋग्भ्य उत्तराभिर्द्वाविंशति- संख्याकाभि- र्ऋग्भिरग्निं तुष्टाव। 'वसिष्वा हि'-इत्यादिकं दशर्चं सूक्तम्, 'अश्वं न त्वा' इत्यादिकं त्रयोदशर्चं सूक्तम्। तत्रान्त्यां परित्यज्य वसिष्व- सूक्तद्वयगता ऋचो द्वाविंशतिसंख्याकाः।।

तमग्निरुवाच, विश्वान्नु देवान् स्तुह्यथ त्वात्स्रक्ष्याम इति; स विश्वान् देवांस्तुष्टाव, नामो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा।।

यद्यपि वरुणपाशेन बद्धत्वाद् वरुण एव शुनःशेपमुत्स्रष्टुं समर्थः तथाऽप्यग्न्यादीनां सहकारित्ववचनं दार्ढ्यार्थं द्रष्टव्यम्। विश्वे देवा गणरूपा न भवन्ति किंतु सर्वे देवास्तान् 'नमो महद्भ्यः' इत्येतयर्चा उपासितवान्।।

तं विश्वे देवा ऊचुरिन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति; स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः।।

ओजोबलादिशब्दाः पूर्वाचार्यैरेवं व्याख्याताः-

''ओजो दीप्तिर्बलं दाक्ष्यं प्रसह्यकरणं सहः।

सुजनः सन्पारयिष्णुरुपक्रान्तसमाप्तिकृत।।''

इष्ठप्रत्यय-तमप्प्रत्ययाभ्यां तत्र तत्रातिशय उच्यते। तादृशमिन्द्रं 'यच्चिद्धि सत्य सोमपाः' इत्यनेन सप्तर्चेन सूक्तेन उत्तरस्मिन्नपि 'आ व इन्द्रम्' इत्यादिके द्वाविंशत्यृचे सूक्ते[3] पश्चदशभिर्ऋग्भिश्च तुष्टाव।।

तस्मा इन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ, तमेतया प्रतीयाय शश्वदिन्द्र इति।।

शुनःशेपेनेन्द्रः स्तूयमानः प्रीतो भूत्वा 'तस्मै' शुनःशेपाय सुवर्णमयं दिव्यं रथमारोहणार्थं स्वकीयेन मनसैव ददौ। शुनःशेपोऽपि तदीयमनुग्रहमवगत्य पूर्वोक्ताभ्यः पञ्चदशभ्य 'उत्तरया' 'शश्वदिन्द्रः' इत्येतयर्चा 'तं' रथं 'प्रतीयाय' मनसैव प्रतिजगाम।।

तमिन्द्र उवाचाश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति; सोऽश्विनौ तुष्टावात उत्तरेण तृचेन।।

पूर्वोक्तायाः शश्वदिन्द्र इत्यस्याः 'उत्तरेण' 'आश्विनावश्वावत्या' इति तृचेन अश्विनौ स्तुतवान्।।

तमश्विना ऊचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति; स उषसं तुष्टावात उत्तरेण तृचेन।। इति।

'कस्त उषः' इत्यादिक उत्तरस्तृचः।।

तस्य ह स्मर्च्युच्युक्तायां वि पाशो मुमुचे, कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेववर्च्युक्तायां वि पाशो मुमुचेऽगद ऐक्ष्वाक आस।।१६।।

'तस्य' पूर्वोक्तस्य तृचस्य सम्बन्धिन्याम् 'ऋचि-ऋचि' एकैकस्या- मृच्युक्तायां क्रमेण शुनःशेपस्य पाशो 'विमुमुचे' विशेषण मुक्तोऽभूत्। ऐक्ष्वाकस्य हरिश्चन्द्रस्य यन्महोदरं, तदापि क्रमेण 'कनीयः' अत्यल्पं भवति। उत्तमस्या- मृच्युक्तायां पाशो विमुमुचे, एवं सर्वात्मना मुक्तोऽभूत्। ऐक्ष्वाकोऽपि 'अगदः' निःशेषेण रोगरहित आस।।

अथ पञ्चमः खण्डः

तमृत्विज ऊचुस्त्वमेव नोऽस्याह्नः संस्थामधिगच्छेत्यथ हैतं शुनःशेपोऽञ्जः- सवं ददर्श तमेताभिश्चतसृभिरभिसुषाव, 'यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलशमभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चाऽथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः स स्वाहाकारभिर्जुहवांचकाराथैन-मवभृथमभ्यवनिनाय, 'त्वं नो अग्ने वरुणस्य विद्वानित्येताभ्यामथैनमत ऊर्ध्वमग्निमाहवनीयमुपस्था पयांचकार', 'शुनश्चिच्छेपं निदितं सहस्त्रादिति।।

देवतानुग्रहयुक्तं 'तं' शुनःशेपं विश्वामित्रादयः सर्वे 'ऋत्विजः' एवमुचुः-हे शुनःशेप, त्वमेव 'न' अस्माकम् 'अस्याह्नः' अभिषेचनीयाख्यस्य 'संस्थां' समाप्तिम् अधिगच्छ' प्राप्नुहि, अनुष्ठापयेत्यर्थः। तैरेवमुक्ते सत्यनन्तर शुनःशेप 'एतम्' अभिषेचनीयाख्यं सोमयागम् 'अञ्जःसवं' ददर्श। 'अञ्जसा' ऋजुमार्गेण 'सवः' सोमाभिषवो यस्मिन् यागे सोऽञ्जःसवः, तादृशं प्रयोगप्रकारं निश्चितवान्। निश्चित्य च 'तं' सोमं 'यच्चिद्धि' इत्यादिभिश्चतसृभिर्ऋग्भिः अभिषुतं कृतवान्। अथ 'एनम्' अभिषुतं सोमम् 'एतया' 'उच्छिष्टं चम्वोः' इत्यृचा द्रोणकलशमभिलक्ष्य 'अवनिनाय' द्रोणकलशे प्रक्षिप्तवान्। 'अथ' अनन्तरम् 'अस्मिन्' हरिश्चन्द्रे 'अन्वारब्धे' शुनःशेपदेहमुपस्पृष्टवति, सत्युक्ताभ्य ऋग्भ्यः 'पूर्वाभिः' 'पूर्वाभिः' यत्र ग्रावेत्यादिभिश्चतसृभिर्ऋग्भिः स्वाहाकारसहिताभिः सोमं जुहवांचकार। यत्र ग्रावेत्यादिकं सूक्तं नवर्चं; तत्र यच्चिद्धीति पञ्चमी, तामारभ्य चतसृभिऋग्भिरभिषवः। उच्छिष्टमित्यादिका नवमी, तया द्रोणकलशे प्रक्षेपः। यत्र ग्रावेत्यादिभिश्चतसृभिर्होमः, इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः। 'अथ' होमानन्तरमेव कर्तव्यमवभृथमभिलक्ष्य 'अवनिनाय' सर्वमवभृथसाधनं तद्देशे नीत्वा 'त्वं नो अग्ने', इत्यादिकाभ्याम् ऋग्भ्यामवभृथयार्गं कृतवान्। 'अथ' तथा कृत्वा, तत ऊर्ध्वम् 'एनम्' आहवनीयमग्निं 'शुनश्चित्' इत्यादिना 'उपस्थापयांचकार' हरिश्चन्द्रमुपस्थाने प्रेरयामास। सोऽयमञ्जःसवः, इष्टिपशुसांकर्यमन्तरेण 'अञ्जसा' ऋजुमार्गेणानुष्ठितत्वात्।।

अथ ह शुनःशेपो विश्वामित्रयाङ्क्मासससाद; स होवाचाजीगर्तः सौयवसिर्ऋषे पुर्मे पुत्रं देहीति; नेति होवाच विश्वामित्रो, देवा वा इमं मह्यमरासतेति, स ह देवरातो वैश्वामित्र आस, तस्यैते कापिलेय बाभ्रवाः।।

'अथ' अभिषेचनीयसमाप्तेरनन्तरं हरिश्चन्द्रसहितेष्वृत्विक्षु विस्मितेषु, स शुनःशेप इत ऊर्ध्व कस्य पुत्रोऽस्त्विति विचारे सति तदीयेच्छैव नियामिकेति महर्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्वमङ्गीकृत्य सहसा तदीयमङ्कमासससाद। पुत्रो हि सर्वत्रे पितुरङ्के निषीदति। तदानीं सूयवसपुत्रोऽजीगर्तो विश्वामित्रं प्रत्येवमुवाच। हे महर्षे,

मदीयपुत्रमेनं पुनरपि मह्यं देहीति स विश्वामित्रो नेति निराकृत्यैवमुवाच। प्रजापत्यादयो 'देवा:' एव 'इमं' शुन:शेपं मह्यम् 'अरासत' दत्तवन्त:, तस्मात् तुभ्यं न दास्यामीति। 'स:' च शुन:शेपो देवैर्दत्तत्वाद् 'देवरात:'- इतिनामधारी विश्वामित्रपुत्र एवाऽऽस। 'तस्य' च देवरातस्य 'एते' कपिलगोत्रोत्पन्ना: बभ्रुगोत्रोत्पनाश्च बन्धवोऽभवन्।।

स होवाचाजीगर्त: सौयवसिस्त्वं वेहि विह्वयावहा स होवाचाजीगर्त: सौयवसि:-

आङ्गिरसो जन्मनाऽस्याजीगर्ति: श्रुत: कवि:।
ऋषे पैतामहात्तन्तोर्माऽपगा: पुनरेहि मामिति;

स होवाच शुन:शेप:-

अदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत।
गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिर:।।

विश्वामित्रेण निराकृत: सोऽजीगर्त: शुन:शेपं प्रत्येवमुवाच-हे पुत्र, त्वं वा' त्वमेव विश्वामित्रादपगत: सन् 'एहि' अस्मद् 'गृहे गच्छ। त्वदीयमाता चाहं चोभावावां 'विह्वयावहै' विशेषण तवाऽऽह्वानं करवाव है। इत्युक्त्वा तूष्णीमवस्थितं तं शुन:शेपं प्रति पुनरपि कयाचिद् गाथयैवमुवाच-हे शुन:शेप 'त्वं' जन्मना 'आङ्गिरस:' अङ्गिरोगोत्रोत्पन्न: 'आजीगर्ति:' अजीगर्तस्य पुत्र:, 'कवि:' विद्वान्, 'श्रुत:' इत्येवं सर्वत्र प्रसिद्ध:। अतो 'ऋषे' हे महर्षे शुन:शेप 'पैतामहात्त' त्तपितामहेन प्रजापतिना संपादितात् 'तन्तो:' संतानादङ्गिरोर्वंशान् 'माऽपगा:' अपगतो मा भव। तस्मात्पुनरपि 'मामेहि' मद्गृहे समागच्छेत्युक्त: शुन:शेप: स्वयमपि गाथया प्रत्युत्तरं ददौ। शासो विशसनहेतु: खड्ग:। हेऽजीगर्त मद्वधाय 'शासहस्तं' न लब्धवन्तो लौकिका जना: तादृशं क्रौर्यं त्वया कृतम्। हे 'अङ्गिरसगोत्रोत्पन्नाजीगर्त 'मत्' मां निमित्तीकृत्य त्वं गवां शतानि त्रीणि 'अवृणीथा:' वृतवानसि। तदिदमत्यन्तकष्टम् 'इति' उक्तवान्।।

स होवाचाजीगर्त: सौयवसि:-

तद्वैमा तात तपति, पापं कर्म मया कृतम्।
तदहं निह्नुवे तुभ्यं प्रतियन्तु शता गवामिति।।

स होवाच शुन:शेप:-

य: सकृत्पापके कुर्यात् कुर्यादेनत्तत्तोऽपरम्।
नापागा: शौद्रान्न्यायादसंधेयं त्वया कृतमिति।।

शुन:शेपेनोपालब्धोऽजीगर्त: स्वकीयमनुतापं दर्शयितुं कांचिद्गाथामेवमुवाच-हे

तात पितृवदुपलालनीय शुनःशेप 'मया यत्पापं कृतं' 'तद्वै मा तपति' तदेव मां मनसि संतप्तं करोति। 'अहं' तत्पापं 'निह्नुवे' परिहरामि। गवां शतानि पूर्व मया गृहीतानि त्रीणि यानि तानि तुभ्यं त्वदर्थं 'प्रतियन्तु' प्रत्येकमेव प्राप्नुवन्तु। इतरयो पुत्रयोर्गावो मा भूवंस्तवैव सर्वाः सन्तिवति। ततः स शुनःशेपो गाथया प्रत्युत्तरं ददौ। 'यः' पुमान् धर्मशास्त्रभीतिरहितः 'सकृत्पापकं कुर्यात्' स पुमांस्ततः पापादन्यद् 'एनत्' पापं तदभ्यासवशात् कुर्यादेव। त्वं तु 'शौद्रान्न्यायात्' नीचजातिसंबन्धिनः क्रूरादाचरणात् 'नापागाः' अपगतो न भवसि। 'असंधेयं' प्रतिसंधानरहितं पापं त्वया कृतमित्येषा शुनःशेपस्य प्रत्युक्तिः॥

असंधेयमिति ह विश्वामित्र उपपपाद; स होवाच विश्वामित्रः-

भीम एव सौयवसिः शासेन विशिशासिषुः।
अस्थान्मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रतामिति॥

'असंधेयम्' प्रतिसमाधेयं पापमिति शुनःशेपेन यदीरितं तदेतदप्रतिसमाधेयत्वं विश्वामित्र 'उपपपाद' युक्तिभिरुपपादितवान्। तदुपपादनार्थमेव विश्वामित्र इमां गाथा-मुवाच-सूयवसस्य पुत्रोऽजीगर्तो भीम एव भयहेतुरेव सञ्शासेन हस्तगतखड्गेन स विशिशासिषुरस्थाद् विशसनकर्तुमिच्छुरवस्थितवान्। अतो हे शुनःशेपैतस्य पापिष्ठस्य पुत्रो मा भूः किंतु ममैव पुत्रतामुपेहि॥

स होवाच शुनःशेपः-

स वै यथा नो ज्ञपयाऽऽराजपुत्र तथा वद।
यथैवाऽऽङ्गिरसः सन्नपेयां तव पुत्रतामिति॥

स होवाच विश्वामित्रः-

ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात्।
उपेया दैवं मे दायं तेन वै त्वोपमन्त्रये; इति॥ इति।

विश्वामित्रेणैवं बोधितः शुनःशेपः पुनरपि गाथया विश्वामित्रं प्रत्येवमुवाच अयं विश्वामित्रो जन्मना क्षत्रियः सन् स्वकीयेन तपोमहिम्ना ब्राह्मण्यं प्राप्तवानित्येवं तद्वृत्तान्तं सूचयितुं हे राजपुत्रेति संबोधितवान्। 'स वै' तथाविधो राजजातीय एव सन् 'यथा' येन प्रकारेण 'नः' अस्माभिः सर्वैरा समन्ताज्ज्ञपय ब्राह्मणत्वेन ज्ञायसे तथैवास्मद्विषयेऽपि त्वं वद। कथं वदितव्यमिति? तदुच्यते-अहमिदानीमङ्गिरोगोत्रः संस्तत्परित्यागेन तव पुत्रत्वं येनैव प्रकारेणोपेयां तथैवानुगृहाणेति शेषः। एतद्वाक्याभिप्रायः पूर्वैः संक्षिप्य दर्शितः–

'पुराऽऽत्मानं नृपं विप्रं तपसा कृतवानसि।
एवमाङ्गिरसं मा त्वं वैश्वामित्रमृषे कुरु॥'' इति।

ततो विश्वामित्रो गाथया प्रत्युत्तरमुक्तवान्। हे शुनःशेप त्वं मे पुत्राणां मध्ये ज्येष्ठः स्या ज्येष्ठो भव। तव पुत्रादिरूपा प्रजाऽपीतरस्याः श्रेष्ठा स्यात्। 'में' मह्यं विश्वामित्राय 'देवं' देवैः प्रसन्नैर्दत्तं 'दायं' पुत्रत्वरूपं लाभम् 'उपेयाः' प्राप्नुहि। तेन वै तेनैव प्रकारेण 'त्वोपमन्त्रये' त्वां पुत्रत्वेन व्यवहरामि।।

से होवाच शुनःशेपः-

संसनानेषु वै बूयात् सौहार्द्याय मे श्रियै।
यथाऽहं भरतऋषभोपेयां तव पुत्रतामिति।।

अथ ह विश्वामित्रः पुत्रानामन्त्रयामास–

मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः।
ये के च भ्रातरः सथ नास्मै ज्यैष्ठ्याय कल्पध्वमिति।।

विश्वामित्रेण प्रलोभितः शुन शेपः स्वकार्यदार्द्यार्थ गाथयैवमुवाच। संज्ञानानेषु मद्विषयैकमत्यं प्राप्तेषु त्वदीयपुत्रेषु सर्वोऽपि मां ब्रूयात्। ज्येष्ठभ्रातृत्वेन व्यवहरतु। तच्च मे मम सौहार्द्याय भ्रातृभिरितरैः स्नेहातिशयाय श्रियै धनलाभाय च संपद्यते। हे भतऋषम भरतवंशश्रंष्ठ विश्वामित्राहं तव पुत्रतां यथोपेयां तथैवैतेषां पुत्राणमग्रेऽनुगृहाणेति शेषः। तारे विश्वामित्र इतरान् पुत्रानाहूय गाथयैवमाज्ञा- पितवान्–यो मधुच्छन्दा नाम यश्चर्षभः, योऽपि रेणुः, योऽप्यष्टकः, एते मुख्याः हे पुत्रकाः 'शृणोतन' मदीयामाज्ञां शृणुत। 'ये' केचिद्यूयं सर्वे भ्रातरः स्थ ते सर्वेऽपि 'अस्मै' शुनःशेपादस्मादपि 'ज्येष्ठ्याय न कल्पध्वं' ज्येष्ठत्वाभिमानं मा कुरुत। किंत्वसावेव युष्माकं मध्ये ज्येष्ठो भूत्वाऽवतिष्ठतामिति।।

अथ षष्ठः खण्डः

तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः।।

मधुच्छन्दोनामकः कश्चित्पुत्रो मध्यमस्ततोऽपि ज्येष्ठः कनिष्ठश्च प्रत्येकं पञ्चशतसंख्याका इत्येवमेकशतं तस्य पुत्राः।।

तद्ये ज्यायांसो न ते कुशलं मेनिरे तानन्‌ व्याजहारान्तान् वः प्रजा भक्षीष्टेति त एतेऽन्ध्राः पुण्ड्राः शबरा पुलिन्दा मूतिबा इत्युदन्त्या बहवो वैश्वामित्रा दस्यूनां भूयिष्ठाः।। इति।।

'तत्' तेष्वेकशतसंख्याकेषु पुत्रेषु मध्ये 'ये' मधुच्छन्दसो ज्येष्ठाः पञ्चाशत्संख्याकाः सन्ति 'ते' शुनःशेपस्य विश्वामित्रपुत्रत्वं 'कुशलं न मेनिरे' इदं समीचीनमित्येवं

नाङ्गीकृतवन्तः। ताञ्ज्येष्ठान् पञ्चाशत्संख्याकाननुलक्ष्य विश्वामित्रो व्याजहार व्याहरणं शापरूपं वाक्यमुक्तवान्। हे ज्येष्ठपुत्रा युष्माकं मदीयाज्ञातिलङ्घिनां प्रजाः पुत्रादिका अन्तान्भक्षीष्ट चण्डालादिरूपान्नी- चजातिविशेषान् भजतामिति। त एते शष्ठाः सन्तोऽन्ध्रत्वादिपञ्चविधनीचजातिविशेषा भवन्ति। 'इति' शब्दस्य तत्प्रदर्शनार्थत्वादन्येऽपि नीचजाति-विशेषाः सर्वे विवक्षिताः। उद्गतोऽन्त उदन्तोऽत्यन्तनीचजातिस्तत्र भवाः 'उदन्त्याः'। ते बहवोऽनेकविधा वैश्वामित्रा विश्वामित्रसंततिजा दस्यूनां तस्कराणां मध्ये भूयिष्ठा अत्यधिकाः।।

स होवाच मधुच्छन्दाः पञ्चाशता सार्धं-

अन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम्।
पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसीति।।

कनिष्ठपुत्राणां पञ्चाशता सह मधुच्छन्दोनामकः स मध्यमः पुत्रः शुनःशेपं प्रत्येवमुवाच। हे शुनःशेप 'नः' अस्माकं पिता विश्वामित्रो यत्कार्यं त्वदीयज्येष्ठपुत्रत्वरूपं संजानीते सम्यग्जानात्यङ्गीकरोति तस्मिन् कार्ये वयं तिष्ठामहे तत्कार्यमङ्गीकुर्मः। सर्वे वयं 'त्वा' शुनःशेपनामानं त्वां 'पुरस्कुर्महे' पुरस्कृत्य ज्येष्ठं कृत्वा वर्तामहे। 'त्वामन्वञ्चः' शुनःशेपमनुगच्छन्तः 'स्मसि' भवाम इत्युक्तवान्।।

अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव।।

अथ मधुच्छन्दःसहितानां पश्चाशत्कनिष्ठपुत्राणां शुनःशेपविषयज्येष्ठपुत्रत्वाङ्गीका- रानन्तरं स विश्वामित्रः 'प्रतीतः' तेषु प्रत्ययं मदनुकूला इति विश्वासं प्राप्तः प्रीत्या 'पुत्रान्' गाथाभिस्तुष्टाव।।

ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ।
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा।।

हे मधुच्छन्दः प्रमुखाः कनिष्ठपुत्रा 'ये' यूयं 'मे मानं' मदीयं मतम् 'अनुगह्णन्तः' आनुकूल्येन स्वीकुर्वन्तो 'मां' कनिष्ठपुत्रा 'ये' यूयं 'मे मानं' मदीयं मतम् 'अनुगृह्णन्तः' आनुकूल्येन स्वीकुर्वन्तो 'मां' विश्वामित्रं 'वीरवन्तं' स्वधर्मशूरपुत्रयुक्तम् 'अकर्तं' कृतवन्तः। 'ते वै' तादृशा यूयं बहुविधपशुयुक्ता बहुविधानुकूलपुत्रयुक्ताश्च भविष्यथ।।

पुर एत्रा वीरवन्तो देवरातेन गाथिनाः।
सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनम्।।

गाथिनशब्दो विश्वामित्रस्य पितरमाचष्टे। हे 'गाथिनाः' गाथिपौत्राः 'पुर एत्रा' युष्माकं पुरतो गन्त्रा मुख्येन देवरातेन सह यूयं सर्वे 'वीरवन्तः' श्रेष्ठपुत्रयुक्ताः 'राध्याः'

'स्थ' सर्वे: पुरुषैराराधनीया: पूज्या भवथ। हे 'पुत्रा:' मधुच्छन्द:प्रभृतय:। 'एष:' देवरातो 'व:' युष्माकं सद्विवाचनं 'सन्मार्गस्य विशेषतोऽध्यापनं करष्यितीति शेष:।।

एष व: कुशिका वीरो देवरातस्तमन्वित।
युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि।।

हे कुशिका: कुशिकनाम्नो मत्पितामहस्य सम्बन्धिनो मधुच्छन्द: प्रभृतय एष देवरातो वो युष्माकं ज्येष्ठभ्रातेति शेष:। तं देवरातं यूयमन्वितानुगता भवथ। मे मदीयं 'दायं' धनं युष्मांश्चोपेता प्राप्स्यति। चकाराद्देवरातं च। यामु च यामपि कांचिद् वेदशास्त्रादिरूपां 'विद्यां विद्मसि' वयं जानीम:, साऽपि युष्मानुपेता प्राप्स्यति।।

ते सम्यञ्चो वैश्वामित्रा: सर्वे साकं सरातय:।
देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिना:।।

हे वैश्वामित्रा विश्वामित्रस्य मम पुत्रा ये गाथिना गाथिपौत्रास्ते युयं सर्वेऽपि सम्यञ्च: समीचीनबुद्धयो ये साकं देवरातेन सार्धं सरातयो रातिर्धनसंपत्तिस्तया युक्ता: सन्तो 'देवराताय' मदीयश्रेष्ठपुत्रस्य देवरातस्य 'धृत्यै' धारणं युष्मत्पोषणं 'श्रैष्ठ्याय' युष्माकं मध्ये श्रेष्ठत्वं च तस्थिरेऽङ्गीकृतवन्त:।।

अधीयत देवरातो रिक्थयोरुभयोर्ऋषि:।
जह्नूनां चाऽऽधिपत्ये दैवे वेदे च गाथिनाम्।।

इक्स्मरण इति धातु:। अधीयत स्मृतिकारैर्महर्षिभि: स्मर्यते। कथमिति तदुच्यते। अयं देवरातो द्व्यामुष्यायणत्वादुभयोरजीगर्तविश्वामित्रयो: सम्बनिधनी ये रिक्थे धने त्रयोर्ऋषिर्द्रष्टा तदुभयमर्हतीत्यर्थ:। अजीगर्तस्य कूटस्थ ऋषिर्जह्नुसंज्ञकस्तस्य वंशे जाता: सर्वे जह्नवस्तेषां चाऽऽधिपत्ये स्वामित्वे देवरातो योग्य:। तथा दैवे देवसम्बन्धिनि यागादिकर्मणि वेदे च मन्त्ररूपे समर्थ:। गाथिनामस्मत्पितृवंशोत्पन्नानां च सर्वेषामाधिपत्ये योग्य:।।

तदेतत्परऋक्शतगाथं शौन:शेपमाख्यानम्।।

'कस्य नूनं'... निधारयेत्यन्ता: सप्ताधिकनवतिसंख्याका ऋच:, 'त्वं न:' 'स त्वम्' इत्यादिकास्तिस्र ऋच:, एवमृचां शतम्। 'पर:' शब्दोऽधिकवाची। पूर्वोक्तादृक्शतात् परोऽधिका एकत्रिंशत्संख्याका 'यं न्विमम्'-इत्याद्या गाथा: यस्मिन्नाख्याने तदेतत् 'परऋक्शतगाथम्'। शुन:शेपेन दृष्टा: सप्ताधिकनवतिसंख्यायुक्ता ऋचो या: सन्ति, अन्येन दृष्टास्तिस्र ऋचो या: सन्ति, ब्राह्मणे प्रोक्ता एकत्रिंशदगाथाविशेषा या सन्ति, तै: सर्वैरुपेतं 'हरिश्चन्द्रो ह वैधस:' इत्यादिकं सर्वं शुन:शेपविषयमाख्यानम्।।

तद्धोता राज्ञेऽभिषिक्तायाऽऽचष्टे॥

राजसूयक्रतावभिषेचनीयाख्ये कर्मणि यदा राजाभिषिक्तो भवति, तदानीं तस्मै 'राज्ञे' 'तत्' आख्यानं होता कथयेत्॥

हिरण्यकशिपावासीन आचष्टे; हिरण्यकशिपावासीनः प्रतिगृणाति। यशो वै हिरण्यं, यशसैवैनं तत्समर्धयति॥

होता यदोपाख्यानं कथयति, तदानीं 'हिरण्यकशिपौ' सुवर्णनिर्मितसूत्रै- निष्पादिते कशिपौ स होतोपविशेत्। तदाख्यानमध्येऽध्वर्युश्च हिरण्यकशिपावासीनो वक्ष्यमाणं 'प्रतिगरं' ब्रूयात्। हिरण्यस्य यशोहेतुत्वात् यशस्त्वम्। तथा सति 'एनं' राजानं यशसैव समृद्धं करोति॥

ओमित्यृचः प्रतिगर; एवं तथेति गाथायाः; ओमिति वै दैवं, तथेति मानुषं, चैवेनं तन्मानुषेण च पापादेनसः प्रमुञ्चति॥

होत्रा प्रयुक्ताया एकैकस्या ऋचोऽन्तेऽध्वर्योरोमित्येतादृशः प्रतिगरो भवति। ओमित्येतच्छन्दोरूपं 'दैवं' देवैरङ्गीकारार्थे प्रयुज्यते। तत्तथेत्यन्तं (तथेति) मानुषं मनुष्या अङ्गीकारे तथेतिशब्दं प्रयुञ्जते 'तत्' तेन प्रतिगरेण दैवेन 'मानुषेण वाध्यवर्युः 'एनं' अङ्गीकारे तथेतिशब्दं प्रयुञ्जते। 'तत्' तेन प्रतिगरेण दैवेन मानुषेण वाध्यवर्युः 'एनं' राजानं 'पापात्' ऐहिकादपकीर्तिरूपात्, 'एनसः' नरकहेतोश्च 'प्रमुञ्चति' प्रमुक्तं करोति॥

तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापतेयैवैतच्छौनः शेपमाख्यानं, न हास्मिन्नल्पं चनैनः परिशिष्यते॥

यस्मादुपाख्यानं पापप्रशमनहेतुः 'तस्माद्' अयजमानोऽपि राजसूयक्रतु- रहितोऽपि 'राजा विजिती' यदि विजयोपेतः स्यात्, तदानीमेतच्छौनःशेपमाख्यानम् 'आख्यापयेत्' तस्य राज्ञो यः कश्चिद्ब्राह्मण उपाख्यानं ब्रूयात्। तथा सति 'तस्मिन्' राजनि 'अल्पं चन' किंचिदपि 'एनः' पापं 'न ह वै परिशिष्यते' सर्व पापं नश्यतीत्यर्थः॥

सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्र एते चैवाऽऽसने श्वेतश्चाश्वतरीरथो होतुः॥

योऽयमाख्याता होता, तस्मै क्रत्वर्थदक्षिणामन्तरेणोपाख्यानप्रयुक्तां दक्षिणां गोसहस्ररूपां दद्यात्। 'प्रतिगरित्रे' अध्वर्यवे गोशतं दद्यात्। ये हिरण्यकशिपुरूपे द्वे 'आसने' स्तः, एते अपि ताभ्यामेव दद्यात्। अश्वतरोभ्यां संकीर्णज्ञातियुक्ताभ्याम- धिकशक्तिभ्यां युक्तो रथः 'अश्वतरीरथः'। स च रजतेनालंकृतत्वाच्छ्वेतः। सोऽपि तादृशो होतुर्देयः॥

पुत्रकामाः हाप्याख्यापयेरल्लँभन्ते ह पुत्राल्लँभन्ते ह पुत्रान् ॥१८॥

ये पुत्रकामाः सन्ति, ते 'ह' प्रसिद्धमेतदुपाख्यानम् 'आख्यापयेरन्' ब्राह्मण- मुखाच्छृणुयुरित्यर्थः। ते पुत्राल्लँभन्ते। अभ्यासोऽध्यायसमाप्त्यर्थः॥

(क-२) शतपथब्राह्मणम्

काण्ड १, प्रपाठक ४, ब्राह्मण ५, (७ से १२)

वैदिक ऋचाओं के आविर्भाव के सहस्रों वर्षों के अनन्तर, ईश्वर, ईश्वरीय सृष्टि, ईश्वरीय ज्ञान और ईश्वरीय व्यवस्था को समझने के लिए आर्यावर्त्त देश के आर्यमनीषियों ने वैदिक वाङ्मय का सृजन आरम्भ किया। यह वाङ्मय आज भी हमारी परम्परा की अमूल्य धरोहर है। सम्भवतया वैदिक वाङ्मय की ऐतिहासिक परम्परा में वेदांगों की रचना सबसे प्राचीन हो। मनुष्य ने परम्परा से ऋचाओं का उच्चारण सीखा हो, और बाद में उसे इस बात का पता चला हो कि वाक् और श्रोत्र के माध्यम से जिस ज्ञान का आदान-प्रदान हो रहा है, वह कुछ मूल ध्वनियों की संहति है जो हमारे वाकयन्त्र से स्थान-स्थान से, और विशेष प्रयत्नों से प्रसूत होती है। यह पहला वेदांग रहा होगा, जिसका अत्यन्त प्राञ्जल रूप हमें पाणिनि की वेदांग "शिक्षा" में उपलब्ध है। महर्षि पाणिनि की यह रचना अपने विषय की न तो प्रथम रचना है, और न अन्तिम। संसार में आज अनेक वर्णमालाएँ हैं, जिनमें स्वरों और व्यंजनों के अनेकानेक भेदोपभेद हैं; आज के "शिक्षा-शास्त्री" इनकी ध्वनियों का भी बड़ी सूक्ष्मता से अध्ययन कर रहे हैं। 'शिक्षा' के बाद दूसरे वेदांग का नाम व्याकरण होना चाहिए, और फिर छन्द, क्योंकि ऋचाएँ छन्दोबद्ध थीं। पाणिनि की जो व्याकरण मिलती है वह लौकिक संस्कृत के भी काम की है, और वैदिक के भी काम की, और यही स्थिति पिंगल के छन्दशास्त्र की भी है। संसार के विभिन्न वाङ्मयों में व्याकरण और छन्द की विविधता प्रत्येक युग के साथ परिवर्तित और विकसित होती रहेगी। ज्योतिष और कल्प वेदांग भी इसी प्रकार विकासशील हैं। केवल एक वेदांग ऐसा है, जो केवल वेद (चार संहिताओं) के लिए है-वह है यास्क का निघण्टु, और उस ग्रन्थ पर उनकी लिखी टीका निरुक्त। शब्दार्थ समझने में नैरुक्तिक पद्धति के उपयोग का एकमात्र अधिकार हमें ऋग्वेद, और अनुवर्ती वैदिक संहिताओं के क्षेत्र में है, जिनके शब्द आख्यातज, यौगिक और योगरूढ़ि हैं। प्रत्येक तत्त्वज्ञान, दर्शन या विज्ञान की शब्दावली अपने-अपने अर्थों और अभिप्रायों में रूढ़ि हो जाती है।

महर्षि दयानन्द के अनुसार आर्यावर्त्त में ब्रह्मा से जैमिनि-पर्यन्त जितना भी साहित्य रचा गया, उसका केन्द्रबिन्दु वेद था। इस वेद को समझने-समझाने के लिए उपांग बने (छह दर्शनशास्त्र)। चार कोटि के उपवेदों का विकास हुआ, जिनकी

कथावस्तु आयुर्वेद, धनुर्वेद, गन्धर्ववेद और अर्थवेद कहलाई और वेद के अभिप्राय से ही प्रातिशाख्यों की रचना हुई। हमारे ब्राह्मणग्रन्थ, गृह्यसूत्र, श्रौतसूत्र, आरण्यक और उपनिषदें भी इसी वेद के विस्तार से सम्बन्ध रखती हैं। मनुष्य अपने भीतर एक विशेष मानसतन्त्र लेकर अवतरित हुआ था (अन्य पशुओं के मानस-तन्त्र से, जिसमें उभयेन्द्रियों का तन्त्र भी सम्मिलित है, मनुष्य का मानस-तन्त्र सर्वथा भिन्न रहा है)। जन्मजात कौतूहल, फिर कौतूहल से प्रेरित प्रश्न, और अन्त में प्रश्नों के समाधान का प्रयास, ये तीन क्षमताएँ उसमें सदा रहीं। कौतूहल, प्रश्न (जिज्ञासा) और समाधान–इन तीनों प्रक्रियाओं में उसने तीन विद्याओं को अपनाया–(क) स्वगत, (ख) समष्टिगत, और (ग) परम्परागत। (१) अकेले में विचार, (२) वादों-प्रवचनों और गोष्ठियों में मिलजुलकर विचार और (३) अन्त में, यह आगे की पीढ़ियों को सौंपकर। कौतूहल, जिज्ञासा और समाधान की यह प्रक्रिया अतीत काल में आरम्भ हुई थी और जब तक पृथ्वी पर मनुष्य जीवित है, यह बनी रहेगी।

इस त्रिविध पद्धति के फलस्वरूप मनुष्यों को प्रारम्भ में जो पुरुषार्थ-प्रेरक प्रेरणायें मिलीं उनसे मानव-समाज का विकास हुआ और शनैः शनैः उस समाज में उदात्तगुणों का प्रस्फुटन हुआ। बाद में इसी त्रिविधता ने समाज में वैभव के साथ-साथ विलास, दुर्गुण, प्रमाद, आलस्य, द्वेष, सत्तारूढ़िता, वैमनस्य आदि उत्पन्न किये। कर्म के स्थान पर कर्मकाण्ड आसीन हो गया और समाज शिथिल हो गया। हमारे समस्त ब्राह्मणग्रन्थ इसी युग की कृतियाँ हैं। वेद कर्म का प्रेरक रहा, ब्राह्मण-ग्रन्थ कर्मकाण्ड के प्रेरक हो गए। किन्तु इस ब्राह्मण-वाङ्मय में समाज का वह समस्त इतिहास भी छिपा हुआ है, जो कर्मकाण्ड से पूर्व समाज को प्राप्त हो गया था। दोनों युगों के इस अन्तर को नहीं भूलना चाहिए–(१) वैदिक युग–कर्म और पुरुषार्थ का प्रेरक (उदात्तयुग) (२) ब्राह्मण युग–कर्मकाण्ड का प्रेरक–समाज के शैथिल्य का युग।

ऐसा लगता है कि चारों वेदों ने (कृष्ण और शुक्ल यजुर्वेदों को अलग मानें, तो पाँचों वेदों ने) हमारे समाज को पाँच भागों में बाँट दिया। ऋग्वेद के अभिप्राय से, अर्थात् ऋग्वेद की ऋचाओं को लेकर जो कर्मकाण्ड किया जाने लगा, उसकी झाँकी ऐतरेय ब्राह्मण में मिलेगी। यजुर्वेद परम्परा वालों का ब्राह्मण ग्रन्थ शतपथ ब्राह्मण कहलाया, कृष्णयजुर्वेद (तैत्तिरीय संहिता) वालों का तैत्तिरीय ब्राह्मण, सामवेद वालों का साम ब्राह्मण (ताण्ड्य ब्राह्मण) और अथर्ववेद से सम्बन्ध रखने वाला गोपथ ब्राह्मण।

माध्यन्दिन शाखा के शतपथब्राह्मण में १४ काण्ड हैं।

महर्षि याज्ञवल्क्यकृत्–

अथ वाङ्मनस आख्यानम्

१ अथातो मनसश्चैववाचश्च-अहं भद्रऽउदितम्, मनश्च ह वै वाक् चाऽहंभर्दं ऊदाते ।।८।।

१-**अर्थ**- एक बार मन और वाणी में बड़ाई के लिए झगड़ा हुआ। मन और वाणी दोनों कहने लगे- मैं भद्र अर्थात् श्रेष्ठ हूँ, मैं भद्र हँ

२-तद्ध मनउवाच-अहमेव त्वच्छ्रेयोऽस्मि, न वै मया त्वं किञ्चननाभिगतं वदसि, सा यन्मम त्वं कृतानुकराऽनुवर्त्मासि, अहमेव त्वच्छ्रेयोऽस्मीति ।। ९ ।।

अर्थ-अब मन ने कहा-मैं तुझ से श्रेष्ठ हँ क्योंकि तू मेरे विचारे विना कुछ नही कहती है। तू मेरे किये का ही अनुसरण करती है, तू मेरा अनुकरण करती है। तू मेरा अनुसरण करती है, इसलिए मैं ही तुझ से श्रेष्ठ हूँ, बड़ा हँ

३-अथ ह वागुवाच-अहमेव त्वच्छ्रेयस्यस्मि । यद वै त्वं वेत्थाहं तद्विज्ञपयाम्हं सुज्ञपयामीति ।। १० ।।

अर्थ-इसके बाद वाणी ने कहा -मैं ही तुझ से श्रेयसी (श्रेष्ठ) हूँ, क्योंकि जो तू जानता है, मैं ही उसे विज्ञापित करती हूँ, मैं ही उसको लोगों को अच्छे प्रकार से समझाती हँ

४-ते प्रजापतिं प्रति प्रश्नमेयतुः-स प्रतापतिर्मनस एवानूवाच-मन एव त्वच्छ्रेयः, मनसो वै त्वं कृत-अनुकरानुवत्माऽसिः, श्रेयसो वै पापीयान् कृतानुकर-वर्त्मा भवतीति।। ११।।

अर्थ-वे दोनो (मन और वाणी) इस विषय में पूछने के लिये प्रजापति के पास गये। उस प्रजापति ने मन के अनुकूलता में कहा-हे वाणी। मन ही तुझसे श्रेष्ठ हैं, क्योंकि तू मन का ही अनुकरण करती है और तू उस के बतलाए मार्ग पर चलती है। निश्चय ही जो बड़े का अनुकरण करता है और उसके मार्ग पर चलता है, वह छोटा (पापीयान्) होता है।

५-सा ह वाक् परोक्ता विसिष्मिये। तस्मै गर्भः पपात। सा ह वाक् प्रजापतिमुवाच-'अहव्यवाडेव तुभ्यं भूयासम्, यां मां परोवाच' इति। तस्माद् यत्किञ्च प्राजापत्यं यज्ञे क्रियते, उपांश्वेव तत् क्रियते। अहव्यवाड्धि वाक् प्रजापतयऽआसीत्।।१२।।

अर्थ-वह वाणी अपने विरूद्ध उस निश्चय को सुनकर चकित हो गई और उसका गर्भपात हो गया। उस वाणी ने प्रजापति से कहा - मैं तेरे लिए 'अहव्यवाड' कभी भी हवि न ले जाने वाली हँगी। क्योंकि तूने मेरा विरोध किया है। इसलिए यज्ञ में जो कुछ किया जाता है, वह (उपांशु) अर्थात् मौन होकर पढा जाता है, क्योंकि वाणी प्रजापति के लिए (हव्यवाड) हवि की वाहक नहीं होती।

अतः **'ओं प्रतापतये स्वाहा'** यह आहुति यज्ञ में मौन होकर दी जाती है।

विशेष–चक्षु आदि पांच ज्ञानेन्द्रियां हैं। और मन भी एक ज्ञानेन्द्रिय है। वह जिस ज्ञानेन्द्रिय से संयुक्त होता है, वही ज्ञानेन्द्रिय अपने रूपादि विषय को ग्रहण करती है, और ज्ञानेन्द्रिय से वियुक्त रहती है, वह ज्ञानेन्द्रिय उस विषय को ग्रहण नहीं करती है। **'सर्वार्थं मनः'** अर्थात् मन सब ज्ञानेन्द्रियों के अर्थ का साधक है। अतः वाणी आदि सब ज्ञानेन्द्रियों से मन बड़ा है और वे वाणी आदि इन्द्रियाँ उससे छोटी हैं। शरीर एक राष्ट्र के सामान है। जिस में मुख ब्राह्मण, भुजा क्षत्रिय, और जंघा वैश्य और चरण शूद्र हैं। उस राष्ट्र रूपी शरीर का पति आत्मा है। ज्ञानेन्द्रियाँ और कर्मेन्द्रियाँ और मन उसकी प्रजा हैं। आत्मा प्रजापति है, इस प्रजा का स्वामी है। जब वाणी आदि इन्द्रियाँ उस प्रजापति से रूष्ट हो जाती हैं। तब उसके प्रति अपना व्यापार (बन्द) कर देती हैं। जैसे वाणी ने रूष्ट होकर प्रजापति विषयक मन्त्र के उच्चारण में अपना कार्य बन्द कर दिया। अतः यज्ञमान वहाँ मौन होकर आहुति देता है।

।।इति वाङ्मनस-आख्यानम् ।।

उपनिषद् साहित्यम्

१. ईशावास्योपनिषद्

यह ईशावास्योपनिषद् शुक्लयजुर्वेदकाण्वशाखीय संहिता का चालीसवाँ अध्याय ही है। मन्त्र-भाग का अंश होने से इसका विशेष महत्व है। इसी को सबसे पहला उपनिषद् माना जाता है। शुक्लयजुर्वेद के प्रथम उन्तालीस अध्यायों में कर्म काण्ड का निरूपण हुआ है। यह उस काण्ड का अन्तिम अध्याय है और इसमें भगवत्तत्त्वरूप ज्ञान काण्ड का निरूपण किया गया है। इसके पहले मन्त्र में **'ईशावास्यम्'** वाक्य आने से इसका नाम 'ईशावास्य' माना गया है।

शान्तिपाठ

ऊँ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः शान्तिः शान्तिः

ऊँ=सच्चिदानन्दघन; **अदः**=वह परब्रह्म; **पूर्णम्**=सब प्रकार से पूर्ण है; **इदम्**=यह (जगत भी); **पूर्णम्**=पूर्ण (ही) है; (क्योंकि) **पूर्णात्**=उस पूर्ण (परब्रह्म) से ही;

पूर्णम्=यह पूर्ण; **उदच्यते**=उत्पन्न हुआ है; **पूर्णस्य**=पूर्णके; **पूर्णम्**=पूर्णको; **आदाय**=निकाल लेने पर (भी); **पूर्णम्**=पूर्ण; **एव**=ही; **अवशिष्यते** =बच रहता है।

व्याख्या–वह सच्चिदानन्दघन परब्रह्म पुरुषोत्तम सब प्रकार से सदा सर्वदा परिपूर्ण है। यह जगत् भी उस परब्रह्म से ही पूर्ण है; क्योंकि यह पूर्ण उस पूर्ण पुरुषोत्तम से ही उत्पन्न हुआ है। इस प्रकार परब्रह्म की पूर्णता से जगत् पूर्ण है, इसलिये भी वह परिपूर्ण है। उस पूर्ण ब्रह्म में से पूर्ण को निकाल लेने पर भी वह पूर्ण ही बच रहता है। त्रिविध ताप की शान्ति हो।

ईशा वास्यमिदँ सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ॥१॥

जगत्याम=अखिल ब्रह्माण्ड में; **यत् किं च**=जो कुछ भी; **जगत्**=जड-चेतनस्वरूप जगत् है; **इदम्**=यह; **सर्वम्**=समस्त; **ईशा**=ईश्वर से; **वास्यम्**=व्याप्त है; **तेन**=उस ईश्वर को साथ रखते हुए; **त्यक्तेन**=त्यागपूर्वक; **भुञ्जीथाः**=(इसे) भोगते रहो; **मा गृधः**=(इसमें) आसक्त मत होओ; (क्योंकि) **धनम्**=धन-भोग्य-पदार्थ; **कस्य स्वित्**=किसका है अर्थात् किसी का भी नही है॥१॥

व्याख्या–मनुष्यों के प्रति वेदभगवान् का पवित्र आदेश है कि अखिल विश्व-ब्रह्माण्ड में जो कुछ भी यह चराचरात्मक जगत् तुम्हारे देखने-सुनने में आ रहा है, सब-का-सब सर्वाधार, सर्वनियन्ता, सर्वाधिपति, शक्तिमान्, सर्वज्ञ, सर्वकल्याण गुण-स्वरूप परमेश्वर से व्याप्त है; सदा-सर्वत्र उन्हीं से परिपूर्ण है (गीता ९/४)। इसका कोई भी अंश उनसे रहित नहीं है (गीता १०/३९, ४२)। यों समझकर उन ईश्वर को निरन्तर अपने साथ रखते हुए सदा-सर्वदा उनका स्मरण करते हुए ही तुम इस जगत् में ममता और आसक्ति का त्याग करके केवल कर्तव्य-पालन के लिये ही विषयों का यथा विधि उपभोग करो अर्थात्–विश्वरूप ईश्वर की पूजा के लिये ही कर्मों का आचरण करो। विषयों में मन को मत फँसने दो, इसी में तुम्हारा निश्चित कल्याण है (गीता २/६४;३/९;१८/४६)। वस्तुतः ये भोग्य-पदार्थ किसी के भी नहीं हैं। मनुष्य भूल से ही इनमें ममता और आसक्ति कर बैठता है। ये सब परमेश्वर हैं के और उन्हीं की प्रसन्नता के लिये इनका उपयोग होना चाहिये॥१॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥२॥

इह=इस जगत् में; **कर्माणि**=शास्त्रनियत कर्मों को; **कुर्वन्**=(ईश्वरपूजार्थ) करते हुए; **एव**=ही; **शतम् समाः**=सौ वर्षों तक; **जिजीविषेत्**=जीने की इच्छा करनी चाहिये; **एवम्**=इस प्रकार (त्याग भाव से, परमेश्वर के लिये); **कर्म**=किये जाने वाले

कर्म; **त्वयि**=तुझ; **नरे**=मनुष्य में; **न लिप्यते**=लिप्त नहीं होंगे; **इतः**=इससे (भिन्न); **अन्यथा**=अन्य कोई प्रकार अर्थात् मार्ग; **न अस्ति**=नहीं है (जिससे कि मनुष्य कर्म-बन्धन से मुक्त हो सके)।।२।।

व्याख्या—पूर्व मन्त्र के कथानुसार जगत् के एकमात्र कर्ता, धर्ता, हर्ता, सर्वशक्तिमान, सर्वमय परमेश्वर का सतत स्मरण रखते हुए सब कुछ उन्हीं का समझकर उन्हीं की पूजा के लिये शास्त्रनियत कर्तव्य कर्मों का आचरण करते हुए ही सौ वर्ष तक जीने की इच्छा करो—इस प्रकार अपने पूरे जीवन को परमेश्वर के प्रति समर्पण कर दो। ऐसा समझो कि शास्त्रोक्त स्वकर्म का आचरण करते हुए जीवन-निर्वाह करना केवल परमेश्वर की पूजा के लिये ही है, अपने लिये नहीं—भोग भोगने के लिये नहीं। यों करने से वे कर्म तुझे बन्धन में नहीं डाल सकेंगे। कर्म करते हुए कर्मों से लिप्त न होने का यही एकमात्र मार्ग है। इसके अतिरिक्त अन्य कोई भी मार्ग कर्मबन्धन से मुक्त होने का नहीं है (गीता २/५०, ५१; ५/१०)।।२।।

सम्बन्ध—इस प्रकार कर्मफलस्वरूप जन्मबन्धन से मुक्त होने के निश्चित मार्ग का निर्देश करके अब इसके विपरीत मार्ग पर चलने वाले मनुष्यों की गति का वर्णन करते है—

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनोः।।३।।

असुर्याःअसुरों के; (जो) **नाम**=प्रसिद्ध); **लोकाः**=नाना प्रकार की योनियाँ एवं नरकरूप लोक हैं; **ते**=वे सभी; **अन्धेन तमसा**=अज्ञान तथा दुःखक्लेशरूप महान् अन्धकार से; **आवृताः**=आच्छादित हैं; **ये के च**=जो कोई भी; **आत्महनः**=आत्मा की हत्या करने वाले; **जनाः**=मनुष्य हों; **ते**=वे; **प्रेत्य**=मरकर; **तान्**=उन्हीं भयंकर लोकों को; **अभिगच्छन्ति**=बार-बार प्राप्त होते हैं।।३।।

व्याख्या—मानव-शरीर अन्य सभी शरीरों से श्रेष्ठ और परम दुर्लभ है एवं वह जीव को भगवान् की विशेष कृपा से जन्म-मृत्युरूप संसार-समुद्र से तरने के लिये ही मिलता है। ऐसे शरीर को पाकर भी जो मनुष्य अपने कर्म समूह को ईश्वर-पूजा के लिये समर्पण नहीं करते और कामोपभोग को ही जीवन का परम ध्येय मानकर विषयों की आसक्ति और कामनावश जिस-किसी प्रकार से भी केवल विषयों की प्राप्ति और उनके यथेच्छ उपभोग में ही लगे रहते हैं; वे वस्तुतः आत्मा की हत्या करने वाले ही हैं; क्योंकि इस प्रकार अपना पतन करने वाले ये वे लोग अपने जीवन को केवल व्यर्थ ही नहीं खो रहे हैं वरं अपने को और भी अधिक कर्मबन्धन में जकड़ रहे हैं। इन काम-भोग-परायण लोगों को—चाहे वे कोई भी क्यों न हों, उन्हें चाहे संसार में कितने ही विशाल नाम, यश, वैभव या अधिकार प्राप्त हों, मरने के बाद कर्मों के

फलस्वरूप बार-बार उन कूकर-शूकर, कीट, पतंगादि विभिन्न शोक-संतापपूर्ण आसुरी योनियों में और भयानक नरकों में भटकना पड़ता है (गीता १६/१६, १९, २०), जो कि ऐसे आसुरी स्वभाव वाले दुष्टों के लिये निश्चित किये हुए हैं और महान् अज्ञानरूप अन्धकार से आच्छादित हैं। इसीलिये श्रीभगवान् ने गीता में कहा है कि मनुष्य को अपने द्वारा अपना उद्धार करना चाहिये, अपना पतन नहीं करना चाहिये (६/५)।।३।।

सम्बन्ध—जो परमेश्वर सम्पूर्ण जगत् में व्याप्त हैं, जिनका सतत स्मरण करते हुए तथा जिनकी पूजा के लिये ही समस्त कर्म करने चाहिये, वे कैसे हैं—इस जिज्ञासा पर कहते हैं—

अनेजदेकं मनसो जवीयो नेनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति।।४।।

(तत्)=वे परमेश्वर; **अनेजत्**=अचल; **एकम्**=एक:; (और) **मनसः**=मन से (भी); **जवीयः**अधिक तीव्र गतियुक्त हैं; **पूर्वम्**=सबके आदि; **अर्षत्**=ज्ञानस्वरूप या सबके जाने वाले हैं; **एनत्**=इन परमेश्वर को; **देवाः**=इन्द्रादि देवता भी; **न आप्नुवन्**=नहीं पा सके या जान सके हैं; **तत्**=वे (परब्रह्म पुरुषोत्तम); **अन्यान्**=दूसरे; **धावतः**=दौड़ने वालों को; **तिष्ठत्**=स्वयं) स्थिर रहते हुए ही; **अत्येति**=अतिक्रमण कर जाते हैं; **तस्मिन्**=उनके होने पर ही—उन्हीं की सत्ता-शक्ति से; **मातरिश्वा**=वायु आदि देवता; **अपः**=जलवर्षा आदि क्रिया; **दधाति**=सम्पादन करने में समर्थ होते हैं।।४।।

व्याख्या—वे सर्वान्तर्यामी सर्वशक्तिमान् परमेश्वर अचल और एक हैं, तथापि मन से भी अधिक तीव्र वेगयुक्त हैं। जहाँ तक मन की गति है, वे उससे भी कहीं आगे पहले से ही विद्यमान हैं। मन तो वहाँ तक पहुँच ही नहीं पाता। वे सब के आदि और ज्ञानस्वरूप हैं अथवा सबके आदि होने के कारण सबको पहले से ही जानते हैं। पर उनको देवता तथा महर्षिगण भी पूर्ण रूप से नहीं जान सकते (गीता १०/२)। जितने भी तीव्र वेगयुक्त बुद्धि, मन और इन्द्रियाँ अथवा वायु आदि देवता हैं, अपनी शक्ति भर परमेश्वर के अनुसंधान में सदा दौड़ लगाते रहते हैं; परंतु परमेश्वर नित्य अचल रहते हुए ही उन सबको पार करके आगे निकल जाते हैं। वे सब वहाँ तक पहुँच ही नहीं पाते। असीम की सीमा का पता ससीम को कैसे लग सकता है। बल्कि वायु आदि देवताओं में जो शक्ति है, जिसके द्वारा वे जल वर्षण, प्रकाशन, प्राणि-प्राणधारण आदि कर्म करने में समर्थ होते हैं, वह इन अचिन्तयशक्ति परमेश्वर की शक्ति का एक अंशमात्र ही है। उनका सहयोग मिले बिना ये सब कुछ भी नहीं कर सकते।।४।।

सम्बन्ध–अब परमेश्वर की अचिन्त्यशक्तिमता तथा व्यापकता प्रकारान्तर से पुन: वर्णन करते हैं–

तदेजति तन्नैजति तद् दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत:।।५।।

तत्=वे; **एजति**=चलते हैं; **तत्**=वे; **न एजति**=नहीं चलते; **तत्**=वे; **दूरे**=दूर से भी दूर हैं; **तत्**=वे; **उ अन्तिके**=अत्यन्त समीप हैं; **तत्**=वे; **अस्य**=इस; **सर्वस्य**=समस्त जगत् के; **अन्त:**=भीतर परिपूर्ण हैं; (और) तत्=वे; **अस्य**=इस; **सर्वस्य**=समस्त जगत् के; **उ बाह्यत:**=बाहर भी हैं।।५।।

व्याख्या–वे परमेश्वर चलते भी हैं और नहीं भी चलते; एक ही काल में परस्पर विरोधी भाव, गुण तथा क्रिया जिनमें रह सकती हैं, वे ही तो परमेश्वर हैं। यह उनकी अचिन्त्य शक्ति की महिमा है। दूसरे प्रकार से यह भी कहा जा सकता है कि भगवान् जो अपने दिव्य परम धाम में और लीला धाम में अपने प्रिय भक्तों को सुख पहुंचाने के लिये अप्राकृत सगुण-साकार रूप में प्रकट रहकर लीला किया करते हैं, यह उनका चलना है; और निर्गुणरूप से जो सदा-सर्वथा अचल स्थित हैं, यह उनका न चलना है। इसी प्रकार वे श्रद्धा-प्रेम से रहित मनुष्यों को कभी दर्शन नहीं देते, अत: उनके लिये दूर-से-दूर हैं; और प्रेम की पुकार सुनते ही जिन प्रेमीजनों के सामने चाहे जहां उसी क्षण प्रकट हो जाते हैं, उनके लिये वे समीप-से-समीप हैं। इसके अतिरिक्त वे सदा-सर्वत्र परिपूर्ण हैं, इसलिये दूर-से-दूर भी वे ही हैं और समीप-से-समीप भी वे ही हैं; क्योंकि ऐसा कोई स्थान ही नहीं है, जहाँ वे न हों। सबके अन्तर्यामी होने के कारण भी वे अत्यन्त समीप हैं; पर जो अज्ञानी लोग उन्हें इस रूप में नहीं पहचानते, उनके लिये वे बहुत दूर हैं (गीता १३/१५) वस्तुत: वे इस समस्त जगत् के परम आधार हैं और परम कारण वे ही हैं; इसलिये बाहर-भीतर सभी जगह वे ही परिपूर्ण हैं (गीता ७/७) ।।५।।

सम्बन्ध–अब अगले दो मन्त्रों में इन परब्रह्म परमेश्वर को जानने वाले महापुरुष की स्थिति का वर्णन किया जाता है–

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।६।।

तु=परंतु; **य:**=जो मनुष्य; **सर्वाणि**=सम्पूर्ण; **भूतानि**=प्राणियों को; **आत्मनि**=परमात्मा में; **एव**=ही; **अनुपश्यति**=निरन्तर देखता है; **च**=और; **सर्वभूतेषु**=सम्पूर्ण प्राणियों में; **आत्मानम्**=परमात्पा को (देखता है); **तत:**=उसके पश्चात् (वह कभी भी); **न विजुगुप्सते**=किसी से घृणा नहीं करता ।।६।।

व्याख्या—इस प्रकार जो मनुष्य प्राणिमात्र को सर्वाधार परब्रह्म पुरुषोत्तम परमात्मा में देखता है और सर्वान्तर्यामी परम प्रभु परमात्मा को प्राणिमात्र में देखता है, वह कैसे किससे घृणा या द्वेष कर सकता है। वह तो सदा-सर्वत्र अपने परम प्रभु के ही दर्शन करता हुआ (गीता ६/२९.३०) मन-ही-मन सबको प्रणाम करता रहता है तथा सबकी सब प्रकार से सेवा करना और उन्हें सुख पहुंचाना चाहता है ॥६॥

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥७॥

यस्मिन्=जिस स्थिति में; **विजानतः**=परब्रह्म परमेश्वर को भलीभांति जानने वाले महापुरुष के (अनुभव में) **सर्वाणि**=सम्पूर्ण; **भूतानि**=प्राणी; **आत्मा**=एकमात्र परमात्मस्वरूप; **एव**=ही; **अभूत्**=हो चुकते हैं; **तत्र**=उस अवस्था में (उस); **एकत्वम्**=एकता का–एकमात्र परमेश्वर का; **अनुपश्यतः**=निरन्तर साक्षात् करने वाले पुरुष के लिये; **कः**=कौन-सा; **मोहः**=मोह (रह जाता है और); **कः**=कौन-सा; **शोकः**=शोक। (वह शोक-मोह से सर्वथा रहित, आनन्दपरिपूर्ण हो जाता है) ॥७॥

व्याख्या—इस प्रकार जब मनुष्य परमात्मा को भली भांति पहचान लेता है, जब उसकी सर्वत्र भरगवद्दृष्टि हो जाती है–जब वह प्राणिमात्र में एकमात्र तत्व श्रीपरमात्मा को ही देखता है, तब उसे सदा-सर्वत्र परमात्मा के दर्शन होते रहते हैं। उस समय उसके अन्तःकरण में शोक, मोह आदि विकार कैसे रह सकते हैं? वह तो इतना आनन्दमग्न हो जाता है कि शोक-मोहादि विकारों की छाया भी कहीं उसके चित्त प्रदेश में नहीं रह जाती। लोगों के देखने में वह सब कुछ करता हुआ भी वस्तुतः अपने प्रभु में ही क्रीड़ा करता है (गीता ६/३१)। उसके लिये प्रभु और प्रभु की लीला के अतिरिक्त अन्य कुछ रह ही नहीं जाता ॥७॥

सम्बन्ध—अब इस प्रकार परमप्रभु परमेश्वर को तत्त्व से जानने का तथा सर्वत्र देखने का फल बतलाते हैं–

स पर्यगाच्छुक्रमकायमव्रण-मस्नाविरँ शुद्धमपापविद्धम।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतो-ऽर्थान् व्यदधाच्छाश्वतीश्यः समाभ्यः॥८॥

सः=वह महापुरुष; **शुक्रम**=(उन) परम तेजोमय; **अकायम्**=सूक्ष्म शरीर से रहित; **अव्रणम्**=छिद्ररहित या क्षतरहित; **अस्नाविरम्**=शिराओं से रहित–स्थूल पाञ्चभौतिक शरीर से रहित; **शुद्धम्**=अप्राकृत दिव्य सच्चिदानन्दस्वरूप; **अपापविद्धम्**=शुभाशुभकर्म-सम्पर्कशून्य परमेश्वर को; **पर्यगात्**=प्राप्त हो जाता है; (जो) **कविः**=सर्वद्रष्टा; **मनीषी**=सर्वज्ञ एवं ज्ञानस्वरूप; **परिभूः**=सर्वोपरि विद्यमान एवं सर्वनियन्ता; **स्वयम्भू**=स्वेच्छा से प्रकट होने वाले हैं (और); **शाश्वतीश्यः**=

अनादि; **समाभ्यः**=काल सें; **याथातथ्यनः**=सब प्राणियों के कर्मानुसार यथायोग्य; **अर्थान्**=सम्पूर्ण पदार्थों की; **व्यदधात्**=रचना करते आये हैं।।८।।

व्याख्या—उपर्युक्त वर्णन के अनुसार परमेश्वर को सर्वत्र जानने-देखने वाला महापुरुष उन परब्रह्म पुरुषोत्तम सर्वेश्वर को प्राप्त होता है, जो शुभाशुभ कर्मजनित प्राकृत सूक्ष्म देह तथा पाञ्चभौतिक अस्थि-शिरा-मांसादिमय षड्विकारयुक्त स्थूह देह से रहित, छिद्ररहित, दिव्य शुद्ध सच्चिदानन्दघन हैं; एवं जो क्रान्तदर्शी—सर्वद्रष्टा हैं, सबके ज्ञाता, सबको अपने नियन्त्रण में रखने वाले सर्वाधिपति हैं, और कर्मपरवश नहीं वरं स्वेच्छा से प्रकट होने वाले हैं तथा जो सनातन काल से सब प्राणियों के लिये उनके कर्मानुसार समस्त पदार्थों की यथायोग्य रचना और विभागव्यवस्था करते आये हैं।।८।।

सम्बन्ध—अब अगले तीन मन्त्रों में विद्या और अविद्या का तत्व समझाया जायेगा। इस प्रकरण में परब्रह्म परमेश्वर की प्राप्ति के साधन 'ज्ञान' को विद्या के नाम से कहा गया है और स्वर्गादि लोकों की प्राप्ति अथवा इस लोक के विविध भोगैश्वर्य की प्राप्ति के साधन 'कर्म' को अविद्या के नाम से। इन ज्ञान और कर्म—दोनों के तत्व को भली भांति समझकर उनका अनुष्ठान करने वाला मनुष्य ही इन दोनों साधनों के द्वारा सर्वोत्तम तथा वास्तविक फल प्राप्त कर सकता है, अन्यथा नहीं—इस रहस्य को समझाने के लिये पहले, उन दोनों के यथार्थ स्वरूप को न समझकर अनुष्ठान करने वालों की दुर्गति का वर्णन करते हैं—

अन्ध तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमा य उ विद्यायाँ् रताः।।९।।

ये=जो मनुष्य; **अविद्याम्**=अविद्या की; **उपासते**=उपासना करते हैं, (वे); **अन्धम्**=अज्ञानस्वरूप; **तमः**=घोर अन्धकार में; **प्रविशन्ति**=प्रवेश करते हैं; (और) **ये**=जो मनुष्य; **विद्यायाम्**=विद्या में; **रताः**=रत हैं अर्थात् ज्ञान के मिथ्याभिमान में मत्त हैं; **ते**=वे; **ततः**=उससे; **उ**=भी; **भूयः इव**=मानो अधिकतर; **तमः**=अन्धकार में (प्रवेश करते हैं)।।९।।

व्याख्या—जो मनुष्य भोगों में आसक्त होकर उनकी प्राप्ति के साधनरूप अविद्याका—विविध प्रकार के कर्मों का अनुष्ठान करते हैं, वे उन कर्मों के फलस्वरूप अज्ञानान्धकार से परिपूर्ण विविध योनियों और भोगों को ही प्राप्त होते हैं। वे मनुष्य-जन्म के चरम और परम लक्ष्य श्री परमेश्वर को न पाकर निरन्तर जन्म-मृत्युरूप संसार के प्रवाह में पड़े हुए विविध तापों से संतप्त होते रहते हैं।

दूसरे जो मनुष्य न तो अन्तःकरण की शुद्धि के लिये कर्तापन के अभिमान से रहित कर्मों का अनुष्ठान करते हैं और न विवेक-वैराग्यादि ज्ञान के प्राथमिक साधनों का ही सेवन करते हैं; परंतु केवल शास्त्रों को पढ़-सुनकर अपने में विद्या का–ज्ञान का मिथ्या आरोप करके ज्ञानाभिमानी बन बैठते हैं, ऐसे, मिथ्या ज्ञानी मनुष्य अपने को ज्ञानी मानकर, 'हमारे लिये कोई भी कर्तव्य नही है' इस प्रकार कहते हुए कर्तव्य कर्मों का त्याग कर देते हैं और इन्द्रियों के वश में होकर शास्त्रविधि से विपरीत मनमाना आचरण करने लगते हैं। इससे वे लोक सकामभाव से कर्म करने वाले विषयासक्त मनुष्यों की अपेक्षा भी अधिकतर अन्धकार को–पशु-पक्षी, शूकर-कूकर आदि नीच योनियों को और रौरव-कुम्भीपाकादि घोर नरकों को प्राप्त होते हैं ।।९।।

सम्बन्ध–शास्त्र के यथार्थ तात्पर्य को समझकर ज्ञान तथा कर्म का अनुष्ठान करने से जो सर्वोत्तम परिणाम होता है, उसका संकेत से वर्णन करते हैं–

अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे।। १०।।

